प्रकाशक : चौखम्बा संस्कृत सीरीज आफिस, वाराणसी
मुद्रक : चौखम्बा प्रेस, वाराणसी
संस्करण : तृतीय, वि० सं० २०५१
मूल्य : रु० ५०-००

SREE SANKARACHARYA UNIVERSITY OF SANSKRIT KALADY
036210

S 181.41
N94

© चौखम्बा संस्कृत सीरीज आफिस
के० ३७/९९, गोपाल मन्दिर लेन
पो० बा० नं० १००८, वाराणसी-२२१००१ (भारत)
आफिस : ३३३४५८
आवास : ३३४०३२

अपरं च प्राप्तिस्थानम्
कृष्णदास अकादमी
पो० बा० नं० ११११
चौक, (चित्रा सिनेमा बिल्डिङ्ग), वाराणसी-२२१००१
(भारत)
फोन : ३५२३३५

CHOWKHAMBA SANSKRIT SERIES
56

SĀṂKHYA-KĀRIKĀ

OF

SRIMAD ISVARAKRISNA

With

THE MATHARAVRITTI OF MATHARACARYA

Edited by

Sahityacarya Pt. Vishnu Prasad Sharma

AND

THE 'JAYAMANGALA' OF SHRI SHANKARA

Critically edited with an Introduction

by

Shri Satkari Sharma Vangiya

CHOWKHAMBA SANSKRIT SERIES OFFICE, VARANASI.

1994

© CHOWKHAMBA SANSKRIT SERIES OFFICE

K. 37/99, Gopal Mandir Lane
Post Box No. 1008, Varanasi–221001 (India)

Off : 333458
Res : 334032

Third Edition
1994

Also can be had from

KRISHNADAS Academy
Oriental Publishers & Distributors
POST BOX No. 1118
Chowk, (Chitra Cinema Building), Varanasi–221001
(INDIA)
Phone : 352358

द्वितीयसंस्करणस्य
प्रस्तावना

"त्रयी सांख्यं योगः पशुपतिमतं वैष्णवमिति
प्रभिन्ने प्रस्थाने परमिदमदः पथ्यमिति च ।
रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषां
नृणामेको गम्यस्त्वमसि पयसामर्णव इव ॥"

—महिम्नस्तोत्रम्

प्राचां सांख्याचार्याणामितिवृत्तमुपजीव्य स्तोकाद् यत्किञ्चित् प्रस्तुतमस्माभिः चौखम्बासंस्कृतग्रन्थमालास्थितसांख्यसंग्रहस्य प्रस्तावनायाम्[1]। इदानीमवसरप्राप्तत्वात् सांख्यकारिकातन्निर्मातृटीकाकृदादिविषये यथाशक्ति किञ्चित् निवेद्यते विदुषां कृपाकटाक्षमभिलषद्भिरस्माभिः ।

सांख्यदर्शने व्युत्पित्सुभिर्विद्वद्भिश्च परं समादृतस्य कारिकानिबद्धस्यास्य ग्रन्थस्य 'सांख्यकारिका' इति सर्वविदितं नामधेयम् । किन्त्वस्य 'सांख्यसप्ततिः' 'हिरण्यसप्ततिः' 'कनकसप्ततिः' 'सुवर्णसप्ततिः' इत्येवमादीन्यपि नामान्तराण्यालोक्यन्ते[2]। तादृशनामदर्शनात् आदौ ग्रन्थोऽयं सप्तत्या कारिकाभिर्निबद्ध आसीदिति केचन नवीना आकलयन्ति । किन्त्वद्यत्वे सांख्यकारिकाग्रन्थे द्वासप्ततिः कारिका उपलभ्यन्ते[3]। अतोऽन्तिमं ग्रन्थकर्तृपरिचयादिप्रदर्शकं कारिकाद्वितयं न स्वयं ग्रन्थनिर्मात्रा श्रीमदीश्वरकृष्णेनोपनिबद्धमपि तु केनचित् तदीयशिष्येण प्रशिष्येण वा परवर्तिनि समये प्रक्षिप्तमित्यपि चिन्तयन्ति ते विद्वद्धौरेयाः । किन्तु सप्ततितमकारिकायां ग्रन्थसमाप्तिर्नानुमातुं शक्यते, किं च, तया एकसप्ततितमकारिकाया अविच्छेद्योऽन्वयसम्बन्धोऽपि विद्यते । अतः, अन्तिमकारिकायुगलस्य प्रक्षिप्तत्वेऽङ्गीकृते सप्ततितमाया अपि तथात्वमापतति, येन पुनः सप्ततिसंख्यापूर्तिर्दुष्करा जायेत । सांख्यकारिकाभाष्यकर्त्रा तत्रभवता गौडपादाचार्येणान्तिमकारिकात्रितय(७०–७३)स्याव्याख्यातत्वात् पूर्वोक्तमनुमानमापाततो दार्ढ्यमेव भजते । अनेनाव्याख्यातत्वलिङ्गेन च एकोनसप्ततिः कारिका गौडपादसम्मतेति प्रतिभाति । अस्या अनुपपत्तेः समाधानं सुगृहीतनामधेयैः श्रीमद्भिर्वालगङ्गाधरटिळकमहाभागैरित्थं प्रस्तुतम्[4]—

---

१. सांख्यसंग्रहः । म० म० श्रीविन्ध्येश्वरीप्रसादद्विवेदिसम्पादितः । चौखम्बासंस्कृतग्रन्थमाला, ग्रन्थसंख्या ५० । द्वितीयं संस्करणम् । वाराणसी, सं० २०२६ वि० ।

२. द्रष्टव्यम्–तत्रैव, प्रस्तावनायाम् १७ तमे पुटे ।

३. एतत्तु युक्तिदीपिका-तत्त्वकौमुदी-सांख्यचन्द्रिकानामाधारेण कथ्यते । प्रस्तुतसंस्करणे मुद्रिताया माठरवृत्तेरनुसारेण तु कारिकासंख्या त्रिसप्ततिरेव, तत्र एकस्या अधिककारिकाया अवलोकनात् ।

४. B. G. Tilak, *A Missing verse in the Sāṃkhya Kārikā* (in Sanskrit Research, Vol. I. pp. 107–117).

सांख्यकारिकाणां द्वाषष्टितमा कारिका केनापि हेतुना मूलग्रन्थाद्भ्रष्टा लोकलोचनादन्तर्हिता । माठरवृत्तिगौडपादभाष्ययोर्दर्शनात्तत्रभवद्भिस्तस्याः कारिकायाः शरीरमित्थं योजितम्—

'कारणमीश्वरमेके पुरुषं कालं परे स्वभावं वा ।
प्रजाः कथं निर्गुणतो व्यक्तः कालः स्वभावश्च ॥'

गौडपादभाष्ये एकषष्टितमकारिकाव्याख्यानेऽवलोक्यमानः कश्चित् सन्दर्भ (यस्य प्रासङ्गिकत्वं दुरुपपादमेव) एव ईदृशकल्पनायां निदानम् ।[1]

अस्य कारिकात्रिशेषलोपप्रतिपादकस्य सिद्धान्तस्य खण्डनं श्रीसूर्यनारायणशास्त्रिणा स्वीयनिबन्धे विहितमवलोक्य डॉ० हरदत्तशर्मभिः टिळकमतपक्षपातिभिः तदीयखण्डनपुरःसरं टिळकसिद्धान्तं द्रढयितुं भूयान् प्रयासः कृतः ।[2]

१. सोऽयं सन्दर्भो यथा—

'……तत्र सुकुमारतरं वर्णयति । केचिदीश्वरं कारणं ब्रुवते—

अज्ञो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः ।
ईश्वरप्रेरितो गच्छेत् स्वर्गं नरकमेव वा ॥

अपरे स्वभावकारणिका ब्रुवते—'केन शुक्लीकृता हंसा मयूराः केन चित्रिताः ।' स्वभावेनैवेति । अत्र सांख्याचार्या आहुः–निर्गुणत्वादीश्वरस्य कथं सगुणतः प्रजा जायेरन् ? कथं वा पुरुषान्निर्गुणादेव, तस्मात् प्रकृतेर्युज्यते, यथा शुक्लेभ्यस्तन्तुभ्यः शुक्ल एव पटो भवति, कृष्णेभ्य कृष्ण एवेति, एवं त्रिगुणात् प्रधानात् त्रयो लोकास्त्रिगुणाः समुत्पन्ना इति गम्यते, निर्गुण ईश्वरः, सगुणानां लोकानां तस्मादुत्पत्तिरयुक्तेति । अनेन पुरुषो व्याख्यातः । तथा केषाञ्चित्कालः कारणमिति………।

२. 'सप्तत्यां किल येऽर्थाः' इतीश्वरकृष्णवचनानुरोधेनार्याणां सप्तत्या भाव्यम् । किन्तु गौडपादभाष्ये त्वेकोनसप्ततिरेवोपलभ्यन्ते, भाष्यं चैकषष्टितमाया उपरि नैकस्या अपितु कारिकयोः । भाष्यगतप्रतीकानुरोधेन चैषा कारिकैवं निर्मातुं शक्यते—

कारणमीश्वरमेके ब्रुवते कालं परे स्वभावं वा ।
प्रजाः कथं निगुर्णतो व्यक्ताः कालः स्वभावश्च ॥

अतो ध्रुवं केनचिदीश्वरनिरासासहिष्णुना कारिकेयं लोपिता । अन्येन च केनचिद्विद्वत्तरकेण भाष्यमेतन्मूलकारिकाविहीनमिति मत्वा तथैकषष्टितमकारिकाभाष्यान्तर्निवेशितं यथा स्थूलदर्शनैरपि विभाव्यते ।……यस्य खलु कुटिलमतेः स्वानभिमतेयं कारिका दृष्टिपथं याता, न तस्य भाष्यं दृग्गोचरीभूतमिति सम्भाव्यते ।……भाष्यं चास्मद्भाग्यवशान्न तद्धस्ते पतितम् ।……भाष्यग्रन्थस्य तत्समयेऽप्राप्तत्वाद् भाष्यस्य अद्यापि स्थितिरस्ति ।

"This K. is not translated into Chinese and seems to be an interpolation poterior to the time of P..ramārtha.

—*Tattvakaumudi* (Poona Oriental Series No. 10) with Introduction and Critical Notes by Dr. Haradatta Sharma, M. A., Ph. D., p. 156, fn. 92

सांख्यकारिकायाः सप्तति–संख्याकत्वप्रतिपादनाय श्रीमताम् अय्यास्वामिशास्त्रिणां[1] भिन्नः पन्थाः । सांख्यकारिकाग्रन्थोऽन्यूनानतिरिक्तसप्ततिकारिकात्मक एवेति तेषामपि मतम्[2] ।

तेषां तादृशेऽनुमाने इमे हेतवः—

१. परमार्थकृताद् वसुबन्धुजीवनवृत्तादवगम्यते यत् बौद्धाचार्येण वसुबन्धुना सुवर्णसप्तत्यपराभिधस्य सांख्यकारिकाग्रन्थस्य खण्डनार्थं 'परमार्थसप्ततिः' इत्याख्यः सप्ततिश्लोकात्मकः कश्चिद् ग्रन्थो निरमायि । अतः सांख्यकारिकयाऽपि सप्ततिश्लोकात्मिकया भाव्यम्[3] ।

२. परमार्थेन त्रिषष्टितमायाः कारिकायाश्चीनभाषानुवादो न विहितः, न वा तदुपरि टीकाऽपि चीनभाषायामनूदिता । अतः, इयं कारिका परमार्थसमयादूर्ध्वमेव मूलग्रन्थे केनापि प्रक्षिप्तः[4] ।

३. अन्तिमा (अर्थात् ७२तमा) कारिकाऽपि नेश्वरकृष्णनिर्मिता, चीनभाषाटीकायां तदीयावतरणे 'इह मेधावी कश्चिदाहार्याम्' इति स्पष्टमुक्तत्वात् । कारिकेयं केनचित् परवर्तिना विदुषा, सम्भवतः टीकाकर्त्रा निर्मिता[5] ।

इत्थं तन्मतेन कारिकाणां सप्ततिसंख्यापूर्तिः । अत एव सांख्यकारिकासंख्याविषये मतत्रैविध्यम्—

१. सांख्यकारिकाग्रन्थेऽन्तिमकारिकात्रितयं प्रक्षिप्तम्, तदुपरि गौडपादभाष्यस्यादर्शनात्, तदन्तरेणैव सिद्धान्तप्रतिपादनस्य चरितार्थत्वात्, कृत्स्नेन तेन त्रितयेन संसप्तिसंख्यातिरिक्तत्वात् । अन्तिमार्यात्रितयस्य परित्यागेऽपि सप्ततिसंख्याहानिरिति शङ्कायां मध्ये ६१ तमाया आर्यायाः परं काऽपि आर्या कथमपि लोपं प्राप्तेति समाधानम् । एष एव श्रीविलसनपण्डितस्याशयः ।

२. 'सप्तत्यां किल येऽर्थाः' इत्यादि ७२ तमकारिकास्थसप्ततिपदस्य तात्पर्यं न समग्रे ग्रन्थेऽपि तु सिद्धान्तप्रतिपादककारिकासु । अन्तिमकारिकात्रितये न सिद्धान्तप्रतिपादनम् । अतस्तद् विहाय शेषे ग्रन्थपूर्तिरनुसन्धेया । तथाऽङ्गीकृते एककारिकया ग्रन्थलाघवं यस्य संगत्यर्थं ६१ तमार्यायाः परं नवीनकारिकायोजना । इयानेव तत्रभवतां बालगङ्गाधरटिळकमहोदयानामभिप्रायः ।

३. तृतीयं तु श्रीमतामय्यास्वामिशास्त्रिणां मतमुपरिष्टाद् उपन्यस्तम् ।

---

१. इमे एव अज्ञातकृतटीकासमुपेत-सांख्यकारिकायाः परमार्थकृतचीनभाषाऽनुवादस्य संस्कृतरूपोद्धारकाः ।

२. N. Aiyaswami Śastri, *Suvarṇasaptati Sastra*, Tirupati 1944, p. xliii :

"I should like to mention one more point here. We must accept on the authority of Paramārtha that Īśvarakṛṣṇa composed 70 verses only and not a single verse less or more."

३. तत्रैव ।

४. तत्रैव । ६१ तमे पुटे प्रथमा टिप्पणी ।

५. तत्रैव, L. xliii.

सूक्ष्मेक्षिकया विचार्यमाणे विषयेऽस्मिन् उपर्युक्तेषु सिद्धान्तेष्वेकतमोऽपि नोपपत्तिसह इति प्रतिभाति। कथमिति चेदत्र ब्रूमः—ग्रन्थस्य सप्ततिसंख्यापूरणार्थमन्तिमश्लोकत्रयस्य प्रक्षिप्तत्वकथनादितरेतराश्रयदोषः, यत्प्रमाणबलेन सप्ततिसंख्याकत्वमङ्गीक्रियते तस्यैव प्रक्षिप्तत्वस्वीकारात्। उररीकृतेऽपि कथञ्चित् आर्यात्रयस्य प्रक्षिप्तत्वे पुनः संख्यालाघवं तत्पूर्त्यर्थं पुनः कारिकाविशेषलोपकथनमिति महत् कल्पनागौरवम्। बलीयःप्रमाणान्तराभावे भाष्यटीकादीनामदर्शनं मूलग्रन्थस्य प्रक्षिप्तत्वे न प्रमाणं महाभाष्यादिप्राचीनग्रन्थेष्वनेकत्र व्यभिचारदर्शनात्। अतः श्रीविलसनपण्डितानां तदनुगामिनां च मतं न मनोरमम्।

ग्रन्थस्य सिद्धान्तप्रतिपादकेंऽशे सप्ततिसंख्यापूर्तिरेव 'सप्तत्यां किल येऽर्थाः' इत्यार्यार्यायास्तात्पर्यमिति पक्षः केवलैककारिकासंघटनेनैव न प्रमाणकोटिमधिरोहति। अद्यत्वे प्रचलिते ग्रन्थे एकोनसप्ततितमस्यापि सिद्धान्तप्रतिपादकत्वाभावात्; अष्टषष्ट्यामेव कारिकासु सिद्धान्तप्रतिपादनस्य समाप्तेः नवघटितकारिकास्वीकारेऽपि न सप्ततिसंख्यापूर्तिः।

श्रीमतामय्यास्वामिशास्त्रिणां सिद्धान्तेऽपि नास्माकं सम्मतिः। कथमिति चेत्, यथा पूर्वोक्तरूपेण टीकाऽदर्शनं न प्रक्षिप्तत्वे प्रमाणं तथैव अनुवादादर्शनमपि, अतः परमार्थकृते चीनभाषामयानुवादे ६३तमकारिकाया अननूदितत्वात् तस्याः प्रक्षिप्तत्वं न सिद्ध्यति। द्वासप्ततितमायाः कारिकायाश्च 'केनापि अन्येन मेधाविना' रचितत्वे बलवत्प्रमाणाभावः, अन्यैः सर्वैः टीकाकृद्भिर्व्याख्यातत्वात्।

इदमप्यत्रावधेयम्। ग्रन्थनाम्नि तदीयसमाप्तिश्लोकादिषु वा उल्लेखिता संख्या प्रायशोऽतन्त्रैव भवति। यथा चेमे दृष्टान्ताः—अमरुशतकाख्ये सुविख्याते कोशकाव्यग्रन्थे षोडशाधिकं शतं श्लोकाः सातवाहनहालकृतायां गाथासप्तशत्यां निर्णयसागरीयसंस्करणे सप्ताधिकसप्तशती श्लोकानां संस्करणान्तरेषु च ततोऽप्यधिकाः, गोवर्धनाचार्यकृतार्यसप्तशत्यां किञ्चिदधिकसार्धसप्तशतं श्लोकाः। एवमन्यत्रापि।

अत एवेदं निष्कृष्यते—अद्यत्वे समुपलब्धायां सांख्यकारिकायां दृष्टासु द्वासप्ततिकारिकासु एकतमाऽपि न प्रक्षिप्ता सर्वा एव प्राचीनाः मूलग्रन्थकृन्निर्मिताश्च।

सांख्यकारिकाकार ईश्वरकृष्णः

सांख्यकारिकाकर्ता श्रीमदीश्वरकृष्णः स्वकृतौ आत्मनाम आविष्कृतवान्। तत्रैव पुनस्तेन कपिलादारभ्य पञ्चशिखं यावत् सांख्याचार्यपरम्पराऽपि स्मृता। किन्तु स्वपरिचयविषये ततोऽधिकं किमपि न तेन विवृतम्। अतः साक्षात्प्रमाणेन तस्याचार्यवर्यस्य जन्मभूप्रादुर्भावकालादीनां निरूपणं दुष्करमेव संवृत्तम्। तत्तद्विषये इदानीन्तनानां मनीषिणां मतान्यन्योन्यं भृशं वैभिद्यन्त एव।

सांख्यकारिकाकृत् श्रीमदीश्वरकृष्णः कस्मिन् समये स्वजन्मना भारतभुवं भूषयांचकारेति प्रश्नस्योत्तरं नातिमृग्यम्। बौद्धाचार्यो वसुबन्धुः सांख्यसप्ततेः खण्डनार्थं परमार्थसप्ततिनामानं ग्रन्थं निबबन्धेति चीनदेशीयेतिवृत्तादवगम्यते। अतस्तन्मतेन श्रीमदीश्वरकृष्णो वसुबन्धोः प्राक्तन इति स्थितम्। वसुबन्धुस्तु क्रीस्तीयपञ्चमशताब्द्या अन्तिमे भागेऽविद्यतेति सुप्रथितयशसो जापानदेशोद्भवस्य श्रीताकाकुसु-

पण्डितस्य मतम्। किन्तु कीथप्रभृतयोऽन्ये विद्वांसो न तदाद्रियन्ते। वसुबन्धुः क्रीस्तीयचतुर्थशतके प्रादुरासीदिति फ्रान्सदेशाभिजनो विद्वान् श्रीपेरीमहोदयोऽनेकप्रमाणबलेन निश्चिनोति। तत्रैव श्रीकीथस्यापि सम्मतिः।[1] डॉ० सर्वपल्लीराधाकृष्ण(न्)महोदयस्तु श्रीमदीश्वरकृष्णं क्रीस्तीयतृतीयशताब्दीभवमाकलयति[2]। शार्मण्यदेशीयस्य गार्वेपण्डितस्य मतेन श्रीमदीश्वरकृष्णः क्रीस्तीयप्रथमशताब्द्यामेवाविर्बभूव। किन्तु प्राचीनभारतीयग्रन्थानां सुसूक्ष्मं पर्यालोचनात् स सांख्यकारिकाकृत् क्रीस्तजन्मनः पूर्वमेव जनिमलभतेति सिद्ध्यति। तादृशानुमानेऽयमेव हेतुः—अनुयोगद्वारसूत्राख्यो वर्तते कश्चित् प्राकृतभाषामयो जैनानां ग्रन्थः। स तु क्रीस्तीयप्रथमशतक एव सङ्कलित इत्यत्र दृश्यते सर्वेषां विदुषां मतसंवादः। तत्रैवानुयोगद्वारसूत्रे[3] कनगसत्तरी(कनकसप्तति)नाम्नो ग्रन्थस्योल्लेखो वर्तते। कनकसप्तति-हिरण्यसप्तति-सुवर्णसप्ततीत्यादीनि तु सांख्यकारिकाया एव नामान्तराणीति नातितिरोहितं विदुषाम्।

ईश्वरकृष्णेति महाकवेः कालिदासस्यैव नामान्तरमिति स्वप्नेश्वराचार्यस्य मतम्। किन्तु तादृशाभिन्नत्वप्रतिपादकस्य प्रमाणस्याभावान्न तत्र श्रद्दध्मो वयम्।

चीनपरम्परायां प्रसिद्धो विन्ध्यवासी ईश्वरकृष्णादभिन्नः इति श्रीताकाकुसुमहोदयाः समामनन्ति[4]। अत्र कीथमहोदयस्यापि पक्षपातोऽवलोक्यते। किन्तु जैनविद्वान् गुणरत्नः ईश्वरकृष्णविन्ध्यवासिनौ पृथक्तयोल्लिखति[5]। विशेषेणात्रावधेयम्—तयोराचार्ययोर्मिथः सिद्धान्तसाम्यमपि नास्तीति सुप्रतिपादितं तयोर्भिन्नपुरुषत्वं डॉ० आद्याप्रसादमिश्रमहोदयेन[6]। यत् केचिद् ईश्वरकृष्णं विन्ध्यवासितोऽप्युत्तरकालभवं प्रतिपादयन्ति तदपि सम्यङ् निरस्तं तेनैव विद्वद्धौरेयेण।

ईश्वरकृष्णाचार्यस्य पित्रादिपरिचयविषये न किमपि प्रमाणं कुत्राप्युपलभ्यते। तदीयगुरोरपि नाम न ज्ञायते। यद्यपि स कपिलासुरिपञ्चशिखानां परम्परानुसारी आसीदिति स्वयमेवोक्तवान्, किन्तु तथाऽपि तदीयवचनप्रामाण्यात् पञ्चशिखाचार्यस्य स शिष्यो वा प्रशिष्यो वा कतिभ्यो वा पुरुषेभ्योऽनन्तरं समुत्पन्न इति निश्चेतुं न शक्यते। एतद्विषये सांख्यकारिकाटीकाकर्तॄणां न सर्वथा ऐकमत्यमवलोक्यते। प्रस्तुतमाठरवृत्तिकाराणां मतेन ईश्वरकृष्णस्य गुरुपरम्परा त्वित्थम्—

'कपिलादासुरिणा प्राप्तमिदं ज्ञानम्। ततः पञ्चशिखेन, तस्माद् भार्गवोलूकवाल्मीकिहारीतदेवलप्रभृतीनागतम्। ततस्तेभ्य ईश्वरकृष्णेन प्राप्तम्।'[7]

---

१. A. B. Keith, *The Sāmkhya System*, p. 84.
२. *Indian Philosophy*, Vol. ii, p. 254.
३. १४तमे सूत्रे।
४. Takakusu, *A Study of Paramartha's life of Vasubandhu* (J. R. A. S., 1905).
५. तर्करहस्यदीपिका, पृ० १०२, १०४।
६. सांख्यदर्शन की ऐतिहासिक परम्परा, पृ० १६८–१७२।
७. ७१तमकारिकाया वृत्तिः (पृ० ६२)।

किन्तु अस्मान्माठरवचनात् कस्तावदासीद् ईश्वरकृष्णस्य गुरुरिति निश्चयेन न निरूपयितुं शक्यते।

युक्तिदीपिकाटीकाकर्तुर्मतेन तु सांख्यसम्प्रदायस्य गुरुशिष्यपरम्परा इत्थमासीत्—

'''''हारीतवाद्धलिकैरातपौटिकार्षभेश्वरपञ्चाधिकरणपतञ्जलि–वार्षगण्य–कौण्डिन्यमूकादिक–शिष्यपरम्परयाऽऽगतम्''''''''' ।'[2]

यद्यपि स्वकीयगुरुपरम्परा स्वयमीश्वरकृष्णेनैवोल्लिखिता '''मुनिरासुरये प्रददौ। आसुरिरपि पञ्चशिखाय तेन च बहुधा कृतं तन्त्रम्। शिष्यपरम्परयाऽऽगतमीश्वरकृष्णेन' इत्यादि वदता, किन्तु किंनामधेयस्तावदाचार्यस्तस्य गुरुरासीदिति न निश्चेतुं शक्यते तत्र नाम्नाऽनुल्लेखात्। यद्यप्यत्र नवीनविदुषां बहुधा विमर्शोऽवलोक्यते तथापि विनिगमकाभावात्तत्र निर्णयो न सुकर इति कृतं बहुपल्लवितेन।

सांख्यसिद्धान्तः

सांख्यदर्शनस्याचार्याणां विषये यथाशक्ति किञ्चित् प्रतिपादितम्। इदानीं सांख्यसिद्धान्तः समासत उपस्थाप्यते।

दुःखप्रहाण एव सर्वेषामेव दर्शनशास्त्राणां तात्पर्यम्। वस्तुतो मनुष्यैरनुभूयमानानां विविधदुःखानां परिहाणायैव जिज्ञासा जायते। सांख्यकारिकाकर्तुर्मतेन दृष्टेन मणिमन्त्रौषधादिनोपायेन ऐकान्तिकतयाऽऽत्यन्तिकतया च दुःखनिवृत्तिर्नोपजायते न वा पुनः स्वर्गादिफलकेन यागादिना, अतोऽन्यः कश्चिदुपायस्तदर्थमनुसन्धेयो भवति।[3] कस्तावत् स उपायो येन दुःखस्य निवृत्तिः स्यात्। स तु मोक्ष एव। कामं संसारे दुःखेन साकं सुखमप्यनुभूयते। किन्तु तस्यापि अणुमात्रस्य सुखस्य दुःखभूयिष्ठत्वात्तदपि दुःखनाम्नैव व्यवह्रियते।[4] दुःखं तु जन्मव्याधिजरामरणादिलक्षणम् आध्यात्मिकाधिदैविकाधिभौतिकप्रभेदभिन्नं लिङ्गशरीराधिष्ठानमेव। अतः, आलिङ्गशरीरस्थितेस्तस्य न निवृत्तिः।[5] सांख्यसिद्धान्तानुसारेण तु प्रकृतिपुरुषविवेकज्ञानमेव लिङ्गशरीरस्थित्यन्तकारणमत एव तदेव मोक्षस्य पन्थाः। प्रकृतिपुरुषयोः तत्प्रभेदज्ञानमेव सांख्यशास्त्रे तत्त्वज्ञानविवेकख्यात्यादिनामभिरपि व्यपदिश्यते।

प्रकृतिपुरुषविवेकज्ञानोपलब्धये चित्स्वरूपस्य पुरुषस्य जडरूपायाः प्रकृतेश्च याथार्थ्येन तत्त्वज्ञानमपेक्ष्यते। ज्ञानं तु स्वकरणरूपेण प्रमाणमपेक्षते। चित्तवृत्तिर्या न सन्दिग्धविषयगामिनी सैव सांख्यशास्त्रे प्रमाणत्वेनाङ्गीक्रियते।[6]

१. 'अत्राचार्याणामुल्लेखः कालक्रमानुसारं न कृतः' इति 'सांख्यदर्शन की ऐतिहासिक परम्परा' इत्याख्यग्रन्थकर्तुः डॉ॰ आद्याप्रसादमिश्रमहोदयस्य मतं सर्वथा समीचीनमेव प्रतिभाति।

२. कारिका ७०–७१।

३. सांख्यकारिका–१, २।

४. युक्तिदीपिका–

५. सांख्यकारिका–५५।

६. तत्रासन्दिग्धाविपरीतानधिगतविषया चित्तवृत्तिः।

प्रत्यक्षम्, अनुमानं, शब्दश्चेति प्रमाणत्रैविध्यं सांख्यसम्मतम्।[1] दर्शनान्तरे यानि अर्थापत्त्यादीनि प्रमाणानि अङ्गीक्रियन्ते तानि सर्वाणि अप्येषु त्रिष्वन्तर्भवन्तीति कारिकाकृद्भिः स्पष्टमुक्तम्। तेषां प्रमाणान्तराणां सांख्योक्तप्रमाणत्रयेऽन्तर्भावं तु सुष्ठु सोदाहरणं चोपपादयति माठराचार्यः।[2]

प्रमाणेषु च पुनस्तेषु त्रिषु प्रत्यक्षमेव ज्येष्ठं सर्ववादिसम्मतत्वात्, अनुमानादीनामपि आधारभूतत्वाच्च।[3] प्रत्यक्षलक्षणं कारिकाकृद् इत्थमुपन्यस्यति 'प्रतिविषयाध्यवसायो दृष्टम्' इति।[4]

सांख्यकारिकायाष्टीकाकाराः

प्राचीनकालत आरभ्याद्य यावत् विरचिताः सांख्यकारिकाया अनेकाष्टीकाः। तासु गौडपादकृतं भाष्यं, माठराचार्यकृता वृत्तिः, वाचस्पतिमिश्रकृता सांख्यतत्त्वकौमुदी, अज्ञातकर्तृका युक्तिदीपिका, शङ्कराचार्यकृता जयमङ्गला, नारायणतीर्थविरचिता सांख्यचन्द्रिका चेदानीमुपलभ्यन्ते।

अस्मिन् संस्करणे माठरवृत्तिजयमङ्गले मुद्रापिते। अतस्तत्तद्विषये स्तोकान्निवेद्यते।

माठरवृत्तिः

माठराचार्यनामा कश्चित् सुप्राचीनः सांख्याचार्य आसीद् येन माठरभाष्यनाम्नी सांख्यसप्ततिटीका निरमायीति जैनग्रन्थदर्शनात् परिज्ञायते। स तु माठराचार्यः क्रीस्तीयप्रथमशतके क्रीस्तपूर्वप्रथमशतके वाऽऽसीदिति अनुमातुं युक्तम्। परमार्थनाम्ना बौद्धभिक्षुणा सांख्यकारिकायाः टीका चीनभाषायामनूदिता सा माठरभाष्यान्नेतरा इति पण्डितसुब्रह्मण्यशास्त्रिणां मतम्[5]. किन्तु प्रागुक्तचीनभाषामयटीकायाः पुनःसंस्कृतरूपान्तरकर्ता पण्डितश्रीअय्यास्वामिशास्त्री माठरभाष्यमिदानीं तिरोभूतं, माठरवृत्तिस्तु तदितरेति तर्कयति। वृत्तावस्यां श्रीशङ्कराचार्यकृतहस्तामलकस्तोत्रोद्धरणदर्शनात्, श्रीमद्भागवतस्य वचनसत्त्वात्, वेदान्तदृष्ट्या च सांख्यतत्त्वव्याख्यानात्। तन्मतेन माठरवृत्तिः क्रीस्तीयाष्टमशतकादनन्तरं केनचित् विरचिता। किन्तु डॉ॰ श्रीआद्याप्रसादमिश्रमहोदयैः[6] पण्डितश्रीउदयवीरशास्त्रिभिश्च अनेकप्रमाणोपन्यासेन माठरवृत्तेः प्राचीनत्वं माठरभाष्येणाभिन्नत्वं च सुष्ठु प्रतिपादिते। अस्माकमपि तत्रैव पक्षपातः। अस्माभिस्तु श्रीअय्यास्वामिशास्त्रिकृतसंस्कृतरूपान्तरेण सार्धं माठरवृत्तेः पङ्क्तिशः तुलना विहिता। अनयोः रचना-

१. 'दृष्टमनुमानमाप्तवचनं च, सर्वप्रमाणसिद्धत्वात्।
त्रिविधं प्रमाणमिष्टं'''''''''''' ''' ।' —सांख्यकारिका, ४।

२. चतुर्थकारिकाया माठरवृत्तिर्द्रष्टव्या। पृ॰ ८–९।

३. द्रष्टव्या—चतुर्थकारिकायास्तत्त्वकौमुदी टीका। चार्वाकादिपौराणिकान्ताः सर्वे एव सिद्धान्तिनः प्रत्यक्षस्य प्रमाणत्वमङ्गीकुर्वन्ति।

४. सांख्यकारिका–५।

५. N. Ayyaswami Sastri कृतसंस्कृतरूपान्तरस्य मुखबन्धः, पृ. iv.

६. सांख्यदर्शन की ऐतिहासिकपरम्परा, पृ॰ २३६, २५३।

शैल्यां, शब्दप्रयोगे, विषय-पारम्पर्ये च मिथः सर्वथा सादृश्यं विद्यते। अतो माठरवृत्तिरेव चीनभाषानुवादस्य मूलमासीदित्यत्र नास्ति लेशतोऽपि संशीतिः। यः कोऽपि स्तोकात् प्रभेदो दृश्यते एकस्य ग्रन्थस्य द्वी रूपान्तरप्राप्तिरेव तत्र निदानम्।

जयमङ्गला

इयं टीका गौडपादभाष्यादर्वाचीना वाचस्पतिमिश्रकालाच्च प्राचीनेति निश्चिन्वन्ति विद्वांसः। टीकाया अस्याः पण्डितहरदत्तशर्मकृते संस्करणे[1] 'इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीगोविन्दभगवत्पूज्यपादशिष्येण श्रीशङ्करभगवता कृता सांख्यसप्ततिटीका' इतीयं पुष्पिकाऽवलोक्यते यया टीकेयं वेदान्तप्रस्थानत्रयीभाष्यकर्त्रा तत्रभवता श्रीमच्छङ्कराचार्यपादेन निर्मितेति प्रतिभाति। किन्तु शैलीभेदात् सिद्धान्तभेदाच्च न सा प्रसिद्धशङ्कराचार्यविरचितेति म० म० गोपीनाथकविराजपादानां मतम्[2]। तन्मतेन तु टीकेयं कामन्दकीयनीतिसारटीकाजयमङ्गलावात्स्यायनकामसूत्रटीकाजयमङ्गलाकर्तुरेव कृतिः। तत्र पण्डितश्रीमदुदयवीरशास्त्रिमहोदयाः विप्रतिपद्यन्ते। किन्तु टीकेयं न कथमपि प्रस्थानत्रयभाष्यकर्तुः शङ्कराचार्यस्य कृतिरिति श्रीकविराजपादानां मतं सर्वथा उपपन्नमेव। पुष्पिका तु कथमपि तत्र प्रक्षिप्ता इत्यत्र न किमपि संशयकारणं पश्यामः। एतट्टीकाकर्तुः कामसूत्रनीतिसारटीकाकर्त्राऽभिन्नत्वविषये तु माध्यस्थ्यमेवावलम्ब्यतेऽस्माभिः।

टीकाया अस्याः सकृत् सम्पादनं पण्डितश्रीहरदत्तशर्मभिर्हस्तलिखितपुस्तकद्वयस्याधारेणाकारि। तदीयसंस्करणमिदानीं दुष्प्रापमेव। अतोऽस्मत्सम्पादितमाठरवृत्त्या साकमस्या अपि प्रकाशने काशीस्थचौखम्बासंस्कृतग्रन्थमालाध्यक्षाणामाग्रहातिरेकेण अस्माभिरस्या अपि यथाबुद्धि सम्पादनं विहितम्। तदर्थं ते एव संस्कृतग्रन्थप्रचारकुशलाः श्रेष्ठिवंशावतंसा धन्यवादार्हा न वयम्। विशेषेण ग्रन्थस्यास्य भूमिकादिलेखने मत्कृतविलम्बेन जायमाना महती हानिस्तैस्तूष्णीं सोढेति तेभ्यो भूयोऽपि साधुवादाः प्रदीयन्ते। अस्य पूर्वरूपसंशोधनादौ दत्तचित्तेभ्यो मदीयगुरुकल्पेभ्यः पं० श्रीरामचन्द्रझाव्याकरणाचार्यमहोदयेभ्यो महतीं कृतवेदितां निवेदयामि। एतत्सम्पादनकर्मणि आधाररूपेणावलम्बितपुस्तकद्वयं—

१. कलिकातामुद्रितं श्रीहरदत्तशर्मसम्पादितमेकम् क० संज्ञितम्।

२. चौखम्बाकार्यालयस्थं हस्तलिखितपुस्तकमन्यत् ख० संज्ञितम्। एतत्पुस्तकस्थाः पाठाः प्रायेण श्रीहरदत्तशर्मावलम्बितकपुस्तकेन संवदन्ति।

केनापि हेतुविशेषेण मनसश्चाञ्चल्यात्, स्वकीयस्वास्थ्यस्यासमीचीनत्वात्, अतित्वरया विहितत्वाच्च सम्पादनं न सर्वथा निर्दोषं जानामिति तत्र तत्र दरीदृश्यमानानां त्रुटीनां कृते विदुषां क्षमामेव याचे। कृपाकटाक्षवृष्ट्या ते श्रमं मे सफलीकुर्वन्त्विति च साञ्जलि तानभ्यर्थये। इति निवेदयति—

विदुषामाश्रवः
सत्कारिशर्मा

---

1. Calcutta Oriental Series, 19, 1926.
२. प्रागुक्तसंस्करणस्य भूमिका पृ० ८–९।

प्रथमसंस्करणस्य भूमिका

साङ्ख्यदर्शनमधिकृत्य सतोरपि तत्त्वसमास–साङ्ख्यप्रवचनसूत्रग्रन्थयोरस्य साङ्ख्यसप्ततिग्रन्थस्य प्राचीनत्वाद्विशदत्वाच्च महती प्रतिष्ठा। श्रीशङ्कराचार्यैः प्राचीनबौद्धजैनग्रन्थकारैश्च तत्र तत्र साङ्ख्यमतनिरूपणे तत्खण्डने वा साङ्ख्यसप्ततेरेवार्या उदाहृताः, न तु सूत्रग्रन्थयोः कानिचिदपि सूत्राणीति सूत्रग्रन्थयोः प्राचीनतरत्वे संशयः। सतीष्वपि बह्वीषु टीकासु साङ्ख्यसप्ततिग्रन्थस्य, अत्र प्रथमवारं मुद्रणतां नीता माठरवृत्तिः प्राचीनतरा सरलतरा चेति साङ्ख्यसिद्धान्तजिज्ञासूनामतीवोपकारिणी। तत्र कदाऽस्याः प्रादुर्भावो जात इति विचार्यमाणे मूलभूतायाः साङ्ख्यसप्ततेर्विरचनसमयस्यादौ निर्णय आवश्यकः।

ईश्वरकृष्णः

साङ्ख्यसप्ततेः कर्ता ईश्वरकृष्णो नाम साङ्ख्याचार्यः, 'भगवान्' 'भगवतोक्तम्' इत्यादिबहुमानसूचकैः पदैर्माठरवृत्तौ लक्षितः। चीनभाषायां परमार्थनाम्ना बौद्धपण्डितेन स्वगुरोर्वसुबन्धोश्चरितं निबद्धम्। तस्माज्ज्ञायते यद्वसुबन्धोर्गुरुर्बुद्धमित्रो भर्तृबुद्धो वा साङ्ख्याचार्येण वार्षगण्यशिष्येण विन्ध्यवासिना वादे पराजितः, येन हिरण्यसप्ततिः सुवर्णसप्ततिरिति वा ग्रन्थो रचितः। एतस्मात्केचन पण्डिता विन्ध्यवास्येव ईश्वरकृष्ण इत्यनुमिमते। एतदशुद्धमित्यग्रे प्रतिपादयिष्यते। इदमपि वसुबन्धुनोक्तं यद्विन्ध्यवासिप्रणीतस्य ग्रन्थस्य खण्डनं वसुबन्धुना परमार्थसप्ततिरित्याख्यया कृत्याऽऽविष्कृतमिति।

केषांचिदपरेषां चीनदेशीयपण्डितानामैतिह्ये त्वीश्वरकृष्णस्य वसुबन्धुशिष्येण दिङ्नागाचार्येण सह विवादः सञ्जातः, तस्मिन्नीश्वरकृष्णः पराजितोऽपि समयानुबन्धमविगणय्य बौद्धधर्मं न स्वीचकार, तेन दिङ्नागो विषण्णो लोकोपदेशाद्विरराम, पश्चाच्चार्यमञ्जुश्रीप्रेरणया प्रमाणसमुच्चयाख्यं ग्रन्थं रचयामासेति।

बहूनां पण्डितानां मतानुरोधेन वसुबन्धोस्तु समयः (वि० सं० ४७६–५५६, ई० सं० ४२०–५००) वर्तते। दिङ्नागसमयः–वि० सं० ५३६–५७६, ई० सं० ४८०–५२०, परमार्थसमयस्तु (वि० सं० ५५५–६२५, ई० सं० ४९९–५६९) वर्षसम्मितः। यद्यपि वसुबन्धोः कालः कैश्चित् एतस्मादपि शतवर्षपूर्वमनुमीयते, तथापि वामनीयकाव्यालङ्कारसूत्रवृत्तौ समुद्धृतस्य 'सोऽयं सम्प्रति चन्द्रगुप्ततनयः' इत्यादिश्लोकार्धस्य वृत्तौ 'आश्रयः कृतधियामित्यस्य वसुबन्धुसाचिव्योपक्षेपपरत्वात् साभिप्रायत्वम्' इति दर्शनेन वसुबन्धुर्गुप्तवंशीयमहाराजद्वितीयचन्द्रगुप्तकुमारस्य महाराजकुमारगुप्तस्य समये (वि० सं० ४७१–५११, ई० सं० ४१५–४५५) आसीदिति ज्ञायते। अत ईश्वरकृष्णो भवतु वसुबन्धोस्तच्छिष्यस्य दिङ्नागस्य वा समकालीनः, तथापि (वि० सं० ५११ ई० सं० ४५५) परिसरे वर्तमानोऽभूदिति प्रतीयते।

प्रयुक्तपद्यमञ्जर्याख्यस्य कोशस्य कर्ता ईश्वरकृष्णकालिदासः अयमन्यो वा इति न ज्ञायते।

एतत्पूर्वीयाः साङ्ख्याचार्याः

ईश्वरकृष्णेन पूर्वेषां साङ्ख्याचार्याणां मतं सङ्क्षिप्येयं सप्ततिर्विरचितेति ७१।७२ आर्याभ्यां स्फुटम् ।

तत्र परमर्षिः कपिलः साङ्ख्यदर्शनस्याद्यद्रष्टेति सर्वसम्मतम् । तेनैव तत्त्वसमासाख्यसाङ्ख्यसूत्राणि प्रणीतानीति प्राचां मतम् । नवीनास्तु तथा न मन्यन्ते ।

आसुरिनामा तच्छिष्यः । अस्य—

'विविक्ते दृक्परिणतौ बुद्धौ भोगोऽस्य कथ्यते ।
प्रतिबिम्बोदयः स्वच्छे यथा चन्द्रमसोऽम्भसि ॥'

इति श्लोकस्य गुणरत्नसूरिकृतायां षड्दर्शनसमुच्चयटीकायां (३।४४) समुद्धरणेन ज्ञायते यदनेन कोऽपि कारिकाबद्धः प्रबन्धो निर्मितः ।

अस्य शिष्यः पञ्चशिखो नाम । स च विज्ञानभिक्षुमतेन (ब्रह्मसूत्रऋजुव्याख्यायां) तत्त्वसमासाख्यभाष्यस्य कर्ता । तथाहि तच्छिष्यः भावागणेशः

'समाससूत्राण्यालम्ब्य व्याख्यां पञ्चशिखस्य च ।'

इति तत्त्वयाथार्थ्यदीपनेऽभिहितवान् । तथा तत्र (पृ०–८१) तेनैव एकः श्लोकः 'उक्तं च पञ्चशिखाचार्यैः' इत्यवतरणपूर्वं समुद्धृतः ।

योगसूत्रव्यासभाष्ये (१ । ४) 'तथा च सूत्रम्–एकमेव दर्शनं ख्यातिरेव दर्शनम् इति' इत्यस्य टीकायाम् 'इदं पञ्चशिखाचार्यस्य सूत्रम्' इति वाचस्पतिमिश्रः । तथा तस्मिन्नेव भाष्ये (२ । १३) 'स्यात्स्वल्पः सङ्करः सपरिहारः' इत्यादिकमवतारितम् । तदपि पञ्चशिखवचनमिति वाचस्पतिः । इदं च पञ्चशिखसूत्रमिति साङ्ख्यतत्त्वकौमुदीटीकायां स्वप्नेश्वरः । तथा तत्रैव (३ । १३) 'रूपातिशया वृत्त्यतिशयाश्च विरुध्यन्ते' इति, तदपि पञ्चशिखाचार्यसम्मतिरित्याह वाचस्पतिः । अतः पञ्चशिखाचार्येणापरः कोऽपि साङ्ख्ययोगसूत्रात्मको ग्रन्थो व्यरचि इत्यनुमीयते ।

वार्षगण्योऽपि कश्चन प्राचीनः साङ्ख्ययोगाचार्यः । एतस्य एकं वचनं व्यासभाष्ये (३ । ५३) उपलभ्यते ।

एतदुत्तरं कस्मिंश्चित्काले जातो विन्ध्यवासिनामकः प्रसिद्ध आचार्यः । अयमेवेश्वरकृष्ण इति केषांचिन्नवीनानां मतम् । अपरेषां तु नव्यानां वार्षगण्यो विन्ध्यवासी चोभौ ईश्वरकृष्णात् परस्ताज्जातौ इति मतम । तदिदं मतद्वयमपि दुष्टं भाति । तथाहि–'अथ व्याडिविन्ध्यस्थो नन्दिनीसुतः । मेधावी च' (२ । ७ । २४–२५) इति त्रिकाण्डशेषात् , 'अथ व्याडिर्विन्ध्यवासी नन्दिनीतनयश्च सः ।' (३ । ५ । ६) इति हैमकोशात् , 'अव्याधो विन्ध्यवासी च मरुदनन्दन इत्यपि' (१०) इति संयमिनाममालायाश्च स्फुटमवगम्यते यद् व्याडिरेव विन्ध्यवासीति । स च भगवतो वर्षस्य शिष्यो नन्दसमकालीनः (कथासरित्सागरे १ । २ ।) पाणिनिसूत्राणां सङ्ग्रहाख्यटीकायाः, कस्यचित् कोशस्य च कर्ता, दाक्षायणः पतञ्जलेरपि पुरोगामी, साङ्ख्ययोगाचार्यश्च । देवभद्रकृतन्यायावतारटिप्पणे गुणरत्नसूरिकृतषड्दर्शनसमुच्चयटीकायां (३ । ४१) च 'विन्ध्यवासी त्वेवमाचष्टे—

'पुरुषोऽविकृतात्मैव स्वनिर्भासमचेतनम् ।
मनः करोति सान्निध्यादुपाधिः स्फटिकं यथा ॥' इति ।

वादमहार्णवे च–'बुद्धिदर्पणसङ्क्रान्त०' इत्यादिकस्य तत्कृतश्लोकस्य दर्शनादयमार्याग्रन्थकर्तुरीश्वरकृष्णाद्भिन्न एव । हरिभद्रसूर्यादिभिः प्राचीनैरपि द्वयोरुल्लेखो भिन्न एव कृतः ।

यत्तु कैश्चित् ७१ आर्यावृत्तौ भार्गवादिप्राचीनसाङ्ख्याचार्याणां नामनिर्देशे वार्षगण्यविन्ध्यवासिनोर्नामदर्शनेन तयोरीश्वरकृष्णादर्वाचीनत्वं मतम्, तदरमणीयम् । वृत्तिस्थप्रभृतिशब्देन पराहतत्वात् , चीनैतिह्यात् तयोरीश्वरकृष्णात् पूर्ववृत्तित्वस्यावगमात् , प्राचीनतरे व्यासभाष्ये (वि० सं० ३५० ई० सं० ३००) वार्षगण्यग्रन्थस्योदाहृतत्वात् , विन्ध्यवासिनश्च व्याडेरेव नामान्तरत्वात् ।

अपि च भोजराजेन पातञ्जलयोगसूत्रवृत्तौ (४।२२) एकमेव विन्ध्यवासिवचनम्–'सत्त्वतप्यत्वमेव पुरुषतप्यत्वम्' इत्युपन्यस्तम् । तत्तु गद्यात्मकं सत् तस्य कस्याप्यपरस्य टीकाग्रन्थस्य गद्यग्रन्थस्य वा कर्तृत्वं द्योतयति । भोजवृत्तौ तत्रैव 'प्रतिबिम्बे प्रतिबिम्बमान०' इत्याद्यपरं वाक्यं विन्ध्यवासिन उक्तिरिति सम्भ्रान्तम्, तद्वाक्यस्य 'अन्यत्रापि' इति पूर्वकत्वात् । अयं योगसूत्रवृत्तिकारो भोजराजः प्रसिद्धात् मालवपतेः सरस्वतीकण्ठाभरणादिप्रणेतुर्भोजराजात् (वि० सं० १०६६ ई० १०१०) अन्य एव तस्मात् सार्धशतवर्षपूर्ववर्ती । तथाहि कश्मीरभूभर्तुः शङ्करवर्मणः (वि० सं० ९३९–९५८, ई० सं० ८८३–९०२) काले जयन्तभट्टः स्वकृतौ न्यायमञ्जर्यां प्रत्यक्षलक्षणानां दूषणावसरे ईश्वरकृष्णोक्तं 'प्रतिविषयाध्यवसायो दृष्टं' (सां० स० ५) इति लक्षणं दूषयन् 'यत्तु राजा व्याख्यातवान् प्रतिराभिमुख्येन वर्तते तेनाभिमुख्येन विषयाध्यवसायः प्रत्यक्षम्, इति' इत्यादिकं लिखितवान् । सोऽयं राजा साङ्ख्यसप्ततिटीकाकृत् , कस्यचित् व्याकरणग्रन्थस्य, पातञ्जलसूत्रस्योपरि राजमार्तण्डाख्यवृत्तेः, वैद्यके च राजमृगाङ्काख्यस्य ग्रन्थस्य कर्ता (योगसूत्रवृत्तौ श्लो० ५)। अयमेव राजवार्तिकस्यापि कर्ता स्यात् । अस्य रणरङ्गमल्ल इति नाम विरुदं वा इत्यपि तत एव ज्ञायते । एतत् किमपि मालवपतेर्भोजराजस्य नोपलभ्यते । अत इमौ द्वौ भिन्नौ एव इति सुव्यक्तम् । तत्र रणरङ्गमल्लः भोजानां विदर्भाणां राजा इति भोजराज इति ख्यातिमगात् इति सम्भाव्यते । यथा रामायणचम्पूकाव्यस्य कर्ता विदर्भराजः भोजराज इति ।

षष्टितन्त्रम्

सत्यपि पञ्चशिखादिप्रणीतप्राचीनग्रन्थकदम्बे साङ्ख्यसप्ततिस्तु षष्टितन्त्राख्यं ग्रन्थमनुसृत्येश्वरकृष्णेन प्रणीतेति ७२।७३ आर्याभ्यामवगम्यते । 'गुणानां परमं रूपम्' इत्यादिका एका कारिका व्यासभाष्ये (४।१३) समुद्धृता, सा षष्टितन्त्रस्था इति तट्टीकायां वाचस्पतिमिश्रः । माठरवृत्तौ (गौडपादीये च) १७ आर्याव्याख्याने तत एव कश्चिद्गद्यभागोऽपि समुद्धृतः । अतस्तत् विष्णुपुराणादिवद्गद्यपद्यात्मकं स्यादिति भाति । चीनदेशीयपण्डितानां मते पञ्चशिख एवास्य कर्ता । परन्तु बहुभिस्तत्सन्दिह्यते । अस्य नाम्नस्तन्त्रान्तरत्वं तस्यातिप्राचीनत्वं बोधयति । अस्य नामाद्युल्लेखोऽपि पाञ्चरात्राणामहिर्बुध्न्यसंहितायां जैनानामनुयोगद्वारसूत्रे च वर्तते ।

माठरः

माठर इति न व्यक्तिविशेषस्याभिधानम्, अपि तु ग्रन्थकर्तुः गोत्रजं नाम कश्यपगोत्रभेदे मठरगोत्रीयत्वात् माठर इति। यथा न्यायसूत्रभाष्यं पक्षिलस्वामिना कृतं वात्स्यायनेन कृतमिति, विष्णुगुप्तकृतमर्थशास्त्रं कौटिल्यकृतमिति, उद्योतकराख्यविरचितं न्यायवार्तिकं भारद्वाजीयं भारद्वाजकृतमिति वेति तत्तत्कर्तुर्गोत्रनाम्नैव प्रथितान्यभूवन्, तथैवेयं वृत्तिरपि माठराचार्यकृतेति कर्तुर्गोत्रनाम्ना प्रसिद्धिमुपगता। इयं वृत्तिर्मूलग्रन्थेन सह चीनभाषायां परमार्थपण्डितेन (वि० सं ६१३-६२५, ई० सं० ५५७-५६९) मध्ये परावर्तितेत्युभयभाषाविद्भिः समर्थ्यते। तिलकाख्यपण्डितस्तु तथा न मनुते (संस्कृतरिसर्च पु० १ पृ० १०८)। तत इयं वृत्तिः वि० सं० ४५० वर्षादर्वाचीना नेति केषांचिद्विदुषां मतम्। चीनभाषापरावर्तने वृत्तिकारस्य नाम न निर्दिष्टमिति शोच्यम्।

अत्रेदमप्यन्यद्विचारणीयम् यत् २९ आर्यावृत्तौ "यथा दर्पणाभाव आभासहानौ" इत्युदाहरणं हस्तामलक(संवाद)स्तोत्रात्समुद्धृतं दृश्यते। तच्च स्तोत्रं श्रीशङ्कराचार्यसमकालीनम् (वि० सं० ८३६-८६८ ई० सं० ७८०-८१२) इति प्रसिद्धमेव। ततः अयम्[1], "अहङ्कारो धियं ब्रूते" इत्यादयः केचनापरे चांशा अद्वैतमतानुकूला अत्र प्रक्षिप्ता इति माठरवृत्त्या अतिप्राचीनत्वाभिमानिभिर्वक्तव्यम्। अन्यथा एतस्याः शङ्कराचार्यसमयात् परस्ताद्विरचनं स्वीकार्यम्।

यत्तु साङ्ख्यसप्तत्या गौडपादीयं भाष्यम् (बनारस-संस्कृतसीरिजाख्यग्रन्थमालायां मुद्रितम्) तत्तु माठरवृत्त्याः केनचित्कृतः सङ्क्षेप इति भाति। नहि परकृतेः सङ्क्षेपकृत्त्वं श्रीशङ्कराचार्यपरमगुरुषु गौडपादेषु सम्भवति। अस्य च उत्तरगीताव्याख्यायाश्च प्रणेता कश्चिदपरो गौडपादः सम्भाव्यते।

मलधारि-राजशेखरसूरिणा (वि० सं० १३५०, ई० सं० १२९४) स्वकृतषड्दर्शनसमुच्चये माठरो गौडपादश्च साङ्ख्यग्रन्थकर्तारौ पृथगुक्तौ। तदनुसारी गुणरत्नसूरिरपि हरिभद्रीयषड्दर्शनसमुच्चयटीकायाम् (३।४३)–"साङ्ख्यानां तर्कग्रन्थाः षष्टितन्त्रोद्धाररूपं साङ्ख्यसप्ततिनामकं, माठरभाष्यं,.. गौडपादं च" इत्युक्त्या द्वयोः पृथक्त्वं सूचयति। अतो गौडपादीयं माठरवृत्त्या एव सङ्क्षेप इति भाति।

मूलकारिकासङ्ख्याविवेकः

माठरवृत्तौ व्याख्यातानां कारिकाणां सङ्ख्या ७२ परिमिता वर्तते। वाचस्पतिमिश्रकृतटीकायां नारायणतीर्थकृतटीकायां च अत्रस्था अन्तिमा आर्या नोपलभ्यते अतस्तयोरार्यासङ्ख्या ७२ मिता। गौडपादीयं तु ६९ आर्यां यावद्वर्तते। चीनभाषापरावर्तने तु ६३ तमी आर्या प्रभ्रष्टेति तत् ७१ आर्यासम्मितम्।

प्रकृते "सप्तत्यां किल येऽर्थाः।" (७२) इत्युक्तत्वात् आर्यासङ्ख्यायां चोक्तप्रकारेण न्यूनाधिक्यदर्शनेन तत्र पण्डितानां विवादः। तत्र केचन ६९ आर्याया ऊर्ध्वं स्थितमार्याचतुष्टयं प्रक्षिप्तं मन्यन्ते। मध्ये च कुत्रचिदेकाऽऽर्या प्रभ्रष्टेति च सप्ततिसङ्ख्यापूरणाय तर्कयन्ति। तत्र वस्तुतस्तु अन्तिममार्याचतुष्टयं न प्रक्षिप्तम्। तथाहि शेषप्रणीतपरमार्थसारापरनाम्नि आर्यापञ्चाशीतिरित्याख्ये प्रबन्धे ८७ आर्या

१. उपरिष्टादुक्तः 'यथा दर्पणाभाव' इत्यंशः।

वर्तन्ते। तथापि तत्र अवतरणरूपामाद्यामार्यां ग्रन्थकर्तृनामादिप्रकाशिकां चरमामार्यां विहाय वेदान्तसिद्धान्तस्तु तन्मध्यस्थे पञ्चाशीतिसङ्ख्याके आर्यासमूहे प्रतिपादित इति आर्यापञ्चाशीतिरित्याख्ययैव तस्य व्यवहारः। तथा अभिनवगुप्ताचार्यप्रणीते परमार्थसारे १०५ आर्या वर्तन्ते। तथापि आरम्भे आर्यात्रयमवतरणरूपमन्ते चार्याद्वयमुपसंहारात्मकम्, सिद्धान्तस्तु तन्मध्यस्थेन आर्याशतकेन निबद्ध इति तेनैव तत्र प्रकाशितम्। "आर्याशतेन तदिदं सङ्क्षिप्तसारमतिगूढम्। अभिनवगुप्तेन मया" (१०५) इत्यादि। एवमन्यत्रापि बहुषु शतकान्तनामसु लघुकाव्येषु वृत्तसङ्ख्यायाः शतकाधिक्यदर्शनेऽपि तेषां शतकमित्यनेनैव पदेन व्यवहारः। तत्र तत्र च प्रतिपाद्यं निर्दिष्टसङ्ख्याकैः पद्यैरेव प्रतिपादितम्। तथैव साङ्ख्यसप्ततिरिति अस्य संज्ञायामपि बोध्यम्। अतो नान्तिममार्याचतुष्टयं प्रक्षिप्तम्।

एवं प्रकृतेऽपि साङ्ख्यसप्ततिरिति ग्रन्थनाम्नाऽत्र सिद्धान्तप्रतिपादिकानामार्याणां सप्ततिरपेक्षिता। परन्तु स सर्वपुस्तकेषु ६९ आर्याभिरेवोक्तो लभ्यते। अतः तिलकोपाह्वो गङ्गाधरसूनुर्बालपण्डितः ६१ कारिकाया माठरवृत्तिं सूक्ष्मेक्षिकया विचार्य तद्गतः 'तत्र सुकुमारत्वं वर्णयति' (पृ० ७५ पं० ९) इत्यारभ्य 'सुकुमारतरम् इत्येतत् वाक्यशेषः कृतः।' (पृ० ७६ पं० १२-१३) इत्यन्तो वृत्तिभागोऽपरार्याविशेषस्य व्याख्यानमित्यवधार्य तस्मात्—

'कारणमीश्वरमेके पुरुषं कालं परे स्वभावं वा।
प्रजाः कथं निर्गुणतो, व्यक्तः कालः स्वभावश्च॥'

इत्यार्यां सङ्कलितवान्, तां च ६२ संख्यया अङ्कयित्वा सप्ततिसङ्ख्यापूरणं कृतवान्। इयमेतदर्थिका वा एका आर्या लेखकादिप्रमादेन मूलाद् भ्रष्टा इति तस्य मतम्।

इदमप्यत्र विचारणीयम् यद्वराहमिहिरकृतबृहत्संहिताया विवृतौ (अ० ९७) भट्टोत्पलकृतायां (वि० सं० १०२२, ई० सं० ९६६) २७ आर्यायाः

'सङ्कल्पकमत्र मनस्तच्चेन्द्रियमुभयथा समाख्यातम्।
अन्तस्त्रिकालविषयं तस्मादुभयप्रचारं तत्॥'

इति पाठो दृश्यते। अत्रोत्तरार्धस्य पाठः प्रचलितपाठाद्भिन्नः। तत इदमपि सन्देग्धुं शक्यं यन्मुद्रितोत्तरार्धमधिकृत्य तस्य पूर्वार्धं भ्रष्टम्। तेन सह 'गुणपरिणामविशेषात्' इत्याद्युत्तरार्धात्मिका आर्या २८ संख्याङ्किता स्यादिति। एवं भ्रष्टेकार्याविषयको निर्णयो विशेषान्वेषणाधीनः।

उपसंहारः

श्रीमहाभारते शान्तिपर्वणि मोक्षधर्मेषु कपिलासुरिपञ्चशिखानां मतानि लभ्यन्ते। तत्र तेषामभिप्रायाः साङ्ख्यसप्ततिप्रक्रियाया बहुष्वंशेषु भिन्ना अपूर्णाश्च। उपनिषद्वाक्यविशेषानुपजीव्य साङ्ख्ययोगदर्शनयोः पुरातनकाले प्रवृत्तिर्जाता। तत्र केवलं तत्त्वविवेचनमवलम्ब्य साङ्ख्यदर्शनं निरीश्वरवादे परिणतं, क्रियाविशेषात्मकं योगदर्शनं च सेश्वरवादे परिणतम्। साङ्ख्यदर्शनं योगदर्शनस्य शेष्यपि द्वे पुरा भिन्ने एव मते। प्रकृतिपुरुषयोः पृथक्करणं द्वयोरेव लक्ष्यमासीत्। ततः पुराकाले भगवद्गीतादिषु अर्वाचीने च विज्ञानभिक्षुवादिभिस्तयोः समन्वये प्रयतितम्। तत्र

साङ्ख्यं विचारप्रधानं, योगं च क्रियाप्रधानम्, द्वयोरङ्गाङ्गिभावश्च सम्बन्धः प्रतीयते । साङ्ख्यमतविकासादिचर्चाया विस्तरभियाऽत्रैव विरम्यते । इति ।

अस्यां वृत्तौ 'यथा पङ्केन पङ्काम्भः' इत्युदाहृतः श्लोकः (पृ० ८), श्रीमद्भागवते (१।८।५२) वर्तते, तथैव 'एष आतुरचित्तानां' (पृ० ६९) इत्यपि तत्रैव (श्रीमद्भागवते १।६।३५) किञ्चित्पाठभेदेन दृश्यते । अतोऽनुमीयते यत् श्रीमद्भागवतं माठरवृत्तिसमयात्पुरातनम् ॥ इति ।

विदुषामनुचरः—

त्रिपाठ्युपाह्वः श्रीमनःसुखरामात्मजः

तनुसुखरामशर्मा

सेयं वृत्तिः तत्त्वकौमुद्याद्यपेक्ष्य अन्ययैव सरण्या सरलतया वैशद्येन च कारिकार्थं साङ्ख्यीयविषयजातं च तथा प्रतिपादयति यथा साधारणजना अप्यनायासेन साङ्ख्यरहस्यान्यवबोद्धुं शक्नुवन्ति इत्यपूर्वाया अमुद्रितचराया अप्यस्या एकमेव पुस्तकं नातिशुद्धप्रायमुपरिस्थभूमिकाकर्तृमहाशयसकाशाल्लब्ध्वा श्रीविष्णुप्रसादविदुषा संशोध्य मुद्रणतां नीता ।

तदत्र सपरिश्रमं कृतशोधनेऽपि मानुष्यकनान्तरीयकानवधानजनितान् दोषान् मर्षयित्वा तितिक्षावद्भिर्गुणैकपक्षपातिभिः स्वकीया अपूर्वसाङ्ख्यग्रन्थदिदृक्षा सफलं विधास्यत इति—

अध्यक्ष—
चौखम्बा संस्कृत सीरीज
आफिस, वाराणसी—१

विद्वद्विधेयः
जयकृष्णदासगुप्तः

साङ्ख्यकारिकाया अकारादिक्रमेण सूची

		का.	पृ.
	अ		
१	अतिदूरात्सामीप्यात्	७	११
२	अत्र जरामरणकृतं	५५	५३
३	अध्यवसायो बुद्धिः	२३	२८
४	अन्तःकरणं त्रिविधं	३३	३६
५	अभिमानोऽहङ्कारः	२४	३०
६	अविवेक्यादिः सिद्धः	१४	१८
७	अष्टविकल्पो दैवः	५३	५२
८	असदकरणादुपादान	९	१२
	आ		
९	आध्यात्मिक्यश्चतस्रः	५०	४९
	इ		
१०	इत्येष प्रकृतिकृतः	५६	५३
	उ		
११	उभयात्मकमत्र मनः	२७	३२
	ऊ		
१२	ऊर्ध्वं सत्त्वविशालः	५४	५२
१३	ऊहः शब्दोऽध्ययनं	५१	५०
	ए		
१४	एकादशेन्द्रियवधाः	४९	४८
१५	एतत् पवित्रमग्र्यं	७०	६१
१६	एते प्रदीपकल्पाः	३६	३८
१७	एवं तत्त्वाभ्यासात्	६४	५८
१८	एष प्रत्ययसर्गः	४६	४६
	औ		
१९	औत्सुक्यनिवृत्त्यर्थं	५८	५४
	क		
२०	करणं त्रयोदशविधं	३२	३६
२१	कारणमस्त्यव्यक्तं	१६	२०
	च		
२२	चित्रं यथाऽऽश्रयमृते	४१	४३
	ज		
२३	जन्ममरणकरणानां	१८	२३

		का.	पृ.
	त		
२४	तन्मात्राण्यविशेषाः	३८	४०
२५	तस्माच्च विपर्यासात्	१९	२४
२६	तस्मात्तत्संयोगात्	२०	२५
२७	तस्मान्न बद्ध्यतेऽद्धा	६२	५७
२८	तस्मात्समादृष्टं	७३	६३
२९	तेन निवृत्तप्रसवां	६५	५८
३०	त्रिगुणमविवेकि विषयः	११	१४
	द		
३१	दुःखत्रयाभिघातात्	१	१
३२	दृष्टमनुमानमाप्त	४	८
३३	दृष्टवदानुश्रविकः	२	५
२४	दृष्टा मयेत्युपेक्षक	६६	५८
	ध		
३५	धर्मेण गमनमूर्ध्वं	४४	४५
	न		
३६	न विना भावैर्लिङ्गं	५२	५१
३७	नानाविधैरुपायैः	६०	५५
	प		
३८	पञ्च विपर्ययभेदाः	४७	४७
३९	पुरुषस्य दर्शनार्थं	२१	२६
४०	पुरुषार्थज्ञानमिदं	६९	६१
४१	पुरुषार्थहेतुकमिदं	४२	४३
४२	पूर्वोत्पन्नमसक्तं	४०	४२
४३	प्रकृतेर्महांस्ततोऽहङ्कारः	२२	२६
४४	प्रकृतेः सुकुमारतरं	६१	५५
४५	प्रतिविषयाध्यवसायो	५	९
४६	प्राप्ते शरीरभेदे	६८	६०
४७	प्रीत्यप्रीतिविषादा	१२	१५
	ब		
४८	बुद्धीन्द्रियाणि चक्षुः	२६	३१
४९	बुद्धीन्द्रियाणि तेषां	३४	३७
	भ		
५०	भेदस्तमसोऽष्टविधः	४८	४७
५१	भेदानां परिमाणात्	१५	१९

		का.	पृ.
	म		
५२	मूलप्रकृतिरविकृतिः	३	७
	य		
५३	युगपच्चतुष्टयस्य हि	३०	३५
	र		
५४	रङ्गस्य दर्शयित्वा	५९	५४
५५	रूपादिषु पञ्चानां	२८	३३
५६	रूपैः सप्तभिरेवं	६३	५७
	व		
५७	वत्सविवृद्धिनिमित्तं	५७	५४
५८	वैराग्यात्प्रकृतिलयः	४५	४६
	श		
५९	शिष्यपरम्परयाऽऽगतं	७१	६२
	स		
६०	सङ्घातपरार्थत्वात्	१७	२२
६१	सत्त्वं लघु प्रकाशकं	१३	१७
६२	सप्तत्यां किल येऽर्थाः	७२	६२
६३	सम्यग्ज्ञानाधिगमात्	६७	५९
६४	सर्वं प्रत्युपभोगं	३७	३८
६५	सात्त्विक एकादशकः	२५	३१
६६	सांसिद्धिकाश्च भावाः	४३	४४
६७	सान्तःकरणा बुद्धिः	३५	३८
६८	सामान्यतस्तु दृष्टात्	६	१०
६९	सूक्ष्मा मातापितृजाः	३९	४१
७०	सौक्ष्म्यात्तदनुपलब्धिः	८	११
७१	स्वां स्वां प्रतिपद्यन्ते	३१	३५
७२	स्वालक्षण्या वृत्तिः	२९	३३
	ह		
७३	हेतुमदनित्यमव्यापि	१०	१३

माठरवृत्तौ प्रमाणत्वेन समुद्धृतानां वाक्यादीनां

वर्णानुक्रमणी[1]

प्रतीकम्	पृष्ठम्
अज्ञो जन्तुरनीशोऽयं	५५
अनाश्रितः कर्मफलं	२९
अप्यक्षरवर्णं०	२७
अभक्ष्यपरिहारस्तु	२९
अर्के चेन्मधु[2]	३
अवश्यमेव भोक्तव्यं	६०
अस्तित्वमेकत्वम०	६३
अहङ्कारो धियं ब्रूते	३९
अहिंसा प्रतिष्ठायां	२९
अहिंसासत्यास्तेय	१८
आगमो ह्याप्तवचनं	१०
इहोपपत्तिर्मम केन	२
उत्पत्तिं प्रलयं चैव	२८
एतावानेव पुरुषो	२१
एष आतुरचित्तानां	५१
कालः सृजति भूतानि	५६
दक्षिणेन तु विन्ध्यस्य	८
देहे मोहाश्रये भग्ने	४२
धारणार्थो धृञित्येष	२८
नहि हस्तावसृग्दिग्धौ	६
नाभुक्तं क्षीयते कर्म	६०
नासतो विद्यते भावो	२०
पञ्चविंशतितत्त्वज्ञो[3]	२८
पुनर्दाहः समुत्पन्नः	४
पुष्पिताक्षः शलाकी च	४

---

१. अत्र श्रुतिवाक्यानि न सङ्गृहीतानि।

२. शावरभाष्ये (१।२।४)

३. अयं श्लोकः "तथा चोक्तं पञ्चशिखेन प्रमाणवाक्यं" इत्युल्लेखपूर्वमुद्धृतस्तत्त्वयाथार्थ्यदीपने, हरिभद्रसूरिणा (वि० सं० ७८१, ई० सं० ७२५) च शास्त्रवार्तासमुच्चये।

प्रतीकम्	पृष्ठम्
ब्रह्मार्पणं ब्रह्महविः	२९
मयि तिष्ठत्यहङ्कारे	३९
मशकोदुम्बरेषीका०	२१
यथा दर्पणाभाव आभास[1]०	४२
यथा पङ्केन पङ्काम्भः	६
यथैधांसि समिद्धोऽग्निः	६०
यानि कानि च मूलानि[2]	४
येन शुक्लीकृता हंसाः	५६
योऽसौ सर्वेश्वरो देवः	३९
रजसो मिथुनं सत्त्वं[3]	१६
वितर्कबाधने	२९
वितर्का हिंसादयः	६०
विषया विनिवर्तन्ते	२९
वृक्षान् छित्त्वा पशून् हत्वा	६
वैद्य वैद्य नमस्तुभ्यं[4]	४
शौचसन्तोषतपः	३८
षट् [5]शतानि नियुज्यन्ते	६
सोमवृष्ट्यन्नरेतांसि	४१
स्थान्युपनिमन्त्रणे	३०
स्वकर्मण्यभियुक्तो यः	१०
हस पिब लल मोद नित्यं[6]	४०

१. हस्तामलकस्तोत्रे।

२. 'यस्य कस्य तरोर्मूलं' इत्यादिः पाठः प्रसिद्धः।

३. 'आगमः' अयमिति द्वादशकारिकाटीकायां वाचस्पतिमिश्रः (वि० सं० १०२२ ई० सं० ९७६)। देवीभागवतेऽस्योपलब्धिस्तु यथास्थानं दर्शिता।

४. 'वैद्यराज नमस्तुभ्यं' इति पाठः प्रसिद्धः।

५. यजुर्वेदसंहितायाः २४ अध्यायेऽन्तिममन्त्रस्य महीधरभाष्ये अस्योत्तरार्धे 'अश्वमेधस्य यज्ञस्य नवभिश्चाधिकानि च' इति पाठभेद उपलभ्यते।

६. अयं गुणरत्नसूरिणा षड्दर्शनसमुच्चयटीकायां (३।३३) "तदुक्तं माठरप्रान्ते (भाष्ये ?) 'हस पिब लल खाद मोद नित्यं, भुङ्क्ष्व च भोगान्यथाभिकामम्। यदि विदितं कापिलमतं तत्प्राप्स्यसि मोक्षमचिरेण।'" इति पाठभेदेन समुद्धृतम्।

॥ श्रीः ॥

साङ्ख्यकारिका

माठरवृत्तिसहिता

सर्वविद्याविधातारमादित्यस्थं सनातनम्।
नतोऽस्मि परया भक्त्या कापिलं ज्योतिरीश्वरम् ॥ १ ॥
कपिलाय नमस्तस्मै येनाविद्योदधौ जगति मग्ने।
कारुण्यात्साङ्ख्यमयी नौरिह विहिता प्रतरणाय ॥ २ ॥
नमस्कृत्य तु तं तस्य वक्ष्ये ज्ञानस्य कारणम्।
हिताय सर्वशिष्याणामल्पग्रन्थसमुच्चयम् ॥ ३ ॥

दुःखत्रयाभिघाताज्जिज्ञासा तदभिघातके[1] हेतौ।
दृष्टे साऽपार्था चेन्नैकान्तात्यन्ततोऽभावात् ॥ १ ॥

अस्या आर्याया उपोद्घातः क्रियते—

स्थानं निमित्तं वक्ता च श्रोता श्रोतृप्रयोजनम्।
सम्बन्धाद्यभिधानं च उपोद्घातः स उच्यते ॥

इह हि भगवान्महर्षिः सांसिद्धिकधर्मज्ञानवैराग्यैश्वर्यसम्पन्नो भगवतः पुराणपुरुषस्यावतारो जगदनुजिघृक्षया प्रजापतेः कर्दमस्य पुत्रः स्वायम्भुवस्य मनोर्दुहितरि देवहूत्यां कपिलो नाम बभूव। स तेन गुणपुरुषान्तरोपलब्धिरूपेण ज्ञानेनापारपारं दिदर्शिषयो हस्तावलम्बेनेव, कालाहिदन्दश्यमानजगतः सुधामणिनेव, दुश्चिकित्स्यस्य भवव्याधेरपनयनाय सम्यगौषधेनेव, अविद्यान्धकारप्रध्वंसनप्रदीपेनेव, मुक्तिमार्गविरोधिमोहवृक्षविव्रश्चनकुठारेणेवामुनावबोधेन सम्पन्नोऽन्धे तमसि मज्जज्जगदिदमद्राक्षीत्। तदवलोक्यास्य कारुण्यमुदपादि। अहो खल्विदं जगदनादिकालसम्बद्धं निसर्गादेव अन्धे तमसि वर्तत इति।

अथासौ महायोगी कथमस्य वराकस्य अन्धे तमसि वर्तमानस्य विश्वस्यानुग्रहः कार्य इति समुत्पन्नकारुण्यो मनसि चिन्तामापेदे। स

१. 'तदपघातके' इति गौडपादवाचस्पत्योः सम्मतः पाठः।

एवं विचिन्तयन् आसुरिसगोत्रं ब्राह्मणविशेषं वर्षसहस्रयाजिनमधिकारिणमवगत्य ब्रह्मोपदेशविधया अतन्द्रितो भूत्वा वाचमित्यु[1]वाच—'भो भो आसुरे३ रमसे गृहस्थधर्मेण' इति। स तमुवाच—'रमे भो' इति। स एवमुक्तो मुनिरीषदनिष्पन्नविवेकवैराग्योऽयमिति व्यवस्य निर्गम्य भूयोऽपि द्वितीये वर्षसहस्रे पूर्णे प्रत्यागत्य तथैवाभ्युवाच—'भो भो आसुरे३ रमसे गृहस्थधर्मेण' इति। स तमुवाच—'रमे भो' इति। अथासौ महायोगीन्द्रस्तथैव निर्गम्य तृतीये वर्षसहस्रे सम्पूर्णे अभ्येत्योवाच—'भो भो आसुरे३ रमसे गृहस्थधर्मेण इति। स तमुवाच—'न रमे भो' इति। अथ स भगवता उक्तः—कथमिति। पुनराह आसुरिः—'दुःखत्रयाभिघातात्' इति। अथाह कपिलः—तात उत्सहसे ब्रह्मचर्यवासं वस्तुं यदि तदामीषां दुःखत्रयाणां प्रतीकारं वयमुपदेक्ष्यामः। सोऽब्रवीत्—'भगवन् बाढं शक्तोऽहं भगवतामादेशमनुगन्तुम्' इति। स एवं गृहस्थधर्ममपहाय पुत्रदारादिकं च, प्रव्रजितो भगवतः किल कपिलाचार्यस्य योगिनः प्राणाः (?), शिष्यो बभूव।

तत्र यदि कश्चिदेवं ब्रूयात्—कुतोऽस्य जिज्ञासा समुत्पन्ना ययाऽसौ गुरुकुलमभिगत इति। तत्रायं प्रतिवादः। दुःखत्रयाभिघाताज्जिज्ञासा समुत्पन्ना। किमिह परं, किं याथात्म्यं, किं निःश्रेयसं, किं कृत्वा कृतार्थः स्यामिति मत्वाऽसौ गुरुकुलमभिगत इति। तथा हि—

'तत्तपः स जपः सा धीस्तज्ज्ञानं सा च वैदुषी।
यतो नैव निपातः स्यादन्तःसंसारसागरम्॥' इति श्रवणात्।

किञ्च—

इहोपपत्तिर्मम केन कर्मणा क्व च प्रयातव्यमितो भवादिति।
विचारणा यस्य न जायते क्षितौ कथं स धर्मप्रवणो भविष्यति॥

तस्मात्समीचीनमिदं यदस्येतिजिज्ञासा समुदपादि।

किं पुनस्तद्दुःखत्रयं, तदाह—आध्यात्मिकम्, आधिभौतिकम्, आधिदैविकम्। तत्र प्रथमं द्विविधं, शारीरं मानसं च। तत्र शारीरं वातपित्तश्लेष्मणां देहधातूनां वैषम्याद् यद् दुःखमात्मानं देहमधिकृत्य ज्वरातीसारादि प्रवर्तते। मानसं प्रियवियोगादप्रियसंयोगाच्च द्विविधम्। एतदाध्यात्मिकं दुःखमभिहितम्। आधिभौतिकं तु भूतान्यधिकृत्य यत्प्रवर्तते मानुषपशुपक्षिसरीसृपस्थावरनिमित्तम्। आधिदैविकं तु दिवमधिकृत्य यत्प्रवर्तते शीतोष्णवातवर्षादिकम्। एवमेतैस्त्रिभिर्दुःखैरभिहतस्यासुरिसगोत्रस्य ब्राह्मणस्य जिज्ञासा समुत्पन्ना। क्व विषये?

१. 'मित्थमु' इति पाठस्समीचीनः प्रतिभाति।

तदभिघातके हेतौ। तेषां त्रयाणां दुःखानामभिघातको विनाशको योऽसौ हेतुस्तत्र। तां जिज्ञासामाह। किममूनि दुःखानि वपुषः, आहोस्वित्तद्व्यतिरिक्तोऽस्ति कश्चिदन्यः पुरुषो यस्येमानि त्रीणि दुःखानि जायन्ते, उतामीषां प्रतीकारोपायोऽप्यस्ति न वा। यद्यस्ति तदानीं तमेवास्थास्यामः। नो चेत् प्रथमप्रावृडासारं षण्ढ[?] इवामूनि निमीलितनेत्रा वयं सोढारः। वृश्चिकादिदष्ट एव विषप्रतीकाराय जाङ्गुलिकं गवेषयति नो वा विषभवपीडामहः। एवमसह्यदुःखाभिभूतस्यासुरेस्तदभिघातके हेतौ जिज्ञासा समुत्पन्ना। स च समुत्पन्नदुःखाभावं जिज्ञासुस्तत्प्रतीकारकुशलं भगवन्तं कपिलाचार्यं शरणमभ्युपगतः, अयं मदभिलषितदुःखप्रतीकारोपायं वक्ष्यतीति।

ननु दुःखेभ्य एव जिज्ञासा समुत्पन्ना कथं तेषामेवाभावाय कारणत्वमुपयाति। न हि जनयित्रीसकाशादुत्पन्नस्तनयस्तस्या एव व्यापादनं कुरुते। सत्यम्। इह लोके यद्यस्मादुत्पद्यते तत्तस्यापि विपत्तिकारणं दृश्यते। यथा कर्कटकोऽश्वतरो वा जनयित्र्याः समुत्पन्नस्तामेव व्यापादयति। यद्वा यथा कश्चिदाशीविषः शुष्कतृणबहुलप्रदेशे स्थितः प्रतिसर्पं दृष्ट्वा क्रुद्धस्तस्य मुखनिःश्वासनिर्गतो वह्निस्तृणानि तं वाऽपि सर्पं ददाह। अमुना न्यायेन दुःखेभ्य एव जिज्ञासा निष्पन्ना दुःखानामेवाभावं करिष्यतीत्यर्थसङ्गतिः।

अत्रोच्यते। दृष्टे साऽपार्था चेत्। चेदित्ययं निपातः शङ्कायां वर्तते। इह लोके सकलसमुत्पन्नदुःखानां प्रतीकारोऽस्त्येव, किं तदर्थं कपिलोपसर्पणेनेति भावः। तमेव हेतुं दृष्टं दर्शयति। शारीराध्यात्मिकानां ज्वरातीसारादिसकलव्याधीनां सन्त्येवागदङ्कारा अष्टाङ्गायुर्वेदविदो भिषजः कायशल्यशलाकाविषोन्मादक्लीबजराकुमारचिकित्सानिपुणाः। मानसस्याध्यात्मिकतापस्य प्रतीकारः प्रियवस्तुसंयोगादप्रियस्य दूरतः परिहरणाच्च। आधिभौतिकस्य तु ग्रामनगरादिकल्पनया प्रहाणोपपत्तिः। आधिदैविकस्याभिवातयातप्रावरणावरणादिभिः। अतस्तदभिघातकारणात् किं कपिलोपसर्पणेनेति भावः। तथा च लौकिकानामाभाणकः—

अर्के चेन्मधु विन्देत किमर्थं पर्वतं व्रजेत्।
इष्टस्य लीलया सिद्धौ को विद्वान् यत्नमाश्रयेत्॥

अत्रोच्यते—न। न इत्ययं पूर्वपक्षवाक्यनिषेधे। नैवं वाक्यमित्यर्थः। एकान्तात्यन्ततोऽभावात्। एकान्ततोऽवश्यं त्वदुक्तहेतुभिर्न प्रतीकारः। यतश्चिकित्सकानां सुप्रयुक्तागदानां यथाशक्ति यततामपि कदाचिज्जन्तु-

विपद्यते कदाचिज्जीवति। वैद्यगृहेऽपि वधूपुत्रकलत्रभ्रातृपितृप्रभृतीनामपरिहार्यमरणदर्शनान्नायमैकान्तिकप्रतीकार आध्यात्मिकस्य। अपरम्, अत्यन्ततोऽपि नासौ प्रतीकारः। अगदेन नीरुजीकृतानामपि ज्वरादीनां पुनः कतिपयदिवसैरुत्पत्तिदर्शनात्। अतः सर्वथा आत्यन्तिकोऽपि न दृष्टः प्रतीकार आध्यात्मिकदुःखापनयने समर्थः। वसन्तादीनामपगतानामपि पुनरागमनवत्। भवन्ति चात्र श्लोकाः—

पुनर्दाहः समुत्पन्नः पुनर्जातश्च वेपथुः।
बाधते च पुनर्हिक्का ज्वरश्च पुनरागतः॥

अन्यच्च—

पुष्पिताक्षः शलाकी च कुष्ठी कायचिकित्सकः।
पृच्छन्ति बालभिषजं कथं ते दारका मृताः॥

किञ्च नास्ति सम्यग्धातुपरिज्ञाननिपुणतया भैषज्यम्। तथा हि—

यानि कानि च मूलानि येन केन च पेषयेत्।
यस्मै कस्मै च दातव्यं यद्वा तद्वा भविष्यति॥

अन्यच्च—कार्यार्थिजनद्रव्यभक्षणाय, स्वशक्तिख्यापनाय च स्वल्पमपि रोगं पुरस्ताद्वर्धयन्ति भिषजः। ततश्च कदाचिदसौ तेषामेवासाध्यतामायाति। तथा च—

वैद्य वैद्य नमस्तुभ्यं क्षपिताशेषमानव।
त्वयि विन्यस्तभारोऽयं कृतान्तः सुखमेधते॥

एवमसौ दृष्टेनागदादिहेतुना, एकान्ततोऽवश्यम्, अत्यन्ततः सर्वथा, शारीरस्याध्यात्मिकदुःखस्य न प्रतीकारः। एवं मानसस्यापि शब्दादिप्रियसंयोगादपि कदाचिन्न निवृत्तिः। एवमाधिभौतिकमप्युपायैः कदाचिद् व्यपैति, कदाचिन्न नेति। एवमाधिदैविकमपि कदाचिद्व्यपैति कदाचिच्च न। किञ्च व्यपगतिरपि दुःखस्य पुनरुत्पादादनर्थिकेति। अस्य तु शिष्यस्यैकान्तिक आत्यन्तिकश्च दुःखव्यपगमे हेतुरिष्टः। तस्माद्युक्तं तदर्थं गुरूपसर्पणमिति॥ १॥

यद्येवं तदा दृष्टव्यतिरेकेणाप्यानुश्रविकः श्रुतिप्रणीतः स्वर्गादिसाधनरूपो यज्ञादिर्हेतुरस्तु। नाकपृष्ठेऽपि तापत्रयासम्भवात्। तत्रैकान्तिकमात्यन्तिकं वानुश्रवे वेदे श्रूयते। गुरुणोक्तं पश्चाद्वेदं शृण्वन्ति शिष्या इत्यनुश्रवो वेदः। तत्र भव आनुश्रविकः। श्रौतो यज्ञादिरूपोऽयं दुःखत्रयप्रतीकारहेतुरुचितोऽस्ति। एवं ह्याह—'तरति मृत्युं, तरति शोकं, तरति पाप्मानं, तरति ब्रह्महत्यां योऽश्वमेधेन यजते' [श०ब्रा० १३।३।१।१] इति। यच्चैनं देवाः पुनरप्याहुः—

'अपाम सोमममृता अभूमागन्म ज्योतिरविदाम देवान्।
किं नूनमस्मान् कृणवदरातिः किमु धूर्तिरमृत मर्त्यस्य'॥
[ऋ० सं० ८।४८।३] इति।

इह-श्रुतावैकान्तिकमात्यन्तिकं च फलं श्रूयते। अत्रास्य व्याख्या—

कदाचित् किलेन्द्रो देवानुपस्थितान्निशम्य इत्यवोचत्—भो भो देवत्वादन्यदपि किमप्यस्ति सुखम्। ततस्ते देवा ऊचुः—नास्त्यन्यत्सुखम्। अत एवास्मन्निवासस्य नाक इत्यभिधानम्। कमिति सुखनाम, तस्य निषेधः अकम् असुखं तन्न इति नाकम्। केवलं सुखमेव। द्वौ नञौ प्रकृतमर्थं गमयतः। ततः प्राहेन्द्रः—कथमिति। ततस्ते ऊचुः—अनेन हेतुना अपाम पीतवन्तः। सोमं यज्ञे सोमरसं, तेन तत्पानेन अमृता अमरा अभूम सम्पन्नाः। किं च अगन्म प्राप्तवन्तः ज्योतिः स्वर्गम्। अन्यच्च अविदाम जानीमो देवान्। अस्मिन् स्वर्गे इयन्तो देवा इति विद्मः। किमित्याक्षेपे। नूनं निश्चितम्। अस्मान् अस्माकं विभक्तिविपरिणामः। कृणवत् कर्ता। अरातिः शत्रुर्मृत्युः। किं वा धूर्तिर्जरा अस्माकं करिष्यति। अमृतमर्त्यस्य अमृतपायिनां मर्त्यानाम् इति। 'बहुलं छन्दसी'ति वचनविपरिणामः। एवमन्योऽपि यः सोमं पास्यति तस्यैकान्तिकोऽवश्यमात्यन्तिकः सर्वथा दुःखत्रयाभिघातो भविष्यति। अतो ब्रूमः किं प्रव्रज्यया साङ्ख्यज्ञानेन वा कार्यं वेदोक्तं करिष्यामः। दुःखप्रतीकारश्च स्वर्गो भावीति वेदवादिनां वचनमुपश्रुत्य साङ्ख्याचार्यस्तन्निवारणाय स्वमतप्रतिष्ठायै च द्वितीयामार्यामाह—

दृष्टवदानुश्रविकः स ह्यविशुद्धः [1]क्षयातिशययुक्तः।
तद्विपरीतः श्रेयान् व्यक्ताव्यक्तज्ञविज्ञानात्॥ २॥

य एष आनुश्रविकः श्रौतोऽग्निहोत्रादिकः स्वर्गसाधनतया तापत्रयप्रतीकारहेतुरुक्तः, सोऽपि दृष्टवदनैकान्तिकः प्रतीकारः। तथा हि—"मध्यमपिण्डं पुत्रकामा पत्नी प्राश्नीयात् 'आधत्त पितरो गर्भम्' (वा० सं० २।३३) इति मन्त्रेण" [आ०श्रौ० २।७।१४]। तदेवं वेदवचसा बहून् पिण्डान् परःशतानश्नाति यावदेकोऽपि पुत्रो न जायते। तथा "पश्येम शरदः शतं जीवेम शरदः शतम्" [ऋ० सं० ७।६६।१६] इति श्रुतावास्ते। परं गर्भस्थो जातमात्रो बालो युवापि कुमारो म्रियते। किं चान्यत्—स श्रौतो हेतुः अविशुद्धः पशुहिंसात्मकत्वात्। क्षययुक्तः पुनः पातात्। अतिशययुक्तः तत्रापि स्वामिभृत्यभावश्रवणात्। उक्तं च—

१. 'ह्यविशुद्धिक्षया०' इति गौ० वा०।

"षट्शतानि नियुज्यन्ते पशूनां मध्यमेऽहनि ।
अश्वमेधस्य वचनादूनानि पशुभिस्त्रिभिः ॥"

पशुवधोऽग्निष्टोमे मानुषवधः गोसवव्यवस्था सौत्रामण्यां सुरापानं रण्डया सह स्वेच्छालापश्च ऋत्विजाम् । कल्पसूत्रेऽन्यदप्यथकृत्यं भूरि कर्तव्यतयोपदिश्यते । 'ब्रह्मणे ब्राह्मणमालभेत क्षत्राय राजन्यं मरुद्भ्यो वैश्यं तपसे तस्करं नारकाय वीरहणम्' [तै० ब्रा० ३।४।११, आप० श्रौ० २०।२४।८] इत्यादिश्रवणात् ।

किञ्च—

'यथा पङ्केन पङ्काम्भः सुरया वा सुराकृतम् ।
भूतहत्यां तथैवेमां [1]न यज्ञैर्मार्ष्टुमर्हति ॥' [भागवतम् , १।८।५२]
न हि हस्तावसृग्दिग्धौ रुधिरेणैव शुद्ध्यतः ।'

'तद्यथाऽस्मिन् लोके मनुष्याः पशूनश्नन्ति तथाभिभुञ्जत एवममुष्मिन् लोके पशवो मनुष्यानश्नन्ति' [शा० ब्रा० ११।२] इति श्रुतिश्रवणात् । अन्यच्च—

'वृक्षान् छित्वा पशून् हत्वा कृत्वा रुधिरकर्दमम् ।
यज्ञैश्चेद्गम्यते स्वर्गो नरकः केन गम्यते ॥'

इत्यविशुद्धियुक्तः सर्वथा श्रौतो दुःखत्रयप्रतीकारहेतुः। अथ 'अपाम सोमममृता अभूम' इति प्रागुक्तम् । तत्रेदं प्रत्युत्तरम् । सोमपायिनामपि नृगनहुषेन्द्रययातीनां बेधबन्धपरिक्लेशा बहुविधाः । कर्मण उपभोगादितरेषां पतनं च । एकाहादीनां सत्राणां दिनपरिमाणवतां कारणानां परिमाणवदेव स्वर्गादि कार्यं दृष्टम् । कारणानुगमत्वात्कार्यस्य । परिमाणवन्मृत्पिण्डात्परिमाणवानेव घटः स्यात् । एवमानुश्रविकाणां फलपरिमाणत्वात् पुनः क्षयः । अतिशययुक्तश्च । यथा आढ्यमवलोक्य दरिद्रस्य दुःखं स्यात् , सुरूपं च वीक्ष्य कुरूपस्य, प्राज्ञं दृष्ट्वा मूर्खस्य, तथा शताप्सरसं स्वर्गिणं दृष्ट्वा पञ्चाप्सरसस्तं दृष्ट्वैकाप्सरसो दुःखमुत्पद्यते । एवमयं दृष्टवत् । तदेवमन्योन्यातिशयात् स्वर्गेऽपि दुःखमव्यावृत्तम् । तस्मात् । तद्विपरीतः श्रेयान् । ताभ्यां दृष्टानुश्रविकाभ्यां हेतुभ्यां विपरीतो विसदृश ऐकान्तिक आत्यन्तिको विशुद्धोऽक्षयोऽनन्तफलः कैवल्यान्निरतिशयो हेतुः स श्रेयान् प्रशस्यः । कथं पुनरसौ भवतीत्याह—व्यक्ताव्यक्तज्ञविज्ञानात् । व्यक्तं चाव्यक्तं च ज्ञश्च तेषां

१. श्रीमद्भागवते तु 'तथैवैकाम्' इति पाठो दृश्यते ।

त्रयाणां विज्ञानादनुभवात् । भवति ह्यसौ अवश्यं फलदानादैकान्तिकः, प्रकृतिज्ञानादात्यन्तिकः, यमनियमादिमत्त्वाच् शुद्धः, शरीरभेदे पुनरनावेश्यत्वादक्षयफलः । कैवल्यादनुत्तरत्वाच्च निरतिशयफलमिति वाक्यशेषः । तत्र व्यक्तं बुद्ध्यहङ्कारेन्द्रियतन्मात्रभूतभेदात्त्रयोविंशतिकम् । अव्यक्तं प्रधानम् । व्यक्तोत्पत्तिकारणम् । न ह्यकारणं कार्यमित्यस्य सिद्धिः । ज्ञः पुरुषः । सन्निधिसत्तामात्रेण चुम्बक इव लोहस्य प्रवृत्तिकारणम् । अतः प्रधानस्य जडस्य प्रवृत्तिहेतुरयमस्तीति सिद्धिः । एतानि पञ्चविंशतितत्त्वानि व्यक्ताव्यक्तज्ञसंज्ञानि । यद्विज्ञानादवश्यं सर्वथा तापत्रयेण विमुच्यते ॥ २ ॥

नन्वमीषां कतिधा प्रविभाग इत्यत्रोच्यते चतुर्धा । कथमिति चेत्तदुच्यते—

मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त ।
षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः ॥ ३ ॥

मूलप्रकृतिः प्रधानं मूलभूतत्वात् । मूलं सप्तानां प्रकृतिविकृतीनामादिरित्यर्थः । प्रकरणात्प्रकृतिः । प्रसवधर्मकत्वात् सा प्रकृतिः । न विकृतिरविकृतिरन्यस्मादनुत्पत्तेः । कारणमेव सा न कार्यमित्यर्थः । अनुत्पन्नत्वादुत्पादकत्वाच्च । महदाद्यास्तु सप्त प्रकृतयो विकृतयश्च । महानहङ्कारः पञ्चतन्मात्राणि चेति सप्त प्रकृतयोऽन्येषां कारणतया, विकृतयश्च कार्यतया स्वयम् । तत्र व्यक्तिमाह—प्रधानाद् बुद्धिरिति विकृतिः, सा च अहङ्कारं जनयतीति प्रकृतिः । अहङ्कारो महत उत्पन्न इति विकृतिः, तन्मात्राणि जनयतीति प्रकृतिः । तन्मात्राण्यहङ्कारादुत्पन्नानीति विकृतयः पञ्चापि, ततः पञ्च महाभूतानि जायन्त इति प्रकृतयः । उत्पन्नत्वादुत्पादकत्वाच्च सप्तेमाः प्रकृतयो विकृतयश्च । तन्मात्राणि शब्दस्पर्शरूपरसगन्धाख्यानि । षोडशकस्तु पुनर्विकार एव कार्यत्वात् । न तु तस्य प्रकृतित्वमकारणत्वात् । तद्व्यक्तिमाह—वैकृतिकादहङ्कारादुत्पन्नान्येकादशेन्द्रियाणि तन्मात्रेभ्यः पञ्चमहाभूतानीति षोडशकोऽयं गणो विकारोऽन्यस्मादुत्पन्नो न हि ततोऽन्यदुत्पद्यत इत्यर्थः । उत्पन्नत्वादनुत्पादकत्वाच्च । पुरुषस्तु पुनर्न प्रकृतिरनुत्पादकत्वात् न च विकृतिरनुत्पन्नत्वात् । नैवासौ कारणं न च कार्यमित्यर्थः । एवमेष प्रकृतिः, प्रकृतिविकृतिः, विकृतिः, न प्रकृतिर्न च विकृतिरितिभेदाच्चतुर्धा प्रकृतिविकृतिविभागोऽभिहितः ॥ ३ ॥

एषां व्यक्ताव्यक्तज्ञानां प्रमेयाणां साधनाय प्रमाणान्याह । प्रमाणप्रमेयप्रमातृप्रमितिक्रमेण हि सकलस्य सिद्धिर्दृष्टा ।

दृष्टमनुमानमाप्तवचनं च सर्वप्रमाणसिद्धत्वात् ।

त्रिविधं प्रमाणमिष्टं प्रमेयसिद्धिः प्रमाणाद्धि ॥४॥

दृष्टमिति प्रत्यक्षपर्यायः । अक्षमिन्द्रियं प्रतीत्य यदुत्पद्यते ज्ञानं तत् प्रत्यक्षं दृष्टमुच्यते । यथा श्रोत्रादीनां शब्दादयः पञ्चेन्द्रियार्थाः पञ्चानां दृष्टं प्रमाणम् । प्रथममिदं मुख्यं सकलप्रमाणानाम् । योऽर्थोऽमुना दृष्टेन साधयितुं न पार्यते तत्रानुमानस्यावकाशः । तच्च त्रिसाधनं पञ्चसाधनं वा । त्र्यवयवं पञ्चावयवमित्यपरे । तच्च त्रयस्त्रिंशदाभासरहितं प्रत्यक्षाभावे प्रतन्यतेऽनुमानम् । कमपि हेतुमन्वीक्ष्य तस्य हेतोः पश्चान्मीयत इत्यनुमानम् । यथा धूमं हेतुमन्वीक्ष्य महानस इव पूर्वं वह्निदर्शनादग्नेरस्तित्वं साध्यत इत्यनुमानम् । प्रत्यक्षानुमानाभ्यां योऽर्थः साधयितुं न शक्यस्तत्राप्तवचनम् । यथा स्वर्गेऽप्सरसः सन्ति, नन्दनं वनं, तत्र विशेषाः शब्दादयो विषयाः, विमानेऽधिवास इति । आप्ता रागद्वेषादिरहिता ब्रह्मसनत्कुमारादयः, श्रुतिर्वेदः, ताभ्यां उपदिष्टं तथेतिश्रद्धेयमाप्तवचनम् ।

नन्वर्थापत्तिः सम्भवोऽभावः प्रतिभा ऐतिह्यमुपमानं चेतिप्रभृतीनि सन्ति बहूनि प्रमाणान्तराणि कथमत्र त्रिविधं प्रमाणमिति सङ्गतिः । अत्रोच्यते—सर्वप्रमाणसिद्धत्वात् । सर्वाणि हि प्रमाणानि प्रमाणत्रयेऽविरुद्धानि । तत्र पीनो देवदत्तो दिवा न भुङ्क्त इत्युक्ते रात्रौ भुङ्क्त इत्यर्थः । साऽर्थापत्तिरनुमानमेव । प्रस्थ इत्युक्ते चत्वारः कुडवा इति बोधः सम्भवः । सोऽप्यनुमानमेव । अभावश्च प्रागितरेतरप्रध्वंसात्यन्ताभावभेदाच्चतुर्धा । यथा व्रीहिशोषणदर्शनान्न वृष्टो देव इति वृष्टेरभावं साधयति । सोऽप्यनुमानभेदः । प्रतिभा यथा—

दक्षिणेन तु विन्ध्यस्य सह्यस्य तु यदुत्तरम् ।
पृथिव्यामासमुद्रायां स प्रदेशो मनोरमः ॥

इत्युक्ते तत्र शोभना गुणाः सन्तीति प्रतिभोत्पद्यते । प्रतिभा जानतां ज्ञानम् । साऽप्यनुमानमेव । ऐतिह्यं यथा—अस्मिन् वटे यक्षिणी प्रतिवसति इति जना वदन्ति इत्युक्ते, सा विघ्नं करोति, धनादि यच्छतीति ज्ञानं, तदप्यनुमानमेव । उपमानम्—यथा गौस्तथा गवय इत्य-

प्यनुमानमेव । किं च [1]तृषितस्याञ्जलिना, क्षुधितस्य पञ्चाङ्गुलियागात्, पृथुलाक्षिप्रभृतिदर्शनात् दुर्बलस्य, तर्जनीपङ्कदर्शनात् ? ज्ञानमित्याद्यनुमानमेव । तस्मात्त्रिष्वेवान्यदन्तर्भवतीति युक्तमभिहितं त्रिविधं प्रमाणम् । इष्टमिति अभिप्रेतमित्यर्थः । तेन प्रमाणेन किं साध्यमित्याह— प्रमेयसिद्धिः प्रमाणाद्धि । यस्मात्प्रमेयं सकलं प्रमाणेन प्रमीयते यथा तुलया चन्दनादि, कर्षादिना घृतादि, प्रस्थादिना वा व्रीह्यादीत्यादिवत् । प्रत्यक्षानुमानागमाः प्रमाणानि । प्रमेया व्यक्ताव्यक्तज्ञाः । प्रमाता आत्मा । तत्र त्रयोविंशतिकं व्यक्तम् । अव्यक्तं प्रधानम् । ज्ञः क्षेत्रज्ञः । तदमीषां मध्ये 'किञ्चित्प्रत्यक्षेणान्यदनुमानेनेतरदाप्तानुमानाभ्यां प्रमीयते । तस्मादाचार्येण भगवता युक्तमभिहितम्—'प्रमेयसिद्धिः प्रामाणाद्धि' इति ॥ ४ ॥

तत्र त्रिविधस्य प्रमाणस्य पृथक् लक्षणमुपन्यस्यते ।

प्रतिविषयाध्यवसायो दृष्टं त्रिविधमनुमानमाख्यातम् ।

तल्लिङ्गलिङ्गिपूर्वकमाप्तश्रुतिराप्तवचनं तु ॥ ५ ॥

विषयं विषयं प्रति योऽध्यवसायो नेत्रादीनामिन्द्रियाणां पञ्चानां रूपादिषु पञ्चसु, तत्प्रत्यक्षं प्रतिपत्तिरूपं दृष्टाख्यम् । अनुमानं त्रिविधम् । त्रिसाधनं त्र्यवयवं पञ्चावयवमित्यपरे । तदाख्यातं कथितम् । पक्षहेतुदृष्टान्ता इति त्र्यवयवम् । पक्षः प्रतिज्ञापदम् । यथा—वह्निमानयं प्रदेशः । साध्यवस्तूपन्यासः पक्षः । इतरे पक्षाभासाः प्रत्यक्षविरुद्धादयो नव । त्रिरूपो हेतुः । त्रैरूप्यं पुनः पक्षधर्मत्वं सपक्षे सत्त्वं विपक्षे चासत्त्वमिति । अत्रोदाहरणं यथा—धूमवत्त्वादिति । अन्ये हेत्वाभासाः चतुर्दश । असिद्धानैकान्तिकविरुद्धादयः । साधर्म्यवैधर्म्याभ्यां द्विविधं निदर्शनम् । यथा महानसम् । इतरे निदर्शनाभासा दश । एवं त्रयस्त्रिंशदाभासरहितं त्र्यवयवमनुमानम् । पञ्चावयवमित्यपरे । तदाह— अवयवाः पुनः प्रतिज्ञापदेशनिदर्शनानुसन्धानप्रत्याम्नायाः । एवं पञ्चावयवेन वाक्येन स्वनिश्चितार्थप्रतिपादनं परार्थप्रतिपादनं परार्थमनुमानम् । तच्च त्रिविधम् । पूर्ववच्छेषवत् सामान्यतोदृष्टं च । तत्र विशिष्टमेघोन्नतिदर्शनात् भवित्रीं वृष्टिं सम्भावयति । पूर्वमियं दृष्टेति पूर्ववत् । नदीपूरदर्शनादुपरि वृष्टो देव इति वा प्रतीतिः । शेषवद्यथा—समुद्रोदकाबिन्दुं प्राश्य, शेषस्य लवणभावोऽनुमीयते इति शेषवत् ।

१. कैश्चित्प्रमाणतया परिगृहीतं चेष्टादिकं निरस्यति ।

सामान्यतोदृष्टम्—पुष्पिताम्रदर्शनात् अन्यत्र पुष्पिता आम्रा इति। चन्द्र उदितो पुनर्यथा—बहिरुद्योत इति केनाप्युक्तं, तत्रापरेणाप्युक्तम्। तल्लिङ्गलिङ्गपूर्वकमिति। लिङ्गेन त्रिदण्डादि-भविष्यतीत्यर्थसङ्गतिः। दर्शनेनादृष्टोऽपि लिङ्गी साध्यते नूनमसौ परिव्राडस्ति यस्येदं त्रिदण्ड-मिति। आप्तश्रुतिराप्तवचनं तु। तृतीयं प्रमाणम्। आप्ता ब्रह्मादय आ-चार्याः, श्रुतिर्वेदस्तदेतदुभयमाप्तवचनम्। आप्तिः साक्षादर्थप्राप्तिर्यथा-र्थोपलम्भः तया वर्तत इत्याप्तः साक्षात्कृतधर्मा यथार्थोप्त्या श्रुतार्थग्राही तदुक्तमाप्तवचनम्। तत्रापि प्रसिद्धिलक्षणागुणयोगात्तिस्रः शब्दवृत्तयः। तत्र लक्षणात्रैविध्यम्। जहल्लक्षणाऽजहल्लक्षणा जहदजहल्लक्षणा चेत्यादि प्रमाणशास्त्रेषु बहुतरः प्रपञ्च आस्ते। तत्र प्रकान्तमेव तावद-भिधीयते भगवतः कपिलस्य मतम्।

आगमो ह्याप्तवचनमाप्तं दोषक्षयाद्विदुः।
क्षीणदोषोऽनृतं वाक्यं न ब्रूयाद्धेत्वसम्भवात्॥
स्वकर्मण्यभियुक्तो यो रागद्वेषविवर्जितः।
पूजितस्तद्विधैर्नित्यमाप्तो ज्ञेयः स तादृशः॥
तदेवमेतत्त्रिविधं प्रमाणम् ॥ ५ ॥

तदेवं व्यक्ताव्यक्तज्ञाख्यस्य प्रत्यक्षादित्रिविधप्रमाणेषु केन कस्य सिद्धिः स्यात् इति। अत्रोच्यते—

सामान्यतस्तु दृष्टादतीन्द्रियाणां प्रतीतिरनुमानात्।
तस्मादपि चासिद्धं परोक्षमाप्तागमात्साध्यम्[1] ॥ ६ ॥

अत्र प्रधानपुरुषावतीन्द्रियौ तयोः सामान्यतो दृष्टादनुमाना-त्सिद्धिः। यस्मान्महदादि लिङ्गं त्रिगुणं दृष्ट्वा कार्यं तत्कारणमदृष्टमप्य-स्ति त्रिगुणं चेति साध्यते प्रधानम्। न ह्यसतः सदुत्पत्तिः स्यादिति। न च कारणासदृशं कार्यं स्यादिति। व्यक्तं तु प्रत्यक्षेणैव साधितमिति तदर्थे न प्रयत्नः। यस्माज्जडमपि प्रधानं प्रसूतिक्रियायां प्रवर्तते तस्मादस्ति लोहस्य चलनक्रियाशक्तिहेतुचुम्बकवदवश्यं पुरुष इति ज्ञसिद्धिः ॥ ६ ॥

ननु प्रत्यक्षेण योऽर्थो नोपलभ्यते स सर्वथा नास्तीति मतं सङ्ग-च्छते। यथा द्वितीयमनीश्वरशिरः, तृतीयो बाहुः, शशिविषाणादयो

१. सिद्धमिति गौ०।

वा। एवं प्रधानपुरुषौ नोपलभ्येते तस्मात्तावपि न स्त इत्याशङ्कानि-रासायाह—

अतिदूरात्सामीप्यादिन्द्रियघातान्मनोऽनवस्थानात्।
सौक्ष्म्याद्व्यवधानादभिभवात्समानाभिहाराच्च ॥ ७ ॥

इह लोके सतामप्यर्थानामष्टधा नोपलब्धिः। तथा हि दर्शयति—यथा सतामपि देवदत्तविष्णुमित्रयज्ञदत्तानां देशान्तरगतानामतिदूरा-न्नोपलब्धिः। तत् किं ते न सन्ति। यथा वा चक्षुरतिसामीप्यात् कज्जलं नोपलभते। तत्किमिदं नास्ति। यथा बधिरान्धौ शब्दरूपे नोप-लभेते। तत्किं ते न स्तः। अनवस्थितचित्तौ राजानमपि यान्तं न पश्यति। तत्किमसौ न गतः। धूमोष्मत्रुटिर्नीहारपरमाणवो नोपल-भ्यन्ते। तत्किममीषामभावः। कुड्येन व्यवहितं नोपलभ्यते। तत्किं नास्ति। सूर्यादितेजसाऽभिभूतानां ग्रहनक्षत्रतारकादीनामनुपलम्भात् तेषां किमभावः शक्यते परिकल्पयितुम्। मुद्गराशिकुवलयामलकमौक्ति-ककपोतादिनिकुरम्बे क्षिप्तं समानं यदि नोपलभ्यते तदवेदमिति। तत्किं नास्ति। एवमष्टधा सतामप्यनुपलम्भोऽभिहितः। इदानीमसतां चतुर्धा भवति। तत्रोच्यते—प्राक्प्रध्वंसेतरेतरात्यन्ताभावभेदात्। तत्र मृत्पिण्डे घटः प्रागुत्पत्तेर्नोपलभ्यत इति प्रागभावः। प्रध्वंसाभावो यथा मुद्ग-राभिघातात् प्रध्वस्तो घटो नोपलभ्यते। इतरेतराभावो यथा अश्वे गात्वम्, गवि अश्वत्वम्। अत्यन्ताभावो यथा द्वितीयमनीश्वरशिरः, तृतीयो बाहुः, शशविषाणादयो वा। एवमियं द्वादशधा अनुपलब्धिः। सतामष्टधा ह्यसतां चतुर्धा। एवं प्रधानपुरुषावपि सन्तौ नोपलभ्येते॥७॥

तदमीषां मध्ये केन हेतुनेमौ नोपलभ्येते। तदुच्यते—

सौक्ष्म्यात्तदनुपलब्धिर्नाभावात् कार्यतस्तदुपलब्धिः[1]।
महदादि तच्च कार्यं प्रकृतिविरूपं सरूपं च[2] ॥ ८ ॥

तस्य प्रधानस्यानुपलब्धिरनवगमः सौक्ष्म्यात् हेतोर्नाभावात्। सूक्ष्मं प्रधानं शब्दाद्यलक्षणत्वात् परमाण्वादिवत्। न पुनरेवं, यन्नास्ति प्रधानमतो नोपलभ्यते। किं तु अस्ति प्रधानं नोपलभ्यते सौक्ष्म्यात्पर-माण्वादिवत्। तर्हि कथमुपलभ्यत इति। अत्राह—कार्यतस्तदुपलब्धिः।

१. लब्धेः इति वाचस्पतिसम्मतः पाठः।

२. 'प्रकृतिसरूपं विरूपं च' इति पाठो वाचस्पतिसम्मततया प्रतिभाति।

कार्यं दृष्ट्वा कारणमनुमेयं वटधान्यवत् । यथा वटधान्यं कारणं वटं
कार्यमालोक्यानुमीयते । एवं सदेव प्रधानं कारणं महदादेः सतः
कार्यादनुमीयते । न ह्यसतः सदुत्पत्तिर्भवतीति । महदादिमहानहङ्कारः
पञ्चतन्मात्राणि एकादशेन्द्रियाणि पञ्च महाभूतानि चेति त्रयोविंश-
तिकम् । एतन्महदादि कार्यं त्रिगुणं दृष्ट्वाऽनुमीयते—अस्ति प्रधानमपि
त्रिगुणं कारणं यस्येदं त्रिगुणं कार्यमिति । किं चान्यत् । तच्च कार्यं प्रकृ-
तिविरूपं सरूपं च । प्रधानाद्विसदृशं सदृशं चेत्यर्थः । सन्ति ते हेतवो
यैरेतत् प्रधानं विसदृशं सदृशं च । यथा लोके पुत्रः पितुः सदृशो
विसदृशः स्यात् यदि रूपेण तदा न गुणैः, यदा गुणैस्तदा न रूपेणेति
यावत् । तांश्च हेतूनुपरिष्टाद्वक्ष्यामः ॥ ८ ॥

तिष्ठतु तावदेतत् । अन्यत्पृच्छामः—किमेतन्महदादि प्रागुत्पत्तेः
प्रधाने सत् जायते, उतासत् सम्भवति । अत्राचार्याणां विप्रतिपत्तिरतः
संशयः । अत्र वैशेषिका विप्रतिपन्ना असतः सद्भवतीति मन्यन्ते ।
मृत्पिण्डे हि प्रागुत्पत्तेर्घटो नास्तीति व्यवसितास्ते । अस्ति नास्तीति
वराका जीवकाः । नैवास्ति न च नास्ति । एष बौद्धानां पक्षः । एवम-
न्योन्यविरोधवादिषु दर्शिषु को नाम निश्चयः । तदुच्यते । तत्र तावत्स-
दसद्वादिनो जीवकाःस्ववचनविरोधेनैव निरस्ताः । यदि सत्तदाऽसन्न
भवति । उतासत्तदा सद्भावो न । यतः सदसतोरेकत्र विरोधात् । अत्र
दृष्टान्तो यथा देवदत्तो मृतो जीवति चेतिवत् । बौद्धानां तु नास्ति न च
नास्तीति पक्षपरिग्रहाभावात्तैः सह सङ्कल्प एव न युज्यते । वैशेषिकाणां
तु असतः सद्भवतीति मतप्रतिषेधाय उच्यते—

असदकरणादुपादानग्रहणात् सर्वसम्भवाभावात् ।
शक्तस्य शक्यकरणात् कारणभावाच्च सत् कार्यम् ॥९॥

इह लोके सदेव सद्भवति । असतः करणं नास्ति । यदि स्यात्तदा
सिकताभ्यस्तैलं, कूर्मरोमभ्यः पटप्रावरणम् , वन्ध्यादुहितृभ्रूविलासः,
शशविषाणं, खपुष्पं च स्यात् । न चास्ति तस्मादनुमीयते प्रधाने प्रागु-
त्पत्तेर्महदादिकमस्त्येव । उपादानग्रहणात् । इह लोके यो येनार्थी स तदु-
पादानग्रहणं करोति । तन्निमित्तमुपादत्ते । तद्यथा दध्यर्थी क्षीरस्योपा-
दानं कुरुते । यदि चाऽसत्कार्यं स्यात्तदा दध्यर्थी उदकस्याप्युपादानं
कुर्यात् , न च कुरुते, तस्मात् प्रधाने महदादि कार्यमस्तीति । किं च
सर्वसम्भवाभावात् । इह लोके यद् यस्मिन् विद्यते तस्मादेव तदुत्पद्यते ।
यथा तिलेभ्यस्तैलं, दध्नो घृतम् । यदि साऽसत्कार्यं स्यात्तदा सर्वं

सर्वतः सम्भवेत्ततश्च तृणपांसुवालुकादिभ्यो रजतसुवर्णमणिमुक्ताप्रवा-
लादयो जायेरन् । न च जायन्ते । तस्मात् पश्यामः सर्वसम्भवाभावा-
दपि महदादि कार्यं प्रधाने सदेव सद्भवतीति । अतश्चास्ति—शक्तस्य
शक्यकरणात् । इह लोके शक्तः शिल्पी करणादिकारणोपादानकालोपाय-
सम्पन्नः शक्यादेव शक्यं कर्म आरभते नाशक्यमशक्यात् । तद्यथा—
शक्तः कुम्भकारः शक्यादेव मृत्पिण्डात् शक्यदण्डचक्रसूत्रोदकविदल-
तलादिभिः सम्पन्नो घटशरावोदञ्चनादीन्यारभमाणो दृष्टः । न च मणि-
कादि, अशक्यत्वात्तावता पिण्डेन तस्य । यदि पुनः करणनियमो न
स्यादशक्यादप्यशक्यमारभ्येत । तस्मात् सत् कार्यं स्यान्नासत् । किं च—
कारणभावाच्च । कार्यं सदेव स्यात् । इह लोके यल्लक्षणं कारणं तल्लक्षणं
कार्यं स्यात् । यथा कोद्रवेभ्यः कोद्रवाः, व्रीहिभ्यो व्रीहयः स्युः । यदि
चाऽसत्कार्यं स्यात् तदा कोद्रवेभ्यः शालीनामपि निष्पत्तिः स्यात् । न
च भवति । तस्मात्कारणभावादपि पश्यामः प्रधाने महदादि कार्य-
मस्तीति । साधितमेवमेतैः पञ्चभिर्हेतुभिः सत् कार्यम् । 'सदेव
सोम्येदमग्र आसीदेकमेवाद्वितीयं तद्धैक आहुरसदेवेदमग्र आसीत्'
इत्यारभ्य 'सत्त्वेव सोम्येदमग्र आसीत्' [छा० उ० ६ । २ । १–२]
इति श्रुतेः ॥ ९ ॥

तत्र यदुक्तं पूर्वस्यामार्यायां 'प्रकृतिविरूपं सरूपं च'इति । तत्सा-
धर्म्यवैधर्म्यप्रतिपादनाय इदमारभ्यते—

हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिङ्गम् ।
सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तम् ॥ १० ॥

हेतुमदिति । यस्योत्पत्तिकारणमस्ति तद्धेतुमत् । हेतुरपदेशो निमित्तं
प्रकृतिः कारणमित्यनर्थान्तरम् । प्रधानस्यैते पर्यायशब्दाः । तस्मात्प्रधा-
नेन हेतुना सकारणमिदं महदादिभूतपर्यन्तं त्रयोविंशतिकं लिङ्गम् । तथा
हि—महद्बुद्धितत्त्वं तत्प्रधानेन हेतुमत् । तेनाहङ्कारोऽमुनैकादशेन्द्रि-
याणि तन्मात्राणि च । तैश्च भूतानीति सर्वमेवेदं परस्परहेतुमत् । अथ
च द्विविधो हेतुः कारको ज्ञापकश्च । तत्र प्रधानबुद्ध्यहङ्कारतन्मात्र-
लक्षणश्चतुर्विधः कारकः । विपर्ययाशक्तितुष्टिसिद्ध्यनुग्रहभेदात्पञ्चधा
ज्ञापकः । तद् द्विविधेनापि हेतुना युक्तं हेतुमदिदं सिद्धम् । किं च—
अनित्यं प्रलयं गच्छति । यस्मादुत्पत्तिमत्तस्मादनित्यम् । अकारणवन्नि-
त्यमिति नित्यस्य लक्षणम् । तद्विपरीतमिदमतोऽनित्यम् । तद्यथा—
मृत्पिण्डादुत्पन्नो घटः स चानित्यो दृष्टः । एवं महदादि प्रधानादुत्पन्नं

तस्मादनित्यं तस्मिन्नेव च लीयते। तथा हि—प्रधाने बुद्धिस्तस्यामहङ्कारस्तस्मिन्निन्द्रियाणि तन्मात्राणि च तेषु भूतानि प्रलयकाले लीयन्ते। तस्मादनित्यम्। किञ्च—अव्यापि असर्वगतम्। यथा प्रधानपुरुषौ सर्वगतौ न तथेदमित्यर्थः। इदं हि यस्मिन्नेव प्रदेशेऽवस्थितं तस्मिन्नेव वर्तते। किं च—सक्रियम्। यस्मात्संसरणकाले महदादि कार्यं सूक्ष्मशरीरमाश्रित्य संसरति तस्मात्सक्रियम्। किं च—अनेकम् बहुविधं त्रयोविंशतिप्रकारकम्। इतरच्च—आश्रितम्। यद् यस्मादुत्पद्यते तत्तदाश्रितम्। बुद्धिः प्रधानमाश्रिता, तां चाहङ्कारः, तं चेन्द्रियाणि तन्मात्राणि च, तानि महाभूतान्याश्रितानि। एवमाश्रितम्। लयं गच्छतीति लिङ्गम्। सावयवमिति। अवयन्तीत्यवयवा यथा पिण्डस्य हस्तपादाद्याः। शब्दस्पर्शरसरूपगन्धाद्यवयवसम्पन्नं व्यक्तम्। किं च—परतन्त्रम् पराधीनम्। यथा पितरि जीवति पुत्रो न स्वतन्त्र एवं व्यक्तम्। प्रधानतन्त्रा बुद्धिः, बुद्धितन्त्रोऽहङ्कारः, अहङ्कारतन्त्राणि इन्द्रियाणि तन्मात्राणि च, तन्मात्रतन्त्राणि महाभूतानीति। एवं परतन्त्रम्। व्यक्तमुक्तम्। एतद्विपरीतलक्षणमव्यक्तम्। अहेतुमत् अनुत्पन्नत्वात्। नित्यम् अकारणवत्त्वात्। व्यापि सर्वगतत्वात्। आब्रह्मस्तम्बपर्यन्तं पुरुषवद् व्याप्य प्रधानमवस्थितम्। निष्क्रियं सर्वव्यापकत्वात्। एकं सर्वकारणत्वात्। अनाश्रितं प्रभविष्णुत्वात्। अलिङ्गमनुत्पत्तिकत्वात्। निरवयवममूर्तत्वात्। स्वतन्त्रं सर्वोत्पत्तिकारणत्वात्॥ १०॥

एवमनयाऽऽर्यया व्यक्ताव्यक्तयोर्वैधर्म्यमभिहितम्। साधर्म्यमुच्यते—

त्रिगुणमविवेकि विषयः सामान्यमचेतन प्रसवधर्मि।
व्यक्तं तथा प्रधानं तद्विपरीतस्तथा च पुमान्॥ ११॥

त्रिगुणं व्यक्तं महदादि। प्रधानमपि त्रिगुणम्। कारणानुगतत्वात्कार्यस्य। यथा कृष्णतन्तुः कारणं पटः कार्यमपि कृष्णमेव भवति। त्रिगुणेन कार्येणास्य कारणमपि त्रिगुणं भवतीति प्रधानं साध्यते। किं चान्यत्—अविवेकि व्यक्तम्। अमी गुणा इदं व्यक्तमिति विवेक्तुं न पार्यते, तथा प्रधानमपि इदं प्रधानम् अमी गुणा इति न शक्यते पृथक् कर्तुम्। किं च—विषयो व्यक्तं महदादि। सुखदुःखमोहतया भोग्यं तत् पुरुषस्य। स हि तस्य भोक्ता। तथा प्रधानमपि सर्वपुरुषाणां क्षेत्रज्ञानां भोग्यम्। सामान्यं व्यक्तम्। गणिकावत् सर्वपुरुषाणाम्। तथा प्रधानमपि। अचेतनं व्यक्तम्। सुखदुःखमोहान्न चेतयति। तथा प्रधानमपि[1]। प्रसवधर्मि व्यक्तम्। बुद्धेरहङ्कारस्तत इन्द्रियाणि तन्मात्राणि च तेभ्यो भूतानि जायन्ते। एवं प्रधानमपि बुद्धिं प्रसूयते। उक्तमिदं व्यक्ताव्यक्तयोः साधर्म्यम्। इदानीं 'तद्विपरीतस्तथा च पुमान्' इत्युक्तं, तत्प्रतिपादयति। ताभ्यां व्यक्ताव्यक्ताभ्यां विपरीतः। तयोर्यत्साधर्म्यं 'त्रिगुणमविवेकि विषयः सामान्यमचेतनं प्रसवधर्मि' इत्युक्तम्। ततोऽसौ विपरीतो विधर्मी। अगुणो विवेकी, अविषयोऽसामान्यः, चेतनोऽप्रसवधर्मी चेति। वैधर्म्यमभिधाय साधर्म्यमाह—तथा च पुमानिति।

'हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिङ्गम्।
सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तम्'॥ (का० १०) इत्युक्तम्।

तद् यथा व्यक्ताद्विसदृशं प्रधानं तथा प्रधानसधर्मा पुरुषः। तथा हि अहेतुमान्नित्यो व्यापी निष्क्रिय एकोऽनाश्रितोऽलिङ्गो निरवयवः स्वतन्त्र इति॥ ११॥

तत्र त्रिगुण व्यक्तमव्यक्तं च निर्गुणः पुरुष इत्युक्तम्। किमात्मका गुणा इत्यत्रोच्यते—

प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः।
अन्योऽन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः॥१२॥

तत्रायं समासः। प्रीतिश्चाप्रीतिश्च विषादश्च ते आत्मा स्वरूपं येषां गुणानां ते भवन्ति प्रीत्यप्रीतिविषादात्मकाः। तेषां लक्षणमुच्यते। तत्र प्रीत्यात्मकं सत्त्वम्। आत्मशब्दः स्वभावे वर्तते। कस्मात्? सुखलक्षत्वात्। यो हि कश्चित् क्वचित् प्रीतिं लभते तत्र आर्जवमार्दवसत्यशौचह्रीबुद्धिक्षमानुकम्पाज्ञानादि च तत्सत्त्वं प्रत्येतव्यम्। अप्रीत्यात्मकं रजः। कस्मात्? दुःखलक्षणत्वात्। यो हि कश्चित्कदाचित् क्वचिदप्रीतिमुपलभते तत्र द्वेषद्रोहमत्सरनिन्दास्तम्भोत्कण्ठानिकृतिवञ्चनाबन्धवधच्छेदनानि च[2] तद्रजः प्रत्येतव्यम्। विषादात्मकं तमः। कस्मात्? मोहलक्षणत्वात्। यो हि कश्चित् कदाचित् क्वचिन्मोहमुपलभते, तत्राज्ञानमदालस्यभयदैन्याकर्मण्यतानास्तिक्यविषादस्वप्नादि च तत्तमः प्रत्ये-

---

१. कथम्? अनुमीयते। इहाचेतनान्मृत्पिण्डादचेतन एव घट उत्पद्यते।

२. निकृतिः शाठ्यम्। 'कुसृतिर्निकृतिः शाठ्यम्' इत्यमरः (१।७।३०)।

सव्यम् । किं चान्यत्—प्रकाशप्रवृत्तिनियमार्थाः[1] । प्रकाशश्च प्रवृत्तिश्च नियमश्च ते अर्था येषां तथोक्ताः । तत्र प्रकाशयितव्यमिति सत्त्वस्य, प्रवर्तितव्यमिति रजसः, नियन्तव्यं संहर्तव्यमिति तमसः। किं चान्यत्—अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः । तत्रापि समासः । अन्योन्याभिभवाश्च अन्योऽन्याश्रयाश्च अन्योन्यजननाश्च अन्योन्यमिथुनाश्च येषां गुणानामन्योऽन्यवृत्तयश्च विद्यन्ते तथोक्ताः । चशब्दः समुच्चये द्रष्टव्यः । प्रीत्यादयश्च तावत् प्रागभिहिताः । अन्योन्याभिभवाश्चेति रजस्तमसोरभिभवात् शान्ता वृत्तिरुत्पद्यते सत्त्वस्य धर्माद्या । सत्त्वतमसोरभिभवाद् रजसो घोरा वृत्तिरुत्पद्यते अधर्माद्या । सत्त्वरजसोरभिभवात् तमसो मूढा वृत्तिरुत्पद्यते अज्ञानाद्या । किं चान्यत्—अन्योऽन्याश्रयाश्च गुणाः। सत्त्वं हि प्रवृत्तिनियमावाश्रित्य प्रकाशयति। रजः प्रकाशनियमावाश्रित्य प्रवर्तयति । तमः प्रकाशप्रवृत्ती आश्रित्य नियमयति । त्रिदण्डविष्टम्भवदमी वेदितव्या इति । किं चान्यत्—अन्योन्यजननाश्च गुणाः । अन्योन्यं जनयन्ति । कदाचित् सत्त्वं रजस्तमसी जनयति । कदाचित्तमः सत्त्वरजसी जनयति । यथा सपरिकरकुम्भकाराधिष्ठितो मृत्पिण्डो घटं जनयति तद्वज्जनयन्ति । अन्योन्यं बोधयन्तीत्येतत् प्रतिगृह्यते । यथा देवदत्तयज्ञदत्तौ परस्परं बोधयत एवं बुद्धिस्था गुणाः सत्त्वरजस्तमांसि परस्परं बोधयन्ति । एवमन्योन्यजनका गुणाः । किं चान्यत्—अन्योन्यमिथुनाश्च गुणाः । अवियोगकधर्मत्वात् । एवं ह्याहुः—

'रजसो मिथुनं सत्त्वं सत्त्वस्य मिथुनं रजः ।
उभयोः सत्त्वरजसोर्मिथुनं तम उच्यते ॥' (देवीभागवतम् ३।५०)[2]

किं चान्यत्—अन्योऽन्यवृत्तयश्च गुणाः । अन्योन्यस्य वृत्तिं जनयन्ति । यथा काचित् स्त्री नयविनयविलासलीलावती भर्तुरात्मनो बन्धुवर्गस्य च प्रीतिं जनयति । सैव सपत्नीषु दुःखमोहौ जनयति । एवं सत्त्वेन स्त्रीभूतेन रजसस्तमसश्च वृत्तिर्जनिता । एवमन्येष्वपि योज्यम् ॥ १२ ॥

१. अर्थशब्दः सामर्थ्यवाची प्रयोजनार्थो वा । तथा च प्रकाशक्रियास्थितिशीला गुणा इत्यर्थः ।

२. पूर्वार्धोऽयं देवीभागवते यथानिर्दिष्टमुपलभ्यते । किन्तु तत्रोत्तरार्धस्य स्थाने 'उभे ते सत्त्वरजसी तमसो मिथुने विदुः' इत्येवंरूपः पाठो दृश्यते ।

अत्राह—न खलु सत्त्वरजस्तमांसि जात्यन्तराणि । कुतः । स्वभावेष्ववस्थानात् । इह खलु रूपयौवनदाक्षिण्यमतिसाधुत्वस्मृत्युप्रभावाभावलीलाविलाससम्पन्ना स्त्री सत्त्वस्य रूपमुपदिश्यते । सा च भर्तुः सुखावहा भवति, सपत्नीनां दुःखाय रागिणां मोहाय च । तथा क्षत्रिया दुःखप्रहरणकृतापराधा दस्युसेनामभिनिघ्नती रजसो रूपमित्युपदिश्यते। तेन च दस्युभिरुपद्रुतानां दार्यमाणानां सुखावहा भवति । दस्यूनां दुःखाय मोहाय च । तथा घनाघनो महाकृष्णो मेघस्तोयाध्मातोऽवलम्बी ग्रसमान इव नभो भूमिं चाभिवर्धमानः सबलाकः सविद्युद्गम्भीरस्तनितस्तमसो रूपमित्युपदिश्यते । स च कर्षकाणां सञ्जीकृतबीजोपकरणानां सुखो भवति । स एवानाच्छादितशरणानामनुपार्जितभक्तस्नेहलवणानामप्रगुणिततृणकाष्ठानां प्रोषितवधूनां च दुःखो मूढश्च । तदेवमवस्थितस्वभावत्वादेकं सत्त्वरजस्तमांसि ।

अत्रोच्यते जात्यन्तराण्यमूनि त्रीणि । लक्षणपृथक्त्वव्यवस्थानात् । कथमिति चेत्तदुच्यते—

सत्त्वं लघु प्रकाशकमिष्टमुपष्टम्भकं चलं च रजः ।
गुरु वरणकमेव तमः प्रदीपवच्चार्थतो वृत्तिः ॥ १३ ॥

अत्र यत् पूर्वस्यामार्यायामभिहितं सत्त्वलक्षणं तल्लघुत्वप्रकाशकलक्षणं च । यदा सत्त्वमुत्कटं भवति देवदत्ते तदा लघून्यङ्गानि, विशुद्धानीन्द्रियाणि स्वविषयग्रहणसमर्थानि भवन्ति । तदा मन्तव्यमद्य मे सत्त्वमुत्कटत्वेन वर्तते । इष्टं च स्वरूपसाधनहेतुत्वात् । उपष्टम्भकं चलं च रजः । उपष्टम्भकं प्रेरकमुत्साहादिरित्यर्थः । यथा मत्तवृषो वृषं दृष्ट्वा उद्धतो भवति तद्वत् । अथवा गर्वश्चला क्रियेत्यर्थः । एवं यस्मिन् देवदत्ते यज्ञदत्ते वा रज उत्कटं भवति स कलहं मृगयते । किं चान्यत् चलचित्तश्च भवति ग्रामं गच्छामि स्त्रियं कामये तपः करोमि इत्यादि । एवं नित्यमुत्सुकमना भवति । एतद् रजोलक्षणम् । तम आह—गुरु वरणकमेव तमः । यद् गुरुत्वमावरणत्वं चास्ति तत्तमः । यदा गुरूण्यङ्गानि भवन्ति । इन्द्रियाण्यलसानि स्वविषयग्रहणासमर्थानि भवन्ति । तदानीं मन्तव्यमेतत्तम उत्कटत्वेन वर्तत इति । तस्माज्जात्यन्तराण्येव सत्त्वरजस्तमांसि । यत्पुनरभ्यधायि—स्त्री क्षत्रिया मेघश्चेति । अत्र त्रयेऽपि ब्रूमः । सत्त्वं रजस्तमसी आश्रित्य स्वेन रूपेणाङ्गाङ्गिभावं गच्छति । तस्यापकाराद् दुःखमुत्पद्यते । एवं रजस्तमसी योज्ये । परस्परविरुद्धानां गुणानां कथमेका वृत्तिर्भवतीत्यत्राह—परस्परविरुद्धाः

शत्रवो न ह्येकमर्थं कुर्वन्ति । इमे च गुणाः परस्परविरुद्धा अपि पुरुषार्थं कुर्वन्ति । कुतः । प्रदीपवच्चार्थतो वृत्तिः । प्रदीपेन तुल्यं प्रदीपवत् । अर्थतः कार्यवशात् । परस्परविरुद्धानामप्यमीषां वृत्तिर्दृष्टा । यथा तैलाग्निवर्त्तिकासंयोगात्परस्परविरुद्धा अपि पदार्थाः संहृत्य एकमर्थं प्रकाशरूपं निष्पादयन्त्येवं गुणा अपि परस्परविरुद्धाः संहृत्य पुरुषार्थं कुर्वन्ति ॥ १३ ॥

अत्राह—अयमन्तरः प्रश्नो हि । यदुक्तं पुर्वस्यामार्यायां 'त्रिगुणमविवेकि विषयः सामान्यमचेतनं प्रसवधर्मि । व्यक्तम्–' तत्कथमेवं ज्ञायतेऽव्यक्तमपि त्रिगुणत्वादियुक्तम् । अत्रोच्यते—

अविवेक्यादिः[1] सिद्ध[2]स्त्रैगुण्यात् तद्विपर्ययाभावात् ।
कारणगुणात्मकत्वात् कार्यस्याव्यक्तमपि सिद्धम् ॥१४॥

योऽप्ययमविवेक्यादिर्गणः प्रसवधर्म्यन्तः स व्यक्तेऽपि सिद्धोऽव्यक्तेऽपि सिद्धः । कथं गम्यते । त्रैगुण्यात् । यत्त्रिगुणं तदविविक्तम्, यदविविक्तं तद्विषयं, यद्विषयं तत्सामान्यं, यत्सामान्यं तदचेतनम्, यदचेतनं तत् प्रसवधर्मि । तस्मादविवेक्यादिर्गुणस्त्रैगुण्यादेव सिद्धः । तद्विपर्ययाभावात्[3] । इह हि यत्र तन्तवस्तत्रैव पटः यत्र पटस्तत्रैव तन्तवः, यस्तन्तून् पश्यति स पटं पश्यति, यो वा पटं पश्यति स तन्तून् पश्यति । एवमेव तन्तुपटयोरिव व्यक्ताव्यक्तयोः सम्बन्धः । दूरे हि प्रधानं सन्निकृष्टे व्यक्तम् । यो हि व्यक्तं पश्यति स चाव्यक्तमपि पश्यति । यो वा योगी प्रधानं पश्यति स व्यक्तमपि पश्यति । तस्माद्विपर्ययाभावादविवेक्यादिगणेन सिद्धमव्यक्तम् । इतश्च सिद्धम् । कारणगुणात्मकत्वात् कार्यस्याव्यक्तमपि सिद्धम् । कारणस्य गुणाः कारणगुणास्ते आत्मा स्वभावो यस्य तद्भावः कारणगुणात्मकत्वम् । आत्मशब्दः स्वभावे वर्तते । कारणगुणस्वभावत्वात् कार्यस्य । इह लोके यदात्मकं करणं तदात्मकमेव कार्यमपि भवति । कारणानुगतत्वात् कार्यस्य । यथा कटुनिम्बवृक्षात् कटुरेव रसो भवति मधुराच्च मधुरो द्राक्षादिरसः । तस्मादविवेक्यादिगणेन सिद्धमव्यक्तम् । तत्र यदुक्तं भवता तत्

१. अविवेकित्वादिकम् ।

२. 'अविवेक्यादेः सिद्धि॰' इति वाचस्पतिसम्मतः पाठः ।

३. तस्य अविवेकित्वादेर्विपर्ययो विवेकित्वादिकं तस्य अभावात् । एतदेव दर्शयति यत्र तन्तव इत्यादिना ।

कथमेवं ज्ञायते अव्यक्तमविवेक्यादिगणेन युक्तमिति तदेवमेव त्रिभिर्हेतुभिः प्रतिपादितम् । अत्राह—इह लोके यन्न विद्यते तन्नास्ति । यथा द्वितीयमनीश्वरशिरः, तृतीयः पाणिः, शशविषाणं, वन्ध्यापुत्रिकाभ्रूविलासादयो वा । नैव तावत् प्रधानपुरुषावुपलभ्येते, तौ कथं हि स्त इति गम्यते । हिमवत उपलगणपरिमाणं नोपलभ्यते । किं तन्नास्ति ? एवं प्रधानपुरुषावनुपलभ्यमानावप्युपलभ्येते हेतुभिः । तांश्च हेतूनुपरिष्टाद्वक्ष्यामः ॥ १४ ॥

त उच्यन्ते—

भेदानां परिमाणात् समन्वयाच्छक्तितः प्रवृत्तेश्च ।
कारणकार्यविभागादविभागाद्वैश्वरूप्यस्य ॥१५॥

अस्ति प्रधानम् । कुतः ? भेदानां परिमाणात् । लोके यत्र कर्तास्ति तस्य परिमाणं दृष्टम् । यथा कुलालः परिमितात् मृत्पिण्डात् परिमितमेव घटं कुरुते प्रस्थग्राहकमाढकग्राहकं वा । एवं व्यक्तं परिमितम् । एका बुद्धिरेकोऽहङ्कारः पञ्च तन्मात्राणि एकादशेन्द्रियाणि पञ्च महाभूतानि इति त्रयोविंशतिकम् । एवमेतत् परिमितं व्यक्तं दृष्ट्वाऽनुमानेन साधयामोऽस्त्यस्य कारणं प्रधानं यद्व्यक्तं परिमितमुत्पादयति । यदि च प्रधानं कारणं न स्यान्निष्परिमाणमिदं व्यक्तं स्यात् । अस्ति चास्य परिमाणं तस्मादस्ति प्रधानम् । इतश्चास्ति समन्वयदर्शनात् । कस्य समन्वयात्[1] ? भेदानामेव । अस्मादेव कारणाच्च शकलकपालमात्रसमस्तसमन्वयः । भूषणादीन् दृष्ट्वा तत्त्वेन दर्शयति । सामान्यप्रकरणाल्लोकभेदानामेकैकजातिसमन्वयो दृष्टः । तेषां धर्मोऽन्वयः, तस्मात्समन्वयदर्शनात् पश्यामोऽस्ति प्रधानं कारणमिति । इतश्चास्ति—शक्तितः प्रवृत्तेश्च । इह यो यस्मिन्नर्थे शक्तः स तस्मिन्नेव प्रवर्तते । तद्यथा कुम्भकारो घटघटिकाशरावोदञ्चवादिकरणे शक्तः । अतः साधयामः प्रधानस्याप्यस्ति शक्तिर्यया शक्त्या व्यक्तमुत्पादयति । सा च शक्तिर्निराश्रया न भवति । तस्मादस्ति प्रधानं यत्र शक्तिरवतिष्ठते । इतश्चास्ति—कारणकार्यविभागात् । करोतीति कारणम्, क्रियत इति कार्यं, तयोर्विभागस्तस्मात् । तद्यथा मृत्पिण्डः कारणं घटः कार्यम् । स एव

१. समन्वयात्समानधर्मदर्शनात् । व्रतचारिणं बटुं दृष्ट्वा समन्वीयते नूनमस्यास्ति ब्राह्मण्यम् । एवमिदं त्रिगुणं महदादि दृष्ट्वा साधयामोऽस्य यत्कारणं भविष्यतीति ।

हि मधूदकपयःप्रभृतीनां धारणे समर्थो न तु मृत्पिण्डः। एवं व्यक्ताव्यक्तयोर्विभागः। अन्यद् व्यक्तं महदहङ्कारतन्मात्रेन्द्रियमहाभूतपर्यन्तं, तच्च कार्यम्। अन्यच्च अव्यक्तं प्रधानं विपरीतं कारणमिति। तस्मादस्ति प्रधानम्। इतश्चास्ति—अविभागाद्वैश्वरूप्यस्य। न विभागोऽविभागः। विश्वरूपस्य भावो वैश्वरूप्यम्। बहुरूपमित्यर्थः। तस्य। त्रैलोक्यं पञ्चसु महाभूतेष्वविभागं गच्छति। पञ्चमहाभूतानि तन्मात्रेष्वविभागं गच्छन्ति। पञ्चतन्मात्राण्येकादशेन्द्रियाणि चाहङ्कारे। अहङ्कारो बुद्धौ। सा च प्रधाने। इत्थं त्रयो लोकाः प्रलयकाले प्रधानेऽविभक्ताः। प्रकर्षेण धीयते स्थाप्यते अत्राखिलमिति प्रधानम्। ततो हि सृष्टौ सदेवाविर्भवति। न ह्यसत उत्पत्तिर्न च सतोऽभावः।

'नासतो विद्यते भावो नाभावो विद्यते सतः।'

इति गीतासु (२।१६)। 'सदेव सोम्येदमग्र आसीत्' [छा० उ० ६।२।१) इति श्रुतेश्च। तद्यथा—दध्यादयः प्राक् प्रसूतेः क्षीरेऽविभक्ताः सन्त्येव। यद्यसत उत्पत्तिस्तदा काष्ठखण्डादपि घटाद्युत्पत्तिः स्यात्। यतो न भवति। तस्मान्मृत्पिण्डे कारणे घटादेः सत एवोत्पत्तिरिति समीचीनम्। यथा जलभूम्योरेतद्रसगन्धादिवैश्वरूप्यमविभक्तमस्त्येव स्थावराणां जङ्गमेषु जङ्गमानां स्थावरेषु। एवं जात्यनुच्छेदेन सर्वं सर्वात्मकमिति ॥ १५ ॥

अस्ति प्रधानं यत्र महदादिलिङ्गमविभागं गच्छति। इत्येवमवश्यम्भावी अविभागः पश्चाद्विभागश्चाविर्भवति तत्प्रधानम्। अत्रोच्यते—

कारणमस्त्यव्यक्तं प्रवर्तते त्रिगुणतः समुदयाच्च।

परिणामतः सलिलवत् प्रतिप्रतिगुणाश्रयविशेषात् ॥ १६ ॥

कारणमस्त्यव्यक्तमिति। तदेवं पञ्चभिरेभिर्हेतुभिर्ज्ञायतेऽस्ति तत्कारणमेकमस्य जगतोऽव्यक्तं मूलमिति। अत्राह यद्येकं प्रधानं कथं तर्हि अनेकं कार्यमुत्पादयति। तथा हि नैकस्तन्तुः पटाख्यं कार्यं जनयति। इत्थं प्रधानमेकमनेकं कार्यं जनयतीति न जाघटीति। अतः समाधीयते—प्रवर्तते त्रिगुणतः। प्रधाने हि सत्त्वरजस्तमसामवस्थानाद् बहुत्वसम्भवः। तस्मात्त्रिगुणतः प्रवर्तते त्रिधा व्यवहारः। समुदयाच्च। यथा गङ्गायां स्रोतांसि समुदितानि गङ्गामारभन्ते, यथा वा तन्तवः समुदिताः पटं कुर्वन्ति एवं सत्त्वरजस्तमांसि त्रयो गुणाः समुदिताः प्रधानस्था व्यक्तं कुर्वन्ति। अत्राह—इह लोके द्विविधं कारणं परिणामकत्वादपरिणामकत्वाच्च।

तत्रापरिणामकत्वान्मृत्पिण्डदण्डसूत्रोदकविदलान् पश्यामः। परिणामतश्च क्षीरं दधीति। तत्र प्रधानं कथं कारणमित्यत्रोच्यते—परिणामतः। यथा क्षीरं दधिभावेन परिणमति, यदेव क्षीरं तदेव दधि, एवं प्रधानं व्यक्तभावेन परिणमति। दधिवद् व्यक्तं क्षीरवत् प्रधानमित्यर्थः। यदेवाव्यक्तं तदेव व्यक्तमिति। तस्मादुच्यते परिणामतः प्रधानं कारणमिति। अत्राह को दृष्टान्तः? तदुच्यते—सलिलवत्। यथा सलिलमेकं हिमवद् हिमभावेन परिणमति, यथा चेक्षुरसो रसिकाषण्डमत्सरिकाशर्कराफाणितगुडभावेन परिणमति। यथा वा क्षीरं द्रप्स्यदधिमस्तुनवनीतघृतारिष्टकिलाटकूर्चिकादिभावेन परिणमति। एवमेवाव्यक्तम् आध्यात्मिकेन बुद्ध्यहङ्कारतन्मात्रेन्द्रियभूतभावेन परिणमति, आधिदैविकेन शीतोष्णवातवर्षादिभावेन परिणमति। अत्राह—एकस्मात्प्रधानाद् उत्पन्नास्त्रयो लोकाः कथं विषमाः? इह ये देवास्ते सुखिनो मनुष्यास्ते दुःखिनस्तिर्यञ्चो मूढाः। एकस्मात्प्रधानादुत्पन्नानां त्रयाणां लोकानां कथं वैषम्यं मूढत्वादिनेत्यत्रोच्यते—प्रतिप्रतिगुणाश्रयविशेषात्[1]। तद्यथा—एकरसमन्तरिक्षाद् जलं पतितम्। तच्च मेदिनीं प्राप्य नानारसतां याति। पृथग्भाजनविशेषात्। एवमिमे त्रयो लोका एकस्मादपि प्रधानादुत्पन्ना गुणवैषम्यात् पृथग्भावं गताः। यथा देवेषु सत्त्वमुत्कटं ततस्ते सुखिनः, तत्रापि रजस्तमसी गौणतया स्तः। मनुष्येषु रज उत्कटं ततस्ते दुःखिताः, तेष्वपि सत्त्वतमसी स्तः। तिर्यग्योनिगतेषु तम उत्कटं ततस्ते मूढाः। तेष्वपि सत्त्वरजसी स्तः। एवमेकस्मादुत्पन्नानां त्रयाणां लोकानां वैषम्यं भवति ॥ १६ ॥

एवं द्वाभ्यामार्याभ्यां प्रधानस्याधिगमः कृतः। अत ऊर्ध्वं पुरुषस्याधिगमं करिष्यामः। अत्राह—केचिदाचार्या इति मन्यन्ते शरीरेन्द्रियबुद्ध्यादिव्यतिरिक्तो नास्ति परमात्मा। अपि च—

एतावानेव पुरुषो यावदिन्द्रियगोचरः। इति।

अत्रोच्यते—शरीरेन्द्रियबुद्ध्यादिव्यतिरिक्त आत्मा अस्तीति। को दृष्टान्तः? यथा असिकोशवत्। मुञ्जेषीकावत्। उक्तं च—

मशकोदुम्बरेषीकामुञ्जमत्स्याम्भसां यथा।
एकत्वेऽपि पृथग्भावस्तथा क्षेत्रात्मनोर्नृप ॥

---

१. प्रतिप्रतीति वीप्सा गुणानामाश्रयस्तस्य विशेषस्तं गुणाश्रयविशेषं प्रतिनिधाय अङ्गीकृत्य गुणाश्रयविशेषं परिणामात्प्रवर्तते।

एवं शरीरेन्द्रियबुद्ध्यादिभिः क्षीरनीरवदेकीभूतोऽपि तद्व्यतिरिक्तोऽस्ति परमात्मा पुरुषोऽपि। प्रधानवत् सूक्ष्मत्वान्नोपलभ्यत इति तदधिगमाय हेतुरभिधीयते—

सङ्घातपरार्थत्वात् त्रिगुणादिविपर्ययादधिष्ठानात्।
पुरुषोऽस्ति भोक्तृभावात् कैवल्यार्थप्रवृत्तेश्च ॥ १७ ॥

अस्ति पुरुषः। सङ्घातपरार्थत्वात्। यतः सङ्घातश्च परार्थः। तस्माद् हेतोः। इह लोके ये सङ्घातास्ते परार्था दृष्टाः पर्यङ्करथशरणादयः। एवं गात्राणां महदादीनां सङ्घातः समुदायः परार्थ एव। (तस्मादस्ति नूनमन्योन्याधिष्ठितो यदर्थोऽयं सङ्घात इति सङ्गतिः।) पर्यङ्करथादयः काष्ठसङ्घाताः। गृहादयः काष्ठेष्टकादिसङ्घाताः। न हि ते रथगृहपर्यङ्कादयः किमपि स्वार्थं साधयन्ति। न वा परस्परार्थाः। किं त्वस्त्यसौ देवदत्तादिर्योऽस्मिन् पर्यङ्के शेते रथेन गच्छति गृहे निवसतीति। (चेतसः प्रतीत्या)। एवममी महदादयश्चक्षुरादयो न स्वार्था न च परस्परार्थाः, किं तु परार्थाः। यश्चासौ परः स चात्मा। तस्मादनुमीमहे अस्ति पुरुषः, यस्यार्थे चक्षुरादिसङ्घातः शरीरमुत्पन्नमिति। इतश्चास्ति—त्रिगुणादिविपर्ययात्। त्रयो गुणा यस्य गणस्यादौ सम्भवन्ति स त्रिगुणादिः। त्रिगुणादेर्विपर्ययः। तस्मात्पश्यामोऽस्ति पुरुष इति। उक्तं पूर्वस्यामार्यायां त्रिगुणमविवेकीत्यादि व्यक्तप्रधानसाधर्म्यम्। 'तद्विपरीतस्तथा च पुमान्' इति। अगुणविवेक्यविषयासामान्यचेतनाप्रसवधर्मादिविपर्ययादात्मनोऽस्तित्वं पृथक्त्वं च सिद्धम्। अतश्चास्ति। अधिष्ठानात्। न ह्यन्तरेणाधिष्ठातारं भवति वस्तुजातम्। तद्यथेह लोके लङ्घनप्लवनधावनसमर्थैरश्वैर्युक्तो रथः सारथिनाधिष्ठितः प्रवर्तते। अथ सारथिनानधिष्ठितः प्रवर्तते ततः शरीरनाशः स्यात्। न चात्मविनाशाय प्रवर्तते। अपि चोक्तं षष्टितन्त्रे—'पुरुषाधिष्ठितं प्रधानं प्रवर्तते' इति। ततः पश्यामोऽसौ परमात्मा अस्ति पुरुषो येनाधिष्ठितं प्रधानं महदहङ्कारतन्मात्रेन्द्रियभूतान्युत्पादयति। तस्मादस्ति पुरुष इति। इतश्चास्ति—भोक्तृभावात्। इह मधुराम्लतिक्तलवणकटुकषायाः षड् रसाः। एतैः षड्भी रसैर्युक्तं भोजनं दृष्ट्वा भोक्ता साध्यते। अस्ति भोक्ता यस्येदं भोजनम्। एवमिदं व्यक्ताव्यक्तं दृष्ट्वा साधयामोऽस्त्यसौ परमात्मा पुरुषो यस्येदं भोक्तुर्व्यक्ताव्यक्तं भोग्यमिति। इतश्चास्ति—कैवल्यार्थप्रवृत्तेश्च। केवलभावः कैवल्यं मोक्ष इत्यर्थः। या तस्य प्रधानस्य प्रवृत्तिः सा कैवल्यार्था प्रवृत्तिः प्रधानस्येति ॥ १७ ॥

अत्राह—गृह्णीमस्तावदेभिः पञ्चभिरधीतैर्हेतुभिः शरीरव्यतिरिक्तोऽसौ पुरुषोऽस्तीति। स किं सर्वशरीरेष्वेकः पुरुष आहोस्वित् प्रतिशरीरं भिन्नः पुरुष इति। कुतः संशय इति चेच्चोदक आचार्यविप्रतिपत्तेः संशयः। इह केचिदाचार्या भेदवादिन इति मन्यन्ते—एकोऽयं पुरुषः सर्वशरीरेषूपलभ्यते मणिसूत्रवत्। इह रसनायां यावन्तो मणयस्तेषु सर्वेष्वेकमेव सूत्रं प्रवर्तते। एवं मणिभूतेषु शरीरेषु किमेकः सूत्रभूतः परमात्मा। आहोस्विज्जलचन्द्रवत् पुरुष इति एक एव बहुषु नदीकूपतडागादिष्विवोपलभ्यते इति। अतः संशयः किमेकः पुरुषो गुणसूत्रन्यायेन आहोस्विद् बहवः पुरुषाः। अत्रोच्यते—बहवः पुरुषाः कथमिति चेत्तदुच्यते—

जन्म[1]मरणकरणानां प्रतिनियमादयुगपत्प्रवृत्तेश्च।
पुरुषबहुत्वं सिद्धं त्रै[2]गुण्यविपर्ययाच्चैव ॥ १८ ॥

जन्ममरणकरणानामिति। जन्मनियमादिह केचिन्नीचजन्मानः, केचिन्मध्यमजन्मानः, केचिदुत्कृष्टजन्मानः। यदि पुनरेकः पुरुषः स्यात्स एव नीचकुलोत्पन्नः स्यात् स एव उत्कृष्टकुलोत्पन्नः स्यात्। कस्मात्? पुरुषैकत्वात्। अस्ति चायं नियमः, अन्येऽधमा अन्य उत्कृष्टाः। तस्माद्बहवः पुरुषाः। अतश्च—मरणनियमात्। मरणेऽपि नियमो दृष्टो मम भ्राता मृतो मम पिता च। तस्माद्बहवः पुरुषाः। अपरे पुनरित्थङ्कारं वर्णयन्ति—जन्ममरणनियमात्। इह कश्चित्कदाचिन्म्रियते तदैव परो जायते। यद्येकः पुरुषः स्यात् तर्हि एकस्मिन् जायमाने सर्वेऽपि जायेरन्। न चैवम्। म्रियमाणे सर्वे म्रियेरन्। न चैवम्। तस्माद्बहवः पुरुषाः। इतश्च पश्यामः। करणनियमात्। करणानीन्द्रियाणि श्रोत्रादीनि। इह लोके केचिद्बधिरान्धमूकादयः। इतरे च पटुतरकरणाः। अतः पश्यामो य उपहतेन्द्रियास्ते अन्ये, ये चानुपहतेन्द्रियास्ते चान्ये। तस्मात्प्रतिनियतकरणत्वादपि पश्यामोऽनेके पुरुषा इति। [3]इतश्च पश्यामः। त्रैगुण्यविपर्ययाच्चैव। चः समुच्चये। पूर्वोक्तैर्हेतुभिः। अस्माच्च हेतोरित्यर्थः। इहैकस्य ब्राह्मणस्य त्रयः पुत्राः सब्रह्मचारिण एकेनैव एकस्यां भार्यायां जाताः। तत्रैकः सात्त्विको मेधावी शुचिः सुखी।

---

१. 'जनन०' इति तु क्वचित् पाठः।

२. 'त्रि०' इति पाठः क्वचित्।

३. अत्र 'अयुगपत्प्रवृत्तेश्च' इत्यस्य व्याख्यानग्रन्थस्त्रुटितो भाति।

द्वितीयो राजसो दुर्मेधावी दुःखी। तृतीयस्तामसो मूढो नास्तिकः। यद्येक आत्मा स्यादेकस्मिन् सात्त्विके राजसे तामसे वा सर्वे तथा स्युः। न तथा भवन्ति। अतः पश्यामोऽनेके पुरुषाः ॥ १८ ॥

अत्राह—अयं संशयः। किं खलु कर्त्ता पुरुषोऽस्त्याहोस्विदकर्तेति। कुतः संशय इति चेत्, आचार्यविप्रतिपत्तेः। लोके तावत् पुरुषो गच्छति धावति तिष्ठति शोचति, पुरुषेणेदं कृतमिति विप्रतिपत्तिः। एवमाचार्या वेदवादिनो ब्रुवते। वैशेषिका अपि कर्ता इति मतं प्रतिपन्नाः। अतः संशयः। अत्रोच्यते—अकर्ता पुरुषः। कथमिति चेत्तदुच्यते—

तस्माच्च[1] विपर्यासात् सिद्धं साक्षित्वमस्य पुरुषस्य।
कैवल्यं माध्यस्थ्यं द्रष्टृत्वमकर्तृभावश्च ॥ १९ ॥

तस्माच्च विपर्यासादिति। [2]कर्तृकारणानां को विशेषः अत्रोच्यते। तद्यथा कश्चिद्यमनियमरतः साङ्ख्ययोगाचार्यरतो भिक्षुर्नगरे प्रतिवसति। स च जनादिषु प्रतिवर्णाश्रमविहितासु क्रियासु प्रवर्तमानानां तन्नगरवासिनां साक्षिमात्रो भवति। ऋतुवशात् शीतोष्णादीनायातानुनुभवति। तद्वदयं नानावस्थे गुणविमर्दे वर्तमानो वैधर्म्यात् क्षेत्रज्ञः साक्षिमात्रः स्यात्। एवं साक्षित्वं सिद्धमस्य पुरुषस्य। केवलभावः कैवल्यं नाम त्रिभ्यो गुणेभ्योऽन्यत्वम्। यथाऽसौ भिक्षुः कदाचिन्नागराणां विवदतां[3] वक्ता भवति त्वया साधुकृतमिति त्वयाऽसाध्विति। किमेवं पुरुषो भवति। अत्रोच्यते—माध्यस्थ्यम्। नास्य केन चित्कृत्यमस्ति। उदासीनो ह्ययम्। [4]अत्राह—यद्यकर्त्ता तत्किं परकृतानां प्रयोक्ता। अत्रोच्यते—कर्तृभावश्च द्विविधो हि, प्रयोक्ता कर्ता च। अत्रोदासीनस्य पुरुषस्य कर्तृत्वं प्रतिषिद्धं गुणलक्षणेन॥ १९ ॥

अत्राह—यद्यकर्ता पुरुषः अध्यवसायं ताह किं करोति धर्मं करिष्याम्यधर्मं चेति। यदि गुणा अध्यवसायं कुर्वन्ति तर्हि तेषां सचेतनत्वं

---

१. पूर्वोक्तत्रिगुणविपर्ययाद् वैपरीत्यात् त्रैगुण्यस्य। निर्गुणः पुरुषो विवेकीति विपर्यय उक्तः, तस्मात्सत्त्वरजस्तमःसु कर्तृभूतेषु साक्षित्वं सिद्धं पुरुषस्य, गुणा एव प्रवर्त्तन्ते कर्तारः। साक्षी न प्रवर्तते नापि निवर्तते।

२. अत्रापि ग्रन्थस्त्रुटितो भाति।

३. आर्षोऽयं प्रयोगः। विवदमानानामित्येव साधु।

४. अत्र 'अत एव द्रष्टा अत एव अकर्ता' इत्यपेक्षितः।

036210

स्यात्। अमीषां चाचेतनत्वमेव प्रागुपन्यस्तम्। अथ पुरुषोऽध्यवसायं कुरुते तदा तस्य कर्तृत्वप्रसङ्गः। तस्मादुभयथापि दोष इति। अत्र समाधीयते नायं दोषः। कथमिति चेत्, तदुच्यते—

तस्मात्तत्संयोगादचेतनं चेतनावदिव लिङ्गम्।
गुणकर्तृत्वेऽपि[1] तथा कर्तेव भवत्युदासीनः ॥ २० ॥

यस्माच्चेतनस्वभावः पुरुषः, तस्मात् तत्संयोगादचेतनं महदादि लिङ्गम् अध्यवसायाभिमानसङ्कल्पालोचनादिषु वृत्तिषु चेतनावत् प्रवर्तते। को दृष्टान्तः—तद्यथा अनुष्णाशीतो घटः शीताभिरद्भिः संस्पृष्टः शीतो भवति। अग्निना संयुक्त उष्णो भवति। एवं महदादि लिङ्गमचेतनमपि भूत्वा चेतनावद्भवति। तस्मादध्यवसायं कुर्वन्ति गुणाः कार्यादिषु। यदप्युक्तम्—लोकोपचारात् कर्ता पुरुष इति। अत्र ब्रूमः—गुणकर्तृत्वेऽपि तथा कर्तेव भवत्युदासीनः। अत्र दृष्टान्तश्च। केचित्किल चौरा ग्रामं हत्वा द्रव्यं गृहीत्वा ग्रामान्तरं गच्छन्ति कृतकार्याः। तैः सह सार्थेन श्रोत्रियो ब्राह्मणः पन्थानं गच्छति। तत्पदानुसारिभिरारक्षिभिस्ते गृहीताः। कृतापराधैस्तैः सह सोपि ब्राह्मणो गृहीतस्त्वमपि चौर इति। तद्यथाऽसावचौरस्तत्संसर्गदोषेण चौरतया प्रतीतस्तैः। तथा सत्त्वादयो गुणाः कर्तारस्तैः संयुक्तः पुरुषोऽपि अकर्त्ताऽपि कर्ता भवति। कर्तृसंसर्गात् कर्तेव। परं परमार्थतया अकर्ता पुरुषः॥ २० ॥

अत्राह—तस्मात्तत्संयोगात् इति प्रधानपुरुषसंयोग इति चेत्, संयोगः कः। अनेकविधो हि संयोगः। अन्यतरकर्मजो यथा स्थाणुश्येनयोः, [2]सम्पातजो द्वयोर्वा संयोगो यथा द्व्यङ्गुलाकाशयोः, स्वाभाविको यथाग्न्युष्णयोः, शक्तिहेतुको यथा मत्स्योदकयोः, यादृच्छिकः सुपर्णयोर्वाऽऽकस्मिकः। अतः संशयः। अत्रोच्यते—अन्यतरकर्मजसंयोगश्च[3] संयोगो नैव प्रधानपुरुषयोर्विभुत्वान्निष्क्रियत्वात्। नास्ति स्वाभाविकोऽपि। तयोर्नित्यत्वान्मोक्षाभावः स्यादवियोगत्वात्। एवमेव विषयहेतुके शक्तिहेतुकत्वे च। अत्राह—कस्तर्हि प्रधानपुरुषयोः संयोग इति। अत्रोच्यते। अर्थहेतुकः। कश्चासावर्थ इत्यत्राह—

---

१. 'गुणकर्तृत्वे च' इति पाठस्तु गौडपादयुक्तिदीपिकाकारयोः सम्मतः।

२. अत्र 'उभयकर्मज' इत्यधिकोऽपेक्षितः। अग्रे च 'द्व्यङ्गुलाकाशयोः' इत्यत्र द्वयोरङ्गुल्योरिति पाठः समीचीनः।

३, 'अन्यतरकर्मज उभयकर्मजश्च संयोगः' इति पाठः समीचीनः।

पुरुषस्य दर्शनार्थं कैवल्यार्थं[1] तथा प्रधानस्य।
पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः ॥ २१ ॥

पुरुषस्य तावद्दर्शनार्थं संयोगः। पुरुषः प्रधानेन सह संयुज्यते सुगुणां प्रकृतिं द्रक्ष्याम्ययमर्थः। कैवल्यार्थं तथा प्रधानस्य संयोगः। अस्य तपस्विनः पुरुषस्य ज्ञाने वर्तमानस्य कैवल्यं करिष्यामीति। कैवल्यं मोक्ष इत्यर्थः। यथा राजा पुरुषेण संयुज्यते प्रैषणं मे करिष्यतीति। पुरुषोऽपि राज्ञा संयुज्यते वृत्तिं मे दास्यतीति। एवं तावद्राजपुरुषयोरर्थहेतुकः सम्बन्धः। तथा प्रधानपुरुषयोरप्यर्थहेतुकः सम्बन्धः संयोगः। किं चान्यत्। पङ्ग्वन्धवदुभयोरपि संयोग इति। अपि चात्र दृष्टान्तः। यथा किल कश्चिदन्धः सार्थेन समं पाटलिपुत्रं प्रस्थितः स च सार्थश्चौरैरभिहतः। अन्धोऽपि अवशेषजीवितः कृच्छ्रेण महता निर्जगाम। स च सर्वस्वजनविरहित इतश्चेतश्च परिभ्राम्यन् पन्थानमपश्यन् समन्ताच्चङ्क्रममाणः केनचिद्वनमध्यस्थेन पङ्गुना दृष्टः प्रोक्तश्च। भोभो अन्ध मा भैषीरहं पङ्गुर्मार्गदर्शने कुशली गन्तुमसमर्थः। अन्धेन प्रतिवचनं प्रोक्तम्—भोः पङ्गो यथा भवान् गमनाशक्तस्तथाऽहमपि न शक्नोमि द्रष्टुं, गन्तुं मम सामर्थ्यमस्ति। तव दर्शनसामर्थ्येनाहं भवन्तं स्कन्धेनादाय गच्छाम्येवमुभयोर्दुःखपरिहारलक्षणा कार्यसिद्धिरस्तु। एवं तयोर्यथा स्वार्थलब्धिहेतुकः सम्बन्धः संयोगस्तुल्यः। तद्वत्। पङ्ग्वन्धवत् प्रधानपुरुषौ द्रष्टव्यौ। पङ्गुवत् पुरुषो द्रष्टव्यः। अन्धवत् प्रधानम्। पुरुषस्य दृक्शक्तिः। प्रधानस्य क्रियासामर्थ्यम्। [2]एवं प्रधानमपि पुरुषस्य मोक्षं कृत्वा निवर्तते। पुरुषः प्रधानं दृष्ट्वा मोक्षं गच्छति। किं चान्यत्—तत्कृतः सर्गः। तच्छब्देन प्रधानपुरुषौ सम्बध्येते। ताभ्यां प्रधानपुरुषाभ्यां कृतस्तत्कृतः सर्गः। तद्यथा—स्त्रीपुरुषसंयोगात् पुत्रः सम्भवति। एवं प्रधानपुरुषसंयोगात्सर्गोत्पत्तिर्भवति। सर्गशब्देन महदादिलिङ्गोत्पत्तिरिति ब्रुवते ॥ २१ ॥

तामुत्पत्तिं ब्रूमः—

प्रकृतेर्महांस्ततोऽहङ्कारस्तस्माद्गणश्च षोडशकः।
तस्मादपि षोडशकात् पञ्चभ्यः पञ्च भूतानि ॥ २२ ॥

---

१. 'दर्शनार्थः पुरुषार्थः' इति युक्तिदीपिकासम्मतः पाठः।

२. अत्र 'यथा चानयोः पङ्ग्वन्धयोर्विभागो भविष्यतीप्सितस्थानप्राप्तयोः' इत्यधिकः पाठोऽपेक्षितः।

प्रकृतिः प्रधानमधिकुरुते। ब्रह्म अव्यक्तं बहुधात्मकं मायेति पर्यायाः। तस्याः प्रकृतेर्महानुत्पद्यते प्रथमः कश्चित्। महान्, बुद्धिः, मतिः, प्रज्ञा, संवित्तिः, ख्यातिः, चितिः, स्मृतिरासुरी हरिः, हरः, हिरण्यगर्भ इति पर्यायाः। ततोऽहङ्कारः। तस्मान्महतोऽहङ्कार उत्पद्यते। तस्य इमे पर्यायाः—वैकृतस्तैजसो भूतादिरभिमानोऽस्मिता इति। चतुःषष्टिवर्णैः[1] परादिवैखरीपर्यन्ताभिधेयैर्यत्किमप्यभिधीयते बुद्ध्या समर्थ्य तत्सकलमाद्यन्ताकारहकारवर्णद्वयग्रहणेनोपरिस्थितपिण्डीकृतानुकारिणा बिन्दुना भूषितः प्रत्याहारन्यायेनाहङ्कार इत्यभिधीयते। तस्मात् अहङ्कारात् षोडशको गण उत्पद्यते। तामसाद् भूतादिनाम्नः पञ्चतन्मात्राणि शब्दादीनि। अत एव तानि मूढानि। सात्त्विकाद् वैकृताभिधानाद् बुद्धिकर्मात्मकानि मनःसहितानि एकादशेन्द्रियाणि। अत एव तानि किञ्चिज्जानन्ति। राजसात् तैजसाभिधानादुभयम्[2]। मूढत्वाद्धि तमः। प्रकाशत्वात् सत्त्वम्। उभयगुणयोगात् षोडशको गणोऽहङ्कारादुत्पद्यते। तस्मादपि षोडशकात् मध्ये यानि पञ्च शब्दादितन्मात्राणि तेभ्यः पञ्च भूतान्याकाशादीनि। तत्र शब्दतन्मात्रादाकाशम्, स्पर्शतन्मात्राद् वायुः, रूपतन्मात्रात्तेजः, रसतन्मात्रादापः, गन्धतन्मात्रात्पृथिवी[3] इत्यादिक्रमेण पूर्वपूर्वानुप्रवेशेनैकद्वित्रिचतुष्पञ्चगुणान्याकाशादिपृथ्वीपर्यन्तानि महाभूतानीति सृष्टिक्रमः[4]। अत एव भूतानामुत्पत्तिलयाववबोधनात् भ इति। आगतिगतिपरिज्ञानात् ग इति। विदन्योगी इति व (व इति ?)। अनति चलतीति अन्। सकलवर्णसम्प्रदायाद् भगवानित्यभिमानसिद्धिः। 'अप्यक्षरवर्णसामा-

---

१. स्वरा एकविंशतिः। ह्रस्वदीर्घप्लुतप्रयोगेण अ—इ—उवर्णास्त्रिविधा नव, ऋवर्णः प्लुतहीनो द्विविधः, लृकारोऽपि द्विविध एव दीर्घहीनः, सन्ध्यक्षराणि ए ऐ इत्यादीनि एवमेवाष्टौ, एवमेकविंशतिः स्वराः। स्पर्शाः पञ्चविंशतिः। यादयो हान्ता अष्टौ अन्तःस्था ऊष्माणश्चेति। अनुनासिका पञ्च। अनुस्वारविसर्जनीयजिह्वामूलीयोपध्मानीयाः। एवं त्रिषष्टिर्वैखरी चतुःषष्टिर्मुखतः।

२. एकादशेन्द्रियाणि तन्मात्राणि च।

३. अत्र 'शब्दतन्मात्रसहितात्स्पर्शतन्मात्राद्वायुः, शब्दस्पर्शतन्मात्रसहिताद्रूपतन्मात्रात्तेजः, शब्दस्पर्शरूपतन्मात्रसहिताद्रसतन्मात्रादापः, शब्दस्पर्शरूपरसतन्मात्रसहिताद्गन्धतन्मात्रात्पृथिवी' इति पाठ उचितः।

४. भगवता कपिलेनोक्त इत्यधिकः पाठोऽत्रापेक्षित उत्तरग्रन्थस्वारस्येन।

न्यान्निर्ब्रूयान्न संस्कारमाद्रियेत' (नि० २।४) इति नैरुक्तश्रुतिप्रामाण्यात् । उक्तं च—

'उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिम् ।
वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति ॥'

श्रीविष्णुपुराणे षष्ठेंऽशे (५।७८) पराशरवचः । यदुक्तम्—व्यक्ताव्यक्तज्ञ—विज्ञानान्मोक्षः प्राप्यत इति । तत्र महदादिभूतपर्यन्तमित्येतद् व्यक्तं व्याख्यातम् । अव्यक्तमपि 'भेदानां परिमाणात्' (का० १५) इत्यादिभिः पञ्चभिर्हेतुभिर्व्याख्यातम् । [1]यदुक्तम्—

'पञ्चविंशतितत्त्वज्ञो यत्र तत्राश्रमे रतः ।
जटी मुण्डी शिखी वाऽपि मुच्यते नात्र संशयः[2] ॥ २२ ॥'

अत्राह—प्रकृतेर्महानित्युक्तम् । तस्य महतः किं लक्षणमित्यत्रोच्यते—

अध्यवसायो बुद्धिर्धर्मो ज्ञानं विराग ऐश्वर्यम् ।
सात्त्विकमेतद्रूपं तामसमस्माद्विपर्यस्तम् ॥ २३ ॥

अध्यवसायो बुद्धिरिति । अध्यवसायो निश्चयः प्रतिपत्तिः अयं स्थाणुरयं पुरुष इति बुद्धेर्लक्षणम् । सा च बुद्धिरष्टाङ्गा । सात्त्विकतामसरूपभेदात् । तत्र बुद्धेः सात्त्विकं रूपं चतुर्विधं भवति धर्मो ज्ञानं वैराग्यमैश्वर्यमिति । तत्र धर्मो नाम वर्णिनामाश्रमिणां च समयाविरोधेन यः प्रोक्तो यमनियमलक्षणः स धर्मः । तत्र पञ्च यमाः पञ्च नियमाः । 'अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः' (पा० यो० सू० २।३०) । 'शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः' (पा० यो० सू० २।३२) । एभिर्यमनियमैर्यः साध्यते स धर्मः ।

धारणार्थो धृञित्येष धातुः शाब्दैः प्रकीर्तितः ।
दुर्गतिप्रपतत्प्राणिधारणाद् धर्म उच्यते ॥

तत्र या स्थावरजङ्गमानां भूतानां वाङ्मनःकायकर्मभिरद्रोहता सा अहिंसा । तथा यद् भूतहितमत्यन्तं दृष्टश्रुतानुमितिविज्ञातेष्वर्थेषु यथाऽन्तःकरणप्रत्ययोपस्थितं तथैव इन्द्रियाणि अविलुप्य वञ्चनाभ्रान्ति-

१. 'पुरुषोऽपि सङ्घातपरार्थत्वादिभिर्हेतुभिर्व्याख्यातः । एवमेतानि पञ्चविंशतितत्त्वानि यस्तैस्त्रैलोक्यं व्याप्तं जानाति स मुच्यते' इत्यधिकमत्रापेक्षितम् ।

२. श्लोकोऽयं पञ्चशिखाचार्योक्त इति सांख्यतत्त्वयाथार्थ्यदीपने (सू० ३) भावागणेशः ।

प्रतिपत्तिबन्ध्यताविरहितवागुच्चारणं तत् सत्यम् । तथा यत्सम्भ्रमेष्वन्येषु वाऽऽत्यन्तिकेषु प्रयोजनेषु स्वे स्वे स्थाने समत्वाद् ग्रहणस्योपरमस्तदस्तेयम् । तथा स्त्रीपुरुषसंयोगे परस्परलिङ्गसंयोगे शब्दस्पर्शरसरूपगन्धेषु यः सङ्गव्युदासः श्रोताद्युपरतिः असङ्कल्पश्च मनस उपरतिः सोऽष्टाङ्गं ब्रह्मचर्यम् । एवं ह्याहुः संयोगशब्दस्पर्शरसरूपगन्धसङ्कल्पस्मृतिधर्मफलत्यागाद्यष्टाङ्गं ब्रह्मचर्यमिति । अन्यच्च । ब्रह्मबीजं रेतस्तच्चरति न मुञ्चतीति ब्रह्मचारी । ब्रह्म वेदं वा गुरुणा प्रदत्तं चरतीति । ब्रह्मा स्वयम्भूस्तस्यायं दण्डकमण्डलुधारणादिरूप आकारो ब्रह्मवच्चरतीति वा । एवमर्जनक्रयविक्रयादिकल्पनाभेदानामनुपादानं सर्वथा सर्वस्यास्वीकरणमपरिग्रहः । इति पञ्च यमाः । [1]यश्चेन्द्रियाणामन्तःकरणोपरमस्तच्छौचं बाह्यं मृज्जलादिना ।

'अभक्ष्यपरिहारस्तु संसर्गश्चाप्यचिन्तितैः ।
स्वधर्मे च व्यवस्थानं शौचमेतत्प्रकीर्तितम् ॥'[2]

तथा यद्भैक्षार्जितेन हविषा प्राणयात्रा । आध्यात्मिकस्याग्नेर्मन्त्रगृहीतेन होमः कर्तव्यः । अहन्यहनि यज्ञशेषाशनार्थमेतदाहारलाघवं सन्तोषः । "स यां प्रथमामाहुतिं जुहुयात् प्राणाय स्वाहा" (छा० उ० ५।१९।१) इत्यारभ्य "स य इदमविद्वानग्निहोत्रं जुहोति यथाङ्गारानपोह्य भस्मनि हुतं (जुहुयात् ?) तादृक् तत्स्यात्" (छां० उ० ५।२४।१) इति श्रुतेः । तपः कृच्छ्रचान्द्रायणादि शरीरशोषणरूपम् ।

'विषया विनिवर्तन्ते निराहारस्य देहिनः ।' (गीता, २।५९)

इति स्मरणात् । नातपस्विनो योगः सिद्ध्यति । अनादिवासनाविचित्रा प्रत्युपस्थितविषयजाला चाशुद्धिर्नान्तरेण तपः सम्भेदमापद्यत इति तपस उपादानम् । तच्च चित्तप्रसादनमबाधमानमासेव्यमिति मन्यन्ते । स्वाध्यायः प्रणवादिपवित्राणां जपः । ईश्वरप्रणिधानं क्रियाणां परमगुरावर्पणं तत्फलसंन्यासो वा । "ब्रह्मार्पणं ब्रह्महविः (गी०,४।२४)" इति, "अनाश्रितः कर्मफलम् (गी०, ६।१)" इति श्रवणात् । इत्यमीषां यमनियमादीनां सेवनात् "अहिंसाप्रतिष्ठायां तत्सन्निधौ वैरत्यागः" (पा० यो० सू० २।३५) इत्याद्याः सिद्धयः । वैपरीत्ये तु "वितर्कबाधने प्रतिपक्षभावनम्' (पा० यो० सू० २।३३), "वितर्का हिंसादयः कृतकारितानुमोदिता लोभक्रोधमोहपूर्वका दुःखाज्ञानानन्तफला इति प्रति-

१. अत्र किञ्चित् त्रुटितं भाति ।

२. इत्येकादशीतत्त्वस्मृतं बृहस्पतिवचनम् ।

पक्षभावनम्" (पा० यो० सू० २।३४) एवं च वर्तमानस्य योगिनः "स्थान्युपनिमन्त्रणे सङ्गस्मयाकरणं पुनरनिष्टप्रसङ्गात्" (पा० यो० सू० ३।५१) इति भिक्षोरेते यमनियमाः । एभिर्यमनियमैर्वा साध्यते स धर्मो व्याख्यातः । अधुना ज्ञानमाह—ज्ञानं द्विविधम् । बाह्यमाभ्यन्तरं च । तत्र बाह्यम्—वीणापणवगन्धर्वचित्रकथागणितव्याकरणशास्त्राणि । आभ्यन्तरम्—गुणपुरुषान्तरोपलब्धिलक्षणम् । अन्ये गुणाः सत्त्वरजस्तमांसि अन्यः पुरुष इति । बाह्येन ज्ञानेन लोकोपपत्तिराभ्यन्तरेण मोक्ष इति । एतत् ज्ञानं विषयोपरमात् । वैराग्यमाह—[1]अर्जनरक्षणक्षयातृप्तिहिंसादिदोषान् दृष्ट्वा यो विषयेभ्यो विरक्तस्तस्य मोक्षो नास्तीति । आभ्यन्तरेण ज्ञानपूर्वकेण वैराग्येण मोक्षो भवति बाह्येन संसार इति । ऐश्वर्यं ईश्वरभावेनेत्यष्टविधम् । अणिमा लघिमा गरिमा महिमा प्राप्तिः प्राकाम्यमीशित्वं वशित्वं यत्रकामावसायित्वमिति[2] । एतानि धर्मादीनि चत्वारि सात्त्विकरूपाणि बुद्धेः । यदा सत्त्वेन रजस्तमसी अभिभूते स्तस्तदा सत्त्वोद्रिक्तः पुमानेतान् गुणानाप्नोति । किं चान्यत् । तामसमस्मात् विपर्यस्तम् । अस्मात् सात्त्विकाद्धर्मादेर्विपर्यस्तं विपरीतम् अधर्माज्ञानाद्यं चतुर्धा बुद्धे रूपं तामसम् । ये हिंसादयो वितर्का एकाशीतिभेदाः । पृथग् दशापि यमनियमाद्याः[3] । तथा अधर्मोऽज्ञानमवैराग्यमनैश्वर्यमित्यष्टधा सात्त्विकतामसभेदा बुद्धिः । अस्या एवम्विधाया बुद्धेरहङ्कारो जायते ॥ २३ ॥

इदानीमहङ्कारस्य लक्षणं व्याख्यास्यामः । तदुच्यते—

अभिमानोऽहङ्कारस्तस्माद्द्विविधः प्रवर्तते सर्गः ।
ऐन्द्रिय एकादशकस्तन्मात्रपञ्चकश्चैव[4] ॥ २४ ॥

---

१. अत्र 'वैराग्यमपि द्विविधम् । आभ्यन्तरं बाह्यं च । आभ्यन्तरं प्रधानमप्यत्र स्वप्नेन्द्रजालसदृशमिति विरक्तस्य मोक्षेप्सोर्यदुत्पद्यते तत्' इत्यधिकमपेक्षितम् ।

२. यत्र कामावसायित्वशब्दस्तान्त्रिक्या परिभाषया सत्यसङ्कल्पत्वार्थः। यत् यदर्थत्वेन सङ्कल्पयति तत् तस्मै प्रयोजनाय कल्पते विषमप्यमृतकार्ये सङ्कल्प्य भोजयन् जीवयति न मारयतीत्यर्थः ।

३. अत्र त्रुटितं भाति ।

४. 'एकादशकश्च गणस्तन्मात्रः पञ्चकश्चैव' इति गौडपादसम्मतः, '०गणस्तन्मात्रपञ्चकश्चैव' इति च वाचस्पतिसम्मतः पाठः ।

अभिमानोऽहङ्कार इति । रूपे[1] अहम् रसे अहम् गन्धे अहम् , अहं विद्वान् , अहं दर्शनीय इत्येवमाद्यभिमानोऽहङ्कारः । तस्मात् अभिमानलक्षणादहङ्काराद् द्विविधः प्रवर्तते सर्गः । सर्ग इति सृष्टेः पर्यायः। कश्चासौ सर्गः ? तदुच्यते । ऐन्द्रिय एकादशकः । श्रोत्रादीनीन्द्रियाणि मनःपर्यन्तानि । तन्मात्रपञ्चकश्चैव । तन्मात्राण्यत्र शब्दादीनि गन्धपर्यन्तानि । एवमेकादशेन्द्रियाणि पञ्चतन्मात्राणि चोत्पन्नानि ॥ २४ ॥

अत्राह—त्रिविधोऽहङ्कारस्तं व्याख्यास्यामः । तत्र कतरस्मादहङ्कारादिन्द्रियाण्युत्पद्यन्ते, कतरस्माद्वा तन्मात्राणीति । अत्रोच्यते—

सात्त्विक एकादशकः प्रवर्तते वैकृतादहङ्कारात् ।
भूतादेस्तन्मात्रः[2] स तामसस्तैजसादुभयम् ॥ २५ ॥

सात्त्विक इति । यदा सत्त्वमुत्कटं भवति अहङ्कारे तेन च सत्त्वेन रजस्तमसी अभिभूते स्यातां तदा सात्त्विकोऽहङ्कार उच्यते । तस्य सात्त्विकस्य वैकृतिक इति पूर्वाचार्यैः संज्ञा कृता । स वैकृतिको भूत्वा अहङ्कार एकादशेन्द्रियाणि उत्पादयति । तस्मात्सात्त्विकानीमानि त्रिशुद्धानि स्वविषयग्रहणसमर्थानि भवन्ति । तस्मादुच्यते—'सात्त्विक एकादशकः प्रवर्तते वैकृतादहङ्कारात्' इति । भूतादेस्तन्मात्रः । भूतादेस्तमोबाहुल्याद् गौणीभूतसत्त्वरजसो भूतादिनाम्नः पूर्वाचार्यैर्निरूपितादहङ्कारात् तन्मात्रः शब्दादिपञ्चको गणो जायते । अभिभूतसत्त्वतमसो राजसात् तैजसाभिधानादहङ्कारात् प्रवृत्तिकर्मण उभयं प्रकाशात्मकमेकादशेन्द्रियकं मोहात्मकं तन्मात्रिकं चासीदिति सम्बन्धः । तैजस एव राजसेऽहङ्कारे क्रियाशक्तिरस्ति । सत्त्वं निष्क्रियमेकाकि न शक्नोत्युत्पादयितुम् । तमश्च मूढत्वादक्रियमसमर्थं विना रजः सृष्टिमुत्पादयितुम् । अत उभे सत्त्वतमसी सृष्टिविषये रजसाऽनुगृहीते ऐन्द्रियकं तान्मात्रिकं च गणद्वयं जनयत इति तात्पर्यार्थः ॥ २५ ॥

तत्र कानि बुद्धीन्द्रियाणि कानि कर्मेन्द्रियाणीति ? उच्यते—

बुद्धीन्द्रियाणि श्रोत्रत्वक्चक्षूरसननासिकाख्यानि[3] ।

---

१. अत्र रू   मि रसयामि जिघ्रामि इति प्रयोगाः साधवः ।

२. '०तान्मा०' इत्यपि केचित् पठन्ति ।

३. 'चक्षुःश्रोत्रघ्राणरसनस्पर्शनकानि' इति गौडपादः पठति, 'चक्षुःश्रोत्रघ्राणरसनत्वगाख्यानि' इति च वाचस्पतिः । क्वचिच्च 'कर्णत्वक्०' इत्येवमपि पाठान्तरम् ।

वाक्पाणिपादपायूपस्थान्[1] कर्मेन्द्रियाण्याहुः ॥ २६ ॥

श्रोत्रादीनि बुद्धीन्द्रियाणीति उच्यन्ते । शब्दस्पर्शरूपरसगन्धान् बुद्ध्यन्त इति बुद्धीन्द्रियाणि । इन्द्राण्येव तानीन्द्रियाणि । इन् इति विषयाणां नाम, तानिनः विषयान् प्रति द्रवन्तीति इन्द्रियाणि । वाक्पाणिपादपायूपस्थान् कर्मेन्द्रियाण्याहुः । कर्म कुर्वन्ति कारयन्ति च । कर्मेन्द्रियाणां वृत्तिः । वाक् वदतिकर्म, हस्तौ ग्रहणकर्माणौ, पादौ विषमसमनिम्नोन्नतभूप्रदेशेषु क्रामतः, पायुर्यथाभुक्तान्नोदकमलमुत्सृजति, उपस्थ आनन्दं करोति पुत्रमुत्पादयतीत्यर्थः । एवमेताः कर्मेन्द्रियाणां वृत्तयो व्याख्याताः ॥ २६ ॥

अत्राह—मन इन्द्रियं वत् किं लक्षणमिति । अत्रोच्यते—

उभयात्मकमत्र मनः सङ्कल्पकमिन्द्रियं च साधर्म्यात् ।
गुणपरिणामविशेषान्नानात्वं [2]ग्राह्यभेदाच्च ॥ २७ ॥

उभयात्मकमत्र मनः । कर्मेन्द्रियेषु कर्मेन्द्रियम्, बुद्धीन्द्रियेषु बुद्धीन्द्रियम् । यथा देवदत्तो गोपालमध्ये स्थितो गोपालत्वं कुरुते मल्लमध्ये स्थितो मल्लत्वं कुरुते । कस्मात्? यस्माद् बुद्धीन्द्रियाणां वृत्तिं सङ्कल्पयति कर्मेन्द्रियाणां च । तस्मादुभयात्मकं मनः । किं चान्यत् । इन्द्रियं च साधर्म्यात् । सहधर्मस्य भावः साधर्म्यम् । यस्मात् कर्मेन्द्रियाणि बुद्धीन्द्रियाणि च सात्त्विकादहङ्कारादुत्पद्यन्ते, मनोऽपि तस्मादेव उत्पद्यते । तस्मादिन्द्रियं मनः । तत्र मनसः का वृत्तिः? सङ्कल्पो वृत्तिः । बुद्धीन्द्रियाणां शब्दादयो वृत्तयः, कर्मेन्द्रियाणां वचनादयः । एवमेकादशेन्द्रियाणि सह वृत्तिभिर्व्याख्यातानि । अत्राह—एकादशेन्द्रियाणि केन कृतानि पुरुषेण ईश्वरेण आहोस्वित् स्वभावेनेति कुत इयमाशङ्केति चेत्, इमान्येकादशेन्द्रियाणि एकादशविषयग्राहकाणि भवन्ति । तत्रान्तःकरणप्रधानबुद्ध्यहङ्काराद्यचेतनम् । ततश्च नूनं चेतनेन पुरुषेणेश्वरेण वा स्वभावेनेति । अत्रोच्यते—गुणपरिणामविशेषान्नानात्वं ग्राह्यभेदाच्च । सत्त्वादयस्त्रयो गुणास्ते यथा परिणमन्ति तस्माद्गुणपरिणामविशेषादिमान्येकादशेन्द्रियाणि नाना । तदर्थानि भिन्नानि । शब्दस्पर्शरूपरसगन्धाः पञ्चानां, वचनादानविहरणोत्सर्गानन्दाः पञ्चानां, सङ्कल्पश्च मनसः । एतेषामेव एकादशानामिन्द्रियाणि ग्राहकाणि भविष्यन्ति ।

१. '०पस्थाः' इति क्वचित् ।

२. 'बाह्य०' इति गौडपादवाचस्पती ।

अथैतन्नानात्वं नेश्वरेण न बुद्ध्या नाहङ्कारेण न प्रधानेन न पुरुषेण न स्वभावेन कृतम्, गुणपरिणामेनेति । यद्यपि उक्तमचेतनानां गुणानां वृत्तिरयुक्तेति । तन्न । कस्मादिति चेत्, तदुच्यते । अचेतनानामपि प्रवृत्तिर्दृष्टा । वक्ष्यति हि—

'वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य ।
पुरुषस्य विमोक्षार्थं तथा प्रवृत्तिः प्रधानस्य ॥' (का० ५७) इति ।

तस्मादचेतना अपि गुणा एकादशेन्द्रियभावेन परिणमन्ति । अत्राह—गृह्णीमस्तावदेकादशेन्द्रियाण्यहङ्कारादुत्पन्नानीति । एतेषामिन्द्रियाणां यथास्थाननिक्षेपः केन कृतः । चक्षुरुच्चैः सन्निविष्टं दूरालोकने समर्थं भविष्यतीति । शिरःप्रदेशे श्रोत्रं सन्निविष्टं दूराच्च श्रवणसमर्थं भविष्यतीति । त्वक् शरीराभ्यन्तरे बहिश्च सन्निविष्टा नानास्पर्शग्रहणसमर्था भविष्यतीति । जिह्वा अन्तर्मुखं सन्निविष्टा नानारसग्रहणसमर्था भविष्यतीति । एवं नासिका वाक्[1] । एवमिन्द्रियाणां निक्षेपः पुरुषेण वा कृत ईश्वरेण वा स्वभावेन वेति । अत्रोच्यते—इह साङ्ख्ये पुरुषेश्वरस्वभावा न कारणम् । किं तर्हि—अस्मिन्नहङ्कारे स्थितैः सत्त्वरजस्तमोभिस्त्रिभिर्गुणैर्निक्षेपः कृतः । तस्माद् ब्रूमः—'गुणपरिणामविशेषान्नानात्वं ग्राह्यभेदाच्च'[2] । गुणपरिणामविशेषादेकादशेन्द्रियाणां भेदः । ग्राह्यभेदाच्च । ग्राह्या एकादशेन्द्रियार्थास्तेषां भेदादपीन्द्रियाणां भेदः ॥ २७ ॥

अत्राह—का कस्य वृत्तिः? उच्यते—

रूपादिषु[3] पञ्चानामालोचनमात्रमिष्यते वृत्तिः ।
वचनादानविहरणोत्सर्गानन्दास्तु पञ्चानाम् ॥ २८ ॥

मात्रशब्दो विशेषार्थः । यथा भिक्षामात्रं लभ्यते नान्यो विशेषः । तथा चक्षुः । गतार्थं आलोचनमात्रमिति । एकैकस्य प्रतीन्द्रियं स्वविषयग्रहणसामर्थ्यमेव । न हि चक्षुः श्रवणसमर्थं दानादानसमर्थं वा ॥ २८ ॥

अत ऊर्ध्वं बुद्ध्यहङ्कारमनोवृत्तिं वक्ष्यामः । तदुच्यते—

स्वालक्षण्या[4] वृत्तिस्त्रयस्य सैषा भवत्यसामान्या ।

१. अत्र 'वागादि च' इति पाठोऽपेक्षितः ।

२. तुलनीयम्—'गुणपरिणामभेदान्नानात्वमवस्थावत्' इति साङ्ख्यप्रवचनसूत्रम् (२।२७)

३. 'शब्दादिषु' इति क्वाचित्कः पाठः, स तु न मनोरमः ।

४. 'स्वालक्षणम्' इति पठति वाचस्पतिः ।

सामान्यकरणवृत्तिः प्राणाद्या वायवः पञ्च ॥ २९ ॥

स्वालक्षण्येति । बुद्धेरध्यवसाय उक्तः प्राक् लक्षणम् । तस्याः स एवाध्यवसायो वृत्तिः । एवमभिमानोऽहङ्कारलक्षणम् । तस्य वृत्तिरपि स एव । मनसः सङ्कल्पो लक्षणम् । तस्यापि स एव वृत्तिः । येन येन लक्षणेनामी लक्ष्यन्ते तेषां स एव वृत्तिः । एवं या बुद्धीन्द्रियाणां न सा कर्मेन्द्रियाणाम् । या च कर्मेन्द्रियाणां न सा बुद्धीन्द्रियाणाम् । बुद्ध्यहङ्कारमनसां वृत्तिरभिहिता । साऽप्यसामान्या । अध्यवसायाभिमानसङ्कल्पलक्षणा । सैषा भवत्यसामान्या असाधारणा एवमुक्तेऽर्थात् गम्यते सामान्याऽपि साधारणाऽपि वृत्तिरस्ति । यदपेक्षयाऽसामान्येत्युच्यते । एवमिन्द्रियाणामसामान्या वृत्तिराख्याता कुलस्त्रीसंस्थानीया । अत ऊर्ध्वं सामान्या वृत्तिरुच्यते । सामान्यकरणवृत्तिः प्राणाद्या वायवः पञ्च । सामान्यकरणवृत्तिः—समस्तस्यान्तःकरणस्येत्यर्थः । प्राणाद्या वायवः पञ्चेति प्राणापानोदानसमानव्यानाः सर्वेषामिन्द्रियाणां सामान्यं कुर्वन्ति । स प्राणो नाम यो मुखनासान्तरगो बाह्ये चास्य विषये वृत्तिः । प्राणनात् प्राण एष इत्यभिधीयते । अस्मिन् प्राणे यत् स्पन्दनकर्म तत् कतमेन कृतम् इत्यत्रोच्यते—त्रयोदशविधेन करणेन कृतम् । यतश्चैवं तस्मात् प्राणकर्म सर्वस्य करणग्रामस्य वृत्तिः सामान्या । अपि चात्र दृष्टान्तः—यथा कस्मिंश्चिद् राजगृहे पञ्जरे शुकाः प्रतिवसन्ति । तेभ्यो देवदत्तेन ओदनो दर्शितः । ओदनं दृष्ट्वा सर्वे प्रचलिताः । तदा पञ्जरकमपि चलितम् । यत् पञ्जरस्य प्रचलनं कर्म तत् सर्वेषां शुकानां सामान्यम् । तद्वत् प्राणे यत् स्पन्दनकर्म तत् सर्वेषामिन्द्रियाणां सामान्यम् । किं चान्यत्—अपानेनोत्सृजति । इतश्चापक्रमणादपान इत्युच्यते । अपानबहुलश्च देवदत्तः सर्पं दृष्ट्वा अपसर्पति एषोऽपानः । तस्मिन्नपाने यत् स्पन्दनकर्म तत् सर्वेषामिन्द्रियाणां सामान्या वृत्तिः । आरोहणादर्थोत्कर्षे उदान इत्यभिधीयते । नाभिप्रदेशादुत्थितं गच्छति । उदानवृत्तिश्च देवदत्त आनन्दोत्कर्षं मृगयति । अहमाढ्योऽस्मादाढ्यतरः कथं स्यामित्येष उदानः । अस्मिन्नुदाने यत्स्पन्दनकर्म तत् सामान्या वृत्तिः सर्वेन्द्रियाणाम् । किञ्चान्यत्—हृद्यवस्थानं सहभावश्च तेन समानः । यो वायुर्हृद्देशे वर्तते स समानः । तद्बहुलश्च एकाकी न रमत एष समानः । तस्मिन् यत् स्पन्दनकर्म तत् सर्वेन्द्रियाणां सामान्यवृत्तिः । किञ्चान्यत्—शरीरव्यापितया व्यानः । आनखादाकेशान्तं शरीरं व्याप्य अनति चलतीति व्यानः । व्यानबहुलो देवदत्तश्च अत्यन्तमन्येन विना रमते ।

तस्मिन् व्याने यत् स्पन्दनकर्म तत् सर्वेषामिन्द्रियाणां सामान्यवृत्तिः । तदेवं सामान्यकरणवृत्तिः प्राणाद्या वायवो व्याख्याताः ॥ २९ ॥

वृत्तिं व्याख्यास्यामः । तदुच्यते—

युगपच्चतुष्टयस्य हि वृत्तिः क्रमशश्च तस्य निर्दिष्टा ।
दृष्टे तथाऽप्यदृष्टे त्रयस्य तत्पूर्विका वृत्तिः ॥ ३० ॥

बुद्धिरहङ्कारो मनश्चक्षुरित्येतानि चत्वारि युगपद् रूपं पश्यन्ति, अयं स्थाणुरयं पुरुष इति । एवं शब्दं स्पर्शं रसं गन्धं चत्वारि युगपद् गृह्णन्ति । एवमेषा युगपच्चतुष्टयस्य वृत्तिः । किं चान्यत् । क्रमशश्च तस्य निर्दिष्टा बुद्ध्यहङ्कारमनश्चक्षुश्चतुष्टयस्य क्रमशो वृत्तिर्भवति । द्वारिद्वारविभागोपदेशाद् ह्रस्वकालत्वाद् विभागो न शक्यते वक्तुं ततो युगपदित्युच्यते । यथा बालपत्रशतं सूच्यग्रेण विद्धमिति । तद्यथा । देवदत्तः पन्थानं गच्छन् स्थाणुं पश्यति तत्र तस्य संशयो भवति किमयं स्थाणुरुत पुरुष इति । तत्र स्थाणुरूपं पश्यति शकुनिं च तत्रस्थं ततोऽस्य बुद्धिर्भवति स्थाणुरयमिति । आकुञ्चनप्रसारणे करोति ततोऽपि पुरुषोऽयमिति प्रतीतिः । एवं बुद्ध्यहङ्कारमनश्चक्षुषां क्रमशो वृत्तिर्दृष्टा चक्षू रूपं पश्यति, मनः सङ्कल्पयति, अहङ्कारोऽभिमानयति, बुद्धिरध्यवस्यति । एवं रसनादिष्वपि द्रष्टव्यम् । किं चान्यत्—दृष्टे तथाऽप्यदृष्टे । [1]त्रयस्य तत्पूर्विका वृत्तिः । तच्छब्देन समनन्तरोक्तानि बुद्धीन्द्रियाणि भवन्ति । रूपे चक्षुःपूर्विका, शब्दे श्रोत्रपूर्विका, स्पर्शे त्वक्पूर्विका, रसे जिह्वापूर्विका, गन्धे घ्राणपूर्विका बुद्ध्यहङ्कारमनसां वृत्तिरिति ॥ ३० ॥

अत्राह—अचेतनानीन्द्रियाणि बुद्ध्यहङ्कारौ मनश्चेति केन हेतुना स्वां स्वां वृत्तिं प्रतिपद्यन्ते इत्यत्राह—

स्वां स्वां प्रतिपद्यन्ते परस्पराकूतहेतुकां वृत्तिम् ।
पुरुषार्थ एव हेतुर्न केनचित् कार्यते करणम् ॥ ३१ ॥

स्वां स्वामिति वीप्सामिच्छन्ति । (इति त्रयोदशविधस्य करणस्य ग्रहणं कृतं भवति) । प्रतिपद्यन्ते गृह्णन्तीत्यर्थः । किं चान्यत्—परस्पराकूतहेतुकां वृत्तिम् । बुद्धेराकूतं ज्ञात्वा अहङ्कारोऽभिमानयति, मनः सङ्कल्पयति, इन्द्रियाणि स्वां स्वां वृत्तिं प्रतिपद्यन्ते । आकूतं नामाभिप्रायः । यथा किल चौरसेना ग्रामं हन्तुं गच्छति तत्र चौरसेनापतिना सङ्केतः

---

१. किञ्चित् त्रुटितं भाति ।

कृतोऽस्ति यदाऽहं हा हेति ब्रवीमि तदा सर्वैः समवायेन प्रवेष्टव्यम्। यदा पुनरहमहा हेति ब्रवीमि तदा निर्गन्तव्यम्। एतां चौरसेनापतेराज्ञामाकूतं ज्ञात्वा चौराः प्रविशन्ति निर्गच्छन्ति च। तथेह चौरसेनापतिस्थानीया बुद्धिः चौरस्थानीयानीन्द्रियाणि। किं स्वार्थं विषयं प्रतिपद्यन्ते आहोस्वित् परार्थमित्यत्रोच्यते। परार्थं गम्यते। यस्मादाह—पुरुषार्थ एव हेतुः पुरुषार्थः कर्तव्य एव इति गुणानां प्रवृत्तिः। तस्मादेतत् त्रयोदशविधं करणं पुरुषार्थः प्रवर्तयति। यदप्युक्तम्—अचेतनानि करणानि कथं प्रवर्तन्त इति। अत्र ब्रूमः—न केन चित् कार्यते करणम्। नेश्वरेण नापि पुरुषेण। स्वभावो नाम कश्चित्पदार्थो (ना)स्ति। यस्मात्स्वयमेव च त्रयोदशविधं करणं स्वे स्वे विषये प्रवर्तत इति ॥ ३१ ॥

अत्राह—उक्तं च भगवता न केनचित् कार्यते करणमिति।
तत् कतिविधं करणमिति ? अत्रोच्यते—

करणं त्रयोदशविधं तदाहरणधारणप्रकाशकरम्।
कार्यं च तस्य दशधाऽऽहार्यं धार्यं प्रकाश्यं च ॥ ३२ ॥

यदत्र करणमित्युक्तं तत् त्रयोदशविधमिति बोद्ध्यम्। पञ्च कर्मेन्द्रियाणि, पञ्च बुद्धीन्द्रियाणि, बुद्ध्यहङ्कारौ मन इति एतत् त्रयोदशविधं करणमिति। अत्राह—आहारकं धारकं प्रकाशकं च तदिति। तत्राहारकमिन्द्रियलक्षणम्। धारकमभिमानलक्षणम्। प्रकाशकं बुद्धिलक्षणम्। अत्राह—किं तदस्ति यस्याहरणं धारणं प्रकाशनं च क्रियते। अत्रोच्यते—कार्यं च तस्य दशधाऽऽहार्यं धार्यं प्रकाश्यं च। कार्यमिति शब्दस्पर्शरसरूपगन्धाः पञ्च, वचनादानविहरणोत्सर्गानन्दाः पञ्च। एते दश विषयाः कार्यमित्युच्यते। तं दशविधं विषयं बुद्धीन्द्रियैः प्रकाशितमर्थं कर्मेन्द्रियाण्याहरन्ति धारयन्ति च। तद्यथा तमसि स्थितं प्रदीपेन प्रकाशितं घटं हस्त आदत्ते धारयति च। तदेवं यथा घटं तथा शेषाण्यपि ॥ ३२ ॥

अन्तःकरणं त्रिविधं दशधा बाह्यं त्रयस्य विषयाख्यम्।
साम्प्रतकालं बाह्यं त्रिकालमाभ्यन्तरं करणम् ॥ ३३ ॥

अन्तःकरणं त्रिविधमिति बुद्ध्यहङ्कारमनसां ग्रहणम्। एतत् त्रिविधमन्तःकरणसंज्ञितम्। दशधा बाह्यं बुद्धिकर्मेन्द्रियभेदात्। किं चान्यत्। त्रयस्य विषयाख्यं बुद्ध्यहङ्कारमनसां त्रयाणामन्तःकरणानां बाह्यं दशविधं

करणं विषयाख्यं विषय(?) उपभोग्यमिति। आभ्यन्तरं त्रिकं स्वामिभूतं बाह्यं दशविधं भृत्यभूतमित्यर्थः। किं चान्यत्—साम्प्रतकालं बाह्यम्। यदेतद्बाह्यं दशविधं करणमुक्तं तत् साम्प्रतकालं वर्तमानविषयग्राहकं भवति। श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानि वर्तमानान्येव शब्दादीनि गृह्णन्ति। नातीतानि न च भावीनि। एवं वाक्पाणिपादपायूपस्थानि वर्तमानेषु वचनादेयभूमिमलोत्सर्गानन्देषु प्रवर्तन्ते नातीतभविष्यतोः। किञ्चान्यत्—त्रिकालम् आभ्यन्तरं मनोऽहङ्कारबुद्धिरूपं करणं प्रवर्तते। बुद्धिर्वर्तमानं घटं बुद्ध्यते अतीतं भविष्यन्तं च स्मरति। तद्यथा—युधिष्ठिरभीमसेनावास्ताम् अतीतविषयग्राहिणी बुद्धिः। कल्की भविष्यति भाविवस्तुग्राहिणी। एवमहङ्कारोऽपि त्रिकालवान्। यथाऽहमस्मिन् गृहे स्वामी आसं, भविष्यामि चेति। एवं मनोऽप्यतीतं सङ्कल्पयति वर्तमानं भावि च। यत एवं तस्मादुच्यते 'त्रिकालमाभ्यन्तरं करणम्' इति ॥ ३३ ॥

अत्राह—कानि इन्द्रियाणि सविशेषं विषयं गृह्णन्ति, कानि निर्विशेषम्। अत्रोच्यते—

बुद्धीन्द्रियाणि तेषां पञ्च विशेषाविशेषविषयाणि।
वाग्भवति शब्दविषया शेषाण्यपि[1] पञ्चविषयाणि ॥३४॥

तेषाम् करणानां मध्ये येषामयमधिकारो वर्तते तेषां यानि बुद्धीन्द्रियाणि श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानि पञ्च तानि सविशेषं गृह्णन्ति अविशेषमपि विषयं गृह्णन्ति। अत्राह—कस्य सविशेषं विषयं गृह्णन्ति कस्य निर्विशेषमिति। अत्रोच्यते शब्दस्पर्शरसरूपगन्धाः पञ्च देवानां तन्मात्रसंज्ञिता निर्विशेषाः केवलसुखलक्षणत्वात्। यस्मात्तत्र दुःखमोहौ न स्तस्तस्मान्निर्विशेषास्ते इति। तथा हि। विशिष्यन्ते शान्तघोरमूढत्वादिनेति विशेषास्तैः सह सविशेषाः, केवला निर्विशेषा इति तात्पर्यम्। एवं शब्दादयो मनुष्याणां सविशेषाः सुखदुःखमोहयुक्ता इत्यर्थः। देवानां तु बुद्धीन्द्रियाणि निर्विशेषं सुखात्मकं प्रकाशयन्ति। उक्तानि बुद्धीन्द्रियाणि देवानां मानुषाणां च। कर्मेन्द्रियाणि वक्ष्यामः। वाग्भवति शब्दविषया शेषाण्यपि पञ्च विषयाणि। तत्र देवानां वाक् पादं पादार्धं श्लोकमुच्चारयति। अस्माकमपि तथैव। अतो देवानामस्माकं च वागिन्द्रियं तुल्यमित्यर्थः। किं चान्यत्—शेषाण्यपि पञ्च विषयाणि इति। तेषां

---

१. 'शेषाणि तु' इति गौडपादवाचस्पती पठतः।

चतुर्णामेकैकं पञ्चविषयम्। पाणिस्तावत् शब्दस्पर्शरसरूपगन्धयुक्तः। एवं पञ्चलक्षणमेव पाणीन्द्रियं सन्निकृष्टं पञ्चलक्षणं घटं गृह्णाति। (यस्मात् पञ्चलक्षणं हस्तं हस्तेन्द्रियं च) एवं शब्दादिपञ्चलक्षणः पादः पञ्चात्मिकायामेव भुवि विहरति। एवं पञ्चलक्षणे पायूपस्थे अपि पञ्चलक्षणावुत्सर्गानन्दौ कुरुतः। तस्मात् युक्तमभिहितम्—'शेषाण्यपि पञ्च विषयाणि' इति ॥ ३४ ॥

इदानीं बुद्धिविषयख्यापनायेदमुच्यते—

सान्तःकरणा बुद्धिः सर्वं विषयमवगाहते यस्मात्।
तस्मात्त्रिविधं करणं द्वारि द्वाराणि शेषाणि ॥३५॥

सान्तःकरणा अन्तःकरणे अहंमनसी ताभ्यां सह वर्तते या बुद्धिः सा तथोक्ता। सा बुद्धिः सर्वं विषयं निरवशेषं त्रिष्वपि कालेषु यस्मादवगाहते व्याप्नोति गृह्णाति शब्दाद्यं पञ्चविधं तस्मादेव तन्मनोबुद्ध्यहङ्कारलक्षणं त्रिविधमेव करणं साधनं, क्रियतेऽनेनेतिकृत्वा। शेषाणि पुनः द्वारि बाह्ये यानि बुद्धिकर्मेन्द्रियतया प्रतीतानि श्रोत्रवाक्प्रभृतीनि दश तानि तस्या एव मनोऽहङ्कारयुक्ताया बुद्धेर्विषयग्रहणाय द्वाराणि प्रतीकान्येव न तु करणतया सान्वयानि। तथा एतैर्दशभिर्द्वारैः सान्तःकरणा बुद्धिरेव विषयान् गृह्णातीति त्रिविधमेव करणमित्यर्थः ॥ ३५ ॥

किञ्चान्यत्—

एते प्रदीपकल्पाः परस्परविलक्षणा गुणविशेषाः।
कृत्स्नं पुरुषस्यार्थं प्रकाश्य बुद्धौ प्रयच्छन्ति ॥ ३६ ॥

एते इति बुद्धिकर्मान्तःकरणभेदास्त्रयोदेश प्रदीपकल्पाः प्रदीपतुल्याः। किं चान्यत्। परस्परविलक्षणाः। भिन्नलक्षणा विसदृशा इत्यर्थः। श्रोत्रं हि शब्दं गृह्णाति, न स्पर्शादीन्। एवमितरत्र। वाग्वक्त्येव न गृह्णाति गच्छति विहरत्यानन्दति। एवं पाण्यादिषु। मनः सङ्कल्पयति नाहङ्कुरुते। अहङ्कारश्चाभिमनुते न सङ्कल्पयति। एवं द्वादशापि स्वं स्वमर्थं पुरुषभोग्यतया प्रकाश्य बुद्धौ प्रयच्छन्ति निक्षिपन्ति। तद् बुद्धिस्थं विषयं सुखदुःखाद्यं पुरुष उपलभते ॥ ३६ ॥

किञ्चान्यत्—

सर्वं प्रत्युपभोगं यस्मात्पुरुषस्य साधयति बुद्धिः।
सैव च विशिनष्टि ततः[1] प्रधानपुरुषान्तरं सूक्ष्मम् ॥३७॥

१. 'पुनः' इति संस्करणान्तरेषु पाठः।

निर्विशेषं त्रिष्वपि कालेषु यो यो विषयं प्रति उपभोगो देवतिर्यग्योनिषु तं तं पुरुषस्य यस्माद् हेतोर्बुद्धिरेव साधयति निष्पादयति। राजामात्यवत्। यथा सर्वेषां भृत्यानां मन्त्री उपलब्धिं विधाय राजनि निवेदयति। एवं कर्मेन्द्रियाणि प्रकाश्य बुद्धौ प्रयच्छन्ति। बुद्धिरपि पुरुषाय प्रयच्छति समर्पयति। अनेन प्रकारेण बुद्धिरभ्युदयफलेन यावज्ज्ञानं नोत्पद्यते तावत् पुरुषं योजयति। स्वैरिणीव कामुकं मूढविज्ञानं घृताद्युपचारैः। बुद्धिप्रेरिता अहंमनोबुद्धिकर्मेन्द्रियाख्या विषयान् न स्वार्थं न च बुद्ध्यर्थं किं तु पुरुषार्थमेव साधयन्ति। यथा सलक्ष्मीकस्वैरिणीगृहे दास्यस्तदादेशेन रसवतीं न स्वार्थं न च स्वामितयाऽवस्थितस्वैरिण्यर्थं किं तु तयापहृतविवेकविज्ञानस्य कामुकस्य कृते निर्वर्तयन्ति तद्वत्। यावदसौ विमूढस्तावदनया बुद्ध्या स्वैरिण्येव कामुको विषयैरुपह्रियते। यदाऽसौ कथमपि गुरुशास्त्रात्मानुभवादिभिरात्मानं चेतयते तदा स्वैरिणीव बुद्धिरपि पुरुषं विहाय संशाम्यति। ततोऽसौ केवलतयाऽवतिष्ठते। तदनुभवावस्थितिर्मुक्तिरिति यत् किञ्चिदिदमप्रस्तुतम्। प्रस्तुतमुच्यते। किञ्चान्यत्। अतः सैव च विशिनष्टि ततः प्रधानपुरुषान्तरं सूक्ष्मम्। सूक्ष्मं दुर्विज्ञेयम्। प्रधानपुरुषान्तरं नानात्वम्। सूक्ष्मत्वादतीव दुर्बोधमिति यावत्। बुद्धिर्हि अध्यवसायात्मिका स्वव्यापारेण चाध्यवसायेन साधयति। अहङ्कारेन्द्रियतन्मात्रभूताध्यवसायेन जगत् प्रधानपुरुषान्तरविवेचनेन विविच्य स्वयं म्रियते। अत एवोक्तम्—

'अहङ्कारो धियं ब्रूते मैनं सुप्तं प्रबोधय।
प्रबुद्धे परमानन्दे न त्वं नाहं न तज्जगत् ॥
मयि तिष्ठत्यहङ्कारे पुरुषः पञ्चविंशकः।
तत्त्ववृन्दं परित्यज्य स कथं मोक्षमिच्छति ॥
योऽसौ सर्वेश्वरो देवः सर्वव्यापी जगद्गुरुः।
देहीतिपदमुच्चार्य हा मयात्मा लघुः कृतः ॥'

अकृतपुण्यचरणैन प्राप्यं प्रधानपुरुषयोर्नानात्वम्। तयोरेवान्तरं दर्शयति। त्वमन्यमात्मानं न वेत्सि। प्रधानमन्यत्। सत्त्वरजस्तमांसि त्रयो गुणाः प्राधानिका अमूर्ताः साम्यावस्थायां प्रधानाख्याः। तेषामेकतयोद्रेकात्त्रिगुणा बुद्धिरन्या, अन्योऽहङ्कारः, पञ्च तन्मात्राण्यन्यानि, एकादशेन्द्रियाण्यन्यानीति बुद्ध्वा तत्त्वानि मोक्षं गच्छन्ति। न हि भगवतः कपिलस्य मते किमपि कर्तव्यमनुष्ठेयतया, किं तु सा-

ङ्ख्यानां पञ्चविंशतितत्त्वज्ञानमेव साधर्म्येण वैधर्म्येण च निःश्रेयसहेतुः। उक्तं च—

हस पिब लल मोद नित्यं विषयानुपभुङ्क्ष्व कुरु च मा शङ्काम्।
यदि विदितं ते कपिलमतं तत्प्राप्स्यसे मोक्षसौख्यं च ॥ ३७ ॥

अत्राह—उक्तं भगवता पूर्वस्यामार्यायां 'विशेषाविशेषविषयाणीन्द्रियाणि' इति। तत्र के विशेषा केऽविशेषा इति। अत्रोच्यते—

तन्मात्राण्यविशेषास्तेभ्यो भूतानि पञ्च पञ्चभ्यः।
एते स्मृता विशेषाः शान्ता घोराश्च मूढाश्च ॥ ३८ ॥

यानि भूतादिसंज्ञात्तामसादहङ्कारादुत्पन्नानि पञ्च तन्मात्राणि शब्दादीनि तान्यविशेषा इत्युच्यन्ते। देवानां तन्मात्राणि सुखलक्षणा विषयास्तत्रापि रजस्तमसी स्तः किं तु तत्र सत्त्वमुत्कटत्वेन वर्तते तस्मादविशेषा इत्युच्यन्ते। न विशिष्यन्ते शान्तघोरमूढत्वादिभिः सत्त्वोद्रेकात् केवलसुखतया इत्यर्थः। तर्हि विशेषाः के? अत्राह—तेभ्यो भूतानि पञ्च पञ्चभ्यः। शब्दादिभ्यः पञ्चभ्यः आकाशादीनि पञ्च महाभूतानि पूर्वपूर्वानुप्रवेशादेकद्वित्रिचतुष्पञ्च गुणान्युत्पद्यन्ते। एते स्मृता विशेषाः। अत्राह—एतेषां किं लक्षणमिति। अत्रोच्यते। एतानि पञ्च महाभूतानि मनुष्याणां विषयाः। शान्ता घोरा मूढाश्च। तत्राकाशं शान्तं घोरं मूढं च। शान्तं तावत् सुखलक्षणम्। यथा कश्चिद् गर्भगृहात् निष्क्रान्तः अवकाशस्थितस्तस्य तदाकाशं सुखहेतुत्वाच्छान्तं स्यात्। तदेवोष्णशीतवातादिसंयोगाद् दुःखत्वाद् घोरं स्यात्। पथि गच्छतः कान्दिशीकस्य केवलं सर्वत्राकाशं पश्यतो मार्गाद्यनभिज्ञस्य पुंसस्तदेव मूढं स्यात्। एवं वायौ त्रैविध्यम्। यथा गर्भगृहवासिनो वातायनद्वारेण वायुः प्रविशन् सुखहेतुत्वाच्छान्तः। तेनैवोष्णमासि सम्पन्नेन दुःखोत्पादकतया दुःखी स्यादित्यसौ वायुर्घोरः। स एव वायुः शीतकाले शीतं जनयन् मूढः। एवमग्निः शीतार्तस्य शान्तः। ग्रीष्मकाले तापार्तस्य घोरः। ग्रामादिदाहे प्रवृद्धोऽग्निः पुंसो मोहोत्पादकतया मूढः। एवमापो घर्मार्तस्य सुखदत्वाच्छान्ताः। हेमन्ते दुःखदत्वाद् घोराः। समुद्रमध्यगतस्य पुंसः तीरमपश्यतो मोहहेतुत्वान्मूढाः। एवं पृथ्वी नवशाद्वलोपचिता प्रावृषि सुखकारिणीति शान्ता। ग्रीष्मकाले उष्णबालुका घोरा। सैव पथिकस्य मार्गानभिज्ञस्य प्राणिग्रामाद्यपश्यतो मूढा। एवं देवानां निर्विशेषा विषयाः। तन्मात्रसंज्ञिता निर्विशेषाः केवला एवानन्दमयाः शान्तघोरमूढतयाऽविशिष्टाः स्वभावरूपाः

शर्कराकटुतिक्तादिरसा निश्चितं स्वभावमाधुर्यामृता उपमेयसुखशालिक्षीरमिव। माधुर्यक्षारकट्वादिपार्थिवगुणसम्पृक्तं स्वभावरसं जलमिवामी विषयाः(?)। देवानामेवं निर्विशेषाः स्युः। तन्मात्रसंज्ञिताः सुखलक्षणा एव। मनुष्याणां वियदादिभूतमयत्वात् भूतानीव सुखदुःखमोहलक्षणास्ते इत्यर्थः ॥ ३८ ॥

अत्राह—किमेतावन्त एव विषयाः, न हि। किं त्वन्येऽपि सन्ति। के पुनस्ते इति? उच्यते।

सूक्ष्मा मातापितृजाः सह प्रभूतैस्त्रिधा विशेषाः स्युः।
सूक्ष्मास्तेषां नियता मातापितृजा निवर्तन्ते ॥ ३९ ॥

तत्र सूक्ष्मास्तावत् पञ्च तन्मात्रकाः तैरेवादिसर्गे सूक्ष्मशरीराणि त्रयाणामपि लोकानां प्रारब्धानि। तत् सूक्ष्मशरीरमृतुकाले मातुरुदरं प्रविशति। मातू रुधिरं पितुः शुक्रम्। वेदान्तवादिनोऽप्येवमाहुः। प्राणिनः स्वर्गनरकादिषु स्वकर्मभोगानन्तरमत्राजिगमिषवः सोममण्डले लीना भूत्वा वृष्टयो भवन्ति। ततोऽन्नम्, तत् स्त्रीपुंसाभ्यामुपभुक्त शुक्रशोणिते, ततः पुरुष इति। "वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचस" (छा० उ० ५।३ ३) इत्यारभ्य "इति तु पञ्चम्यामाहुतावाप" (छा० उ० ५।९।१) इत्याहुः। पुराणेष्वपि

"सोमवृष्ट्यन्नरेतांसि पुरुषस्तत्र पञ्चमः।
स जीवत्यग्नये पश्चाद्धरन्त्यस्माद्यतोऽभवत् ॥" इति।

तदेवं सूक्ष्मशरीरस्योपचयं करोति। मातुरशितपीतान्नरसो मातृनाडीसम्बन्धेन प्रविश्य सूक्ष्मशरीरस्य शुक्रशोणितमयस्योपचयं कुरुते। मातुश्च नाड्या वालस्य नाभिरन्ध्रं प्रविशति। यथैकेन मार्गेण शाकवाटस्याप्यायनमुदकं करोति एवमन्नपानस्य रसो मातृनाडीगतो बालस्य नाभिं प्रविशति। प्रविश्य बालशरीरस्याप्यायनं करोति। तत्र सूक्ष्मशरीरस्याकृतिर्याहग्लक्षणा बहिःशरीरस्य भवति हस्तपादशिरःपृष्ठोदरजङ्घागुल्फ इति। अपि च शिष्टा वदन्ति बहिःशरीर षाट्कौशिकमिति। रुधिरमांसत्वचो मातृजाः स्नाय्वस्थिमज्जानः पितृजाः। एवमेतद्बाह्यशरीरमाभ्यन्तरसूक्ष्मशरीरस्योपचयं कुरुते। तस्यैव बहिःशरीरोपचितस्य सूक्ष्मशरीरस्य प्रसवकाले योन्या निर्गतस्य मातुरुदरात् बाह्यानि पञ्च महाभूतानि पृथिव्यादीनि विहरणसंस्थानीयानि कृतानि। यथा कस्यचिद् राजकुमारस्य मातापितृभ्यामुपचितस्य पञ्च महाभूतानि कृतानि। आकाशमवकाशने, भूमिर्विहरणे, आपः पिण्डीकरणे शुद्धौ च, अग्नि-

राहारपचने, वायुर्व्यूहने, अस्य शरीरस्यैवमेते विशेषाः त्रिविधाः। सूक्ष्मा मातापितृजाः सह प्रभूतैः। प्र इत्युपसर्गः। एवं सूक्ष्मा मातापितृजा भूतानि चेत्यर्थः। तानि च पृथिव्यादीनि। एवमेते त्रिधा विशेषाः। ये चान्ये प्रागभिहिता विशेषाः शान्ता घोरा मूढाश्च। अत्राह—एतेषु त्रिष्वपि विशेषेषु के नित्याः केऽनित्या इत्यत्रोच्यते—सूक्ष्मास्तेषां नियताः। सूक्ष्मा इति यैरादिसर्गारम्भस्ते नियता नित्या इत्यर्थः। तैरारब्धं सूक्ष्मशरीरमस्मिन् स्थूलशरीरे पतति तद्धर्मेण संयुक्तं पशुमृगपक्षिसरीसृपस्थावरान्तानि पञ्च स्थानानि पश्यति। धर्माधर्मयोः साम्येन ब्राह्मणादीनि चण्डालान्तानि पश्यति। एवं सूक्ष्मशरीरं नियतं यावत्संसारमित्यर्थः। तद् यावज्ज्ञानं गुणपुरुषान्तरोपलब्धिरूपं नोत्पद्यते तावत्संसरति, उत्पन्ने ज्ञाने निवर्तते। तस्मिंश्च निवृत्ते पुरुषो मोक्षं गच्छति। उक्तं च—

"देहे मोहाश्रये भग्ने युक्तः स परमात्मनि।
कुम्भाकाश इवाकाशे लभते चैकरूपताम्॥"

"यथा दर्पणाभाव आभासहानौ" इत्यादि। तस्मादेतत् सूक्ष्मम्[1]। मातापितृजा निवर्तन्ते तत् सूक्ष्मशरीरं परित्यज्य मरणकाले मातापितृजं पतति। तत् सूक्ष्मशरीरं ज्ञानमविदुषां संसरति॥ ३९॥

अत्राह—उक्तं च भगवता—'मातापितृजा निवर्तन्ते तत् सूक्ष्मं संसरतीत्यर्थः'। [2]अत्रोच्यते—

पूर्वोत्पन्नमसक्तं नियतं महदादिसूक्ष्मपर्यन्तम्।
संसरति निरुपभोगं भावैरधिवासितं लिङ्गम्॥ ४०॥

पूर्वोत्पन्नमित्यादि। सर्गोत्पन्नमित्यर्थः। यावज्ज्ञानं नोत्पद्यते तावत् संसारे स्थिरतरं स्थितमित्यर्थः। किञ्चान्यत्—असक्तं, कचिन्न सक्तमित्यसक्तं देवमानुषतिर्यक्षु सूक्ष्मत्वात्। नियतं नित्यमित्यर्थः। पञ्च कर्मेन्द्रियाणि पञ्च बुद्धीन्द्रियाणि पञ्च तन्मात्राणि मनोबुद्धिरहङ्कार एवमष्टादश—महदादिसूक्ष्मपर्यन्तमिति। महान्यस्यादौ, सूक्ष्माणि तन्मात्राणि शब्दादिविषयाख्यान्यन्ते यस्य तत्तथोक्तम्। अन्तःकरणबहिःकरणानि त्रयोदश तन्मात्राणि पञ्च चेति। अत्राह—तत्किं करोति। अत्रोच्यते—संसरति देवमानुषतिर्यग्योनिषु जीवभावमागच्छति। तद्धि

१. अत्र 'नियतम्' इत्यपेक्षितम्।
२. अत्र 'कथमिति चेत्' इत्यपेक्षितम्।

निरुपभोगं शब्दादयो विषया उपभोगास्तैर्विरहितम्। त्रयोदशकरणात्मकमेवेत्यर्थः। भावैरधिवासितं देवमानुषतिर्यग्भावाधिवासितमेवेत्यर्थः। यथा तिलपतनवस्त्रवासनवत्(?)। तद्वत् शान्ता भावा भवन्ति। देवभावाः शुभेन मिश्रेण मानुषा अशुभेन तिर्यक्त्वम्। लिङ्गं प्रलयकाले प्रधाने लयं गच्छतीति लिङ्गम्। प्रकर्षेण धीयते क्षिप्यतेऽत्र सर्वमिति प्रधानम्॥ ४१॥

अत्राह—सूक्ष्मशरीरेण नास्ति प्रयोजनम्। तर्हि त्रयोदशविधं करणमेव कथं संसरतीति? अत्रोच्यते—

चित्रं यथाऽऽश्रयमृते स्थाण्वादिभ्यो विना यथा छाया।
तद्वद्विनाऽविशेषै[1]स्तिष्ठति न [2]निराश्रयं लिङ्गम्॥ ४१॥

इहाश्रयाश्रयिणोः सम्बन्धो दृष्टः। न ह्याश्रयं विनाऽऽश्रयी तिष्ठति। कुड्यपटाश्रयं कृत्वा चित्रमवतिष्ठते। तदिदं सूक्ष्मशरीरं कुड्यपटस्थानीयं चित्रसंस्थानीयं त्रयोदशविधं करणम्। तदेवं सति यदुक्तं भवता त्रयोदशविधं करणमेव संसरतीति तन्मिथ्या। किं चान्यत्—स्थाण्वादिभ्यो विना यथा छाया इति। स्थाणुपुरुषादिभिर्विना यथा छाया न भवति। छायां विना ते च न भवन्ति। यथाऽग्निना विना प्रकाशो न भवति। तद्वद्विनाविशेषैस्तिष्ठति न निराश्रयं लिङ्गमिति। अविशेषा इति तन्मात्राणि स्वाभाविकक्षीरजलवच्च शान्तघोरमूढत्वरहितत्वात्। तैरारब्धं सूक्ष्मशरीरम्। तेन सूक्ष्मशरीरेण सर्गादिप्रारब्धेन विना निराश्रयं त्रयोदशकरणाख्यं लिङ्गं न तिष्ठति। अतो यदुक्तं भवता 'किमविशेषैरारब्धसूक्ष्मशरीरकल्पनया प्रयोजनं त्रयोदशविधं करणमेव संसरति' इति, तन्मिथ्या॥ ४१॥

अत्राह—सूक्ष्मशरीरं त्रयोदशविधकरणसम्पन्नं केन हेतुना संसरतीति? अत्रोच्यते—

पुरुषार्थहेतुकमिदं निमित्तनैमित्तिकप्रसङ्गेन।
प्रकृतेर्विभुत्वयोगान्नटवद् व्यवतिष्ठते लिङ्गम्॥ ४२॥

पुरुषार्थः कर्तव्य इति प्रधानस्य तावत् प्रवृत्तिः। स चार्थो द्विविधः। शब्दाद्युपलब्धिलक्षणो गुणपुरुषान्तरोपलब्धिलक्षणश्च। शब्दाद्युपलब्धिर्ब्रह्मलोकादिषु भोगावाप्तिर्गुणपुरुषान्तरोपलब्धिर्मोक्ष इति। तस्मादुक्तम्—पुरुषार्थहेतुकमिदं सूक्ष्मशरीरमिति। किंचान्यत्—निमित्तनैमि-

१. 'विना विशेषैः' इति वाचस्पतिसम्मतः पाठः।
२. 'न तिष्ठति' इति गौडपादिवाचस्पत्योः सम्मतः पाठः।

त्तिकप्रसङ्गेन । तत्र निमित्तं धर्माद्यष्टविधम्[१] । तत् पुरस्तात् वक्ष्यामः 'धर्मेण गमनमूर्ध्वम्'इत्यादि । प्रकृतिः प्रधानम् । विभुत्वं प्रभुत्वं तस्य योगात् (तद्विभुत्वयोगात्) । यथा कश्चिद् राजा प्रभुत्वयोगेन स्वराष्ट्रे यद्यदिच्छति तत् तत् करोति । एवं प्रधानमपि प्रभुत्वयोगेन मानुष्यं वा दैवं वा तैर्यग्योन्यं वा कुरुते । एवं सूक्ष्मशरीरं त्रयोदशविधेन करणेन संयुक्तं हस्तिन्या उदरं प्रविश्य हस्ती भवति । स्त्रीशरीरं प्रविश्य मनुष्यो भवति । [२]पशुर्भवति । तस्मात् नटवद्[३] व्यवतिष्ठते लिङ्गम् ॥ ४२ ॥

अत्राह—उक्तं पुरा भावैरधिवासितं लिङ्गं सूक्ष्मशरीरं संसरति । तत् के भावा इति ? अत्रोच्यते—

सांसिद्धिकाश्च भावाः प्राकृतिका वैकृताश्च[४] धर्माद्याः ।
दृष्टाः करणाश्रयिणः कार्याश्रयिणश्च कललाद्याः ॥ ४३ ॥

त्रिविधा भावाश्चिन्त्यन्ते । तत्र केचित् सांसिद्धिकाः, केचित् प्राकृतिकाः, केचिद् वैकृताः । तत्र सांसिद्धिकास्तावत्—यथा कपिलस्य भगवतः परमर्षेरादिसर्गे उत्पन्नस्येमे चत्वारो भावाः सहोत्पन्ना धर्मो ज्ञानं वैराग्यमैश्वर्यमिति । एते सांसिद्धिका उच्यन्ते । प्राकृतिका नाम ब्रह्मणः पुत्राः किल सनकादयो बभूवुः । तेषामुत्पन्नकार्यकारणानां शरीरवतां षोडशवर्षाणामेवैते चत्वारो भावा अकस्मादेवोत्पन्ना निधिदर्शनवत् । एते च प्राकृतिका भावा उच्यन्ते । वैकृतिका यथा—आचार्यादिमूर्तिमधिकृत्य उत्पन्ना वैकृतिका इत्युच्यन्ते । आचार्यं निमित्तं कृत्वा ज्ञानमुत्पद्यते । ज्ञानाद् वैराग्यं, वैराग्याद्धर्मो, धर्मादैश्वर्यम् । एवमेते चत्वारो भावा अस्मदादिष्वपि वर्तन्ते । तदेव वैकृता इत्युच्यन्ते । एवमेते त्रिधा भावा व्याख्याता यैरधिवासितं महदादि लिङ्गं संसरति । अत्राह–धर्मो, ज्ञानम् , वैराग्यमैश्वर्यम् , अधर्मोऽज्ञानमवैराग्यमनैश्वर्यम् । एवमेतेऽष्टौ भावाः क्व वर्तन्ते ? पूर्वर्षिभिः दृष्टाः करणाश्रयिणः । करणान्युच्यन्ते बुद्धिकर्मान्तःकरणभेदात्त्रयोदश । तान्याश्रित्याष्टौ भावाः प्रवर्तन्ते । उक्तं हि "अध्यवसायो बुद्धिर्धर्मो ज्ञानं विराग ऐश्वर्यम्" इत्येवमादि । किं चान्यत्—कार्याश्रयिणश्च कललाद्याः । यथा सूक्ष्मशरीरमुत्पत्तिकाले मातुरुदरं प्रविशति । मातुः रुधिरं पितुः शुक्रं तस्य सूक्ष्मशरीरस्योपचय कुरुते । कललबुद्बुदघनमांसपेशीगर्भकुमारयौवनस्थाविरादयोऽन्नपानरसनिमित्ता उत्पद्यन्ते । तत्र उच्यते—'कार्याश्रयिणश्च कललाद्या' इति । कललग्रहणं विरागनिमित्तम् ॥ ४३ ॥

१. अत्र 'नैमित्तिकमूर्ध्वगमनादि'इत्यपेक्षितम् ।

२. अत्र 'पशुशरीरं प्रविश्य' इत्यपेक्षितम् ।

३. यथा नटः पटान्तरेण प्रविश्य देवो भूत्वा निर्गच्छति पुनर्मानुषः । एवं लिङ्गं निमित्तनैमित्तिकप्रसङ्गेनोदरान्तःप्रविश्य नानारूपं धत्ते ।

४. यद्यप्यत्र कुत्रचित् पुस्तकेषु 'वैकृतिकाश्च' इति पाठो दृश्यते स छन्दोभङ्गदोषादुपेक्षणीय एव ।

उक्त पूर्वस्यामार्यायां 'निमित्तनैमित्तिकप्रसङ्गेन' 'नटवद् व्यवतिष्ठते लिङ्गम्' इति । तत्र किं निमित्तं किं च नैमित्तिकमिति ? अत्रोच्यते—

धर्मेण गमनमूर्ध्वं गमनमधस्ताद् भवत्यधर्मेण ।
ज्ञानेन चापवर्गो विपर्ययादिष्यते बन्धः ॥ ४४ ॥

तत्र धर्मो निमित्तम् । इह लोके धर्मं यः कुरुते तन्निमित्तं कृत्वा सूक्ष्मशरीरमूर्ध्वं गच्छति । ऊर्ध्वमित्यष्टानां देवयोनीनां ग्रहणम् । तत्र आद्यं ब्राह्मम् । प्राजापत्यम् , ऐन्द्रं, पित्र्यं, गान्धर्वं, याक्षं, राक्षसं, पैशाचम् इत्येतान्यष्टौ स्थानानि सूक्ष्मशरीरं गच्छति । तत्र धर्मो निमित्तम् , ऊर्ध्वगमनं नैमित्तिकम् । किं चान्यत्—गमनमधस्ताद्भवत्यधर्मेण । इह लोके यमनियमलक्षणो धर्मस्तद्विपरीतो ह्यधर्मः, तेनाधर्मेण सूक्ष्मशरीरमधस्ताद् गच्छति पश्वादि । पशुमृगपक्षिसरीसृपस्थावरमिति पञ्चधा तिर्यक् स्थावरान्तम् । अत्राऽधर्मो निमित्तम् , अधोगमनं नैमित्तिकम् । किं चान्यत्—ज्ञानेन चापवर्गः । यत् पञ्चविंशतितत्त्वज्ञानं तेन ज्ञानेन तत्सूक्ष्मशरीरं निवर्तते । परमात्माऽपवर्गं प्राप्नोति मोक्षं गच्छतीत्यर्थः । अतो ज्ञानं निमित्तमपवर्गो नैमित्तिकः । अन्यच्च विपर्ययादिष्यते बन्धः । कस्य विपर्ययात् । ज्ञानस्य विपर्ययोऽज्ञानं, तेनाज्ञानेनाहं दर्शनीयः सुभगोऽहं भोक्ताऽहमिति मन्यते । तेनाज्ञानेन मनुष्यतिर्यग्देवेष्वात्मानं निबध्नाति । न मोक्षं गच्छतीत्यर्थः । अतोऽज्ञानं निमित्तं बन्धो नैमित्तिकाः । स च बन्धस्त्रिविधः । प्रकृतिबन्धो वैकारिकबन्धो दक्षिणाबन्धश्चेति । तत्र प्रकृतिबन्धो नामाष्टासु प्रकृतिषु परत्वेनाभिमानः । वैकारिकबन्धो नाम ब्रह्मादिस्थानेषु श्रेयोबुद्धिः । दक्षिणाबन्धो नाम गवादिदानेज्यानिमित्तः । एवं चतुर्विधं निमित्तनैमित्तिकं व्याख्यातम् ॥ ४४ ॥

अन्यदप्येवंविधमुच्यते चतुर्धा—

वैराग्यात् प्रकृतिलयः संसारो राजसाद्भवति रागात्[1] ।
ऐश्वर्यादविघातो विपर्ययात्तद्विपर्यासः ॥ ४५ ॥

यथा कस्यचिद्वैराग्यमस्ति । (जितेन्द्रियो विषयेभ्यो विरक्तो न यमनियमपरः केवलम्) न तु ज्ञानमस्ति गुणपुरुषान्तराख्यम् । तेनाज्ञानेन वैराग्यपूर्वेण नास्ति मोक्षः । केवलमष्टासु प्रकृतिषु लयो भवति प्रधानबुद्ध्यहङ्कारतन्मात्रेषु । तत्र लीनमात्मानं मुक्तमित्यवगच्छति भूयः संसरणकाले संसरति त्रिषु लोकेषु शरीरोत्पत्तिर्भवति । तत्र वैराग्यं निमित्तं प्रकृतिलयो नैमित्तिकः । किं चान्यत्—संसारो राजसाद्भवति रागात् । योऽयं राजसो रागोऽवैराग्यं यज्ञं करोति, दानं ददाति, अमुनाऽमुष्मिन् लोके सुखं मे भावीति । तेन रागेण संसारो भवति । ब्रह्मादिस्थानेषु जन्म भवति । तत्र रागो निमित्तं ससारो नैमित्तिकः । किं चान्यत्—ऐश्वर्यादविघातः यत्पूर्वमैश्वर्यमणिमादिकमष्टविधं निर्दिष्टं तस्मादैश्वर्यात् प्रार्थितानामविघातो भवति न मुक्तिः । अविघातोऽस्खलनम् । विपर्ययात्तद्विपर्यासः । विपर्ययादनैश्वर्यात्तद्विपर्यासः प्रार्थितानामप्राप्तिरित्यर्थः । तत्रानैश्वर्यं निमित्तम् । प्रार्थितस्याप्राप्तिलक्षणो विपर्यासो नैमित्तिकः । एवं षोडशको नित्यनैमित्तिकप्रसङ्गो व्याख्यातः । प्रकृतिलयः प्रकृतिबन्ध इत्युच्यते । यज्ञादिभिर्दक्षिणाबन्ध इत्युच्यते । ऐश्वर्यादिनिमित्तो भोगो वैकारिक इत्युच्यते ॥ ४५ ॥

ननु निमित्तनैमित्तिकप्रसङ्गः किमात्मक इति ? अत्रोच्यते—

एष प्रत्ययसर्गो विपर्ययाशक्तितुष्टिसिद्ध्याख्यः ।
गुणवैषम्यविमर्देन तस्य[2] भेदास्तु पञ्चाशत् ॥ ४६ ॥

एष इति । आर्याद्वयेन षोडशविधो नैमित्तिकः सर्ग उक्तः । प्रत्ययसर्ग उच्यते । प्रत्ययाद् बुद्धेरुत्पन्नो यस्मात् तस्मात् प्रत्ययसर्ग इत्युच्यते । उक्तं हि पुरस्तात् 'अध्यवसायो बुद्धिः' इत्यादि । सोऽयं प्रत्ययसर्गो भूयश्चतुर्द्धा भिद्यते । यस्मादाह—विपर्ययाशक्तितुष्टिसिद्ध्याख्यः । संशयबुद्धिर्विपर्ययः स्थाणुरयं पुरुषो वेति । भूयोऽपि स्थाणुं प्रसमीक्ष्य न शक्नोत्यन्तरं गन्तुमेवमस्याशक्तिरुत्पन्ना । ततस्तृतीयः[3] तमेव स्थाणुं

१. 'भवति राजसाद्रागात्' इति वाचस्पतिः पठति ।

२. अत्र 'च' इत्यधिकं गौडपादवाचस्पत्योः सम्मततया प्रतिभाति ।

३. विपर्यय इति शेषः ।

ज्ञातुं संशयितुं वा नेच्छति किमनेनास्माकमित्येषा तुष्टिः । भूयश्चतुर्थो (दृष्टे यस्तस्मिन्) स्थाण्वादिरूढां वल्लीं पश्यति शकुनिं वा । ततोऽस्य निश्चय उत्पद्यते स्थाणुरयमित्येषा सिद्धिः । एवमेष प्रत्ययसर्गो भिन्नश्चतुर्धा विपर्ययाशक्तितुष्टिसिद्ध्याख्यः । तस्य चतुर्विधप्रत्ययसर्गस्य गुणवैषम्यविमर्देन पञ्चाशत् भेदा भवन्ति । सत्त्वरजस्तमांसि त्रयो गुणास्तेषां वैषम्यं तद्विमर्देन । यदा सत्त्वमुद्रिक्तं तदा रजस्तमसी गौणे । यथाऽऽदित्योदयान्नक्षत्रतेजसो गौणत्वम् । एवं यदा रजसा सत्त्वतमसी, तमसा सत्त्वरजसी गौणे तदा तद्विमर्दो भवति । तेन विमर्देन तस्य चतुर्विधस्य प्रत्ययसर्गस्य पञ्चाशद् भेदा भवन्ति ॥ ४६ ॥

तानाह—

पञ्च विपर्ययभेदा भवन्त्यशक्तेश्च[1] करणवैकल्यात् ।
अष्टाविंशतिभेदा तुष्टिर्नवधाऽष्टधा सिद्धिः ॥ ४७ ॥

सुगमम् ॥ ४७ ॥

विपर्ययस्य च तमो मोहो महामोहस्तामिस्रोऽन्धतामिस्र इति पञ्च भेदाः । तेषां भेदान्तराण्याह—

भेदस्तमसोऽष्टविधो मोहस्य च दशविधो महामोहः ।
तामिस्रोऽष्टादशधा तथा भवत्यन्धतामिस्रः ॥ ४८ ॥

तमसस्तावदष्टविधा प्रकृतिः । तद्वस्तु मलयतीति तमः । तस्य परमष्टासु प्रकृतिषु लयो भवति । तद्यथा प्रधानं बुद्धिरहङ्कारः पञ्चतन्मात्राणीत्येतेषु । तत्र लीनमात्मानं मुक्तोऽहमिति मन्यते । स च तस्य विपर्ययः । एवं तमसोऽष्टधा भेदः । मोहस्य च अष्टविध एवेत्यर्थः । यत्तदणिमाद्यष्टविधमैश्वर्यमुक्तं तस्मिन् सक्ता ब्रह्मादयो देवता न मोक्षपदमिच्छन्ति । तस्यैश्वर्यस्य शुभकर्मणोपात्तस्य क्षये पुनः संसरन्ति । अयमष्टविधो मोहस्यापि भेदः । महामोहस्य दशविधो भेदः । देवानां शब्दादयः पञ्चतन्मात्राख्या विषया अविशेषाः केवलानन्दरूपा निरुपाधिदुग्धवच्छान्तादिसञ्जातसुखादिविरहिता ये भवन्ति स्वर्गप्राप्तौ । एवं मनुष्याणां भौतिकशरीरतया सुखदुःखमोहसम्पन्नाः शान्तघोरमूढा भवन्तीत्येष दशविधो महामोहः । तदेतेषु दशसु ब्रह्मेन्द्रादयो देवा मनु-

१. 'भवन्त्यशक्तिस्तु' इति क्वाचित्कः पाठः । वाचस्पतिस्तु 'भवन्त्यशक्तिश्च' इति पठति ।

ष्याश्च तिर्यग्योन्यासक्ताश्च दृश्यन्ते । तेन हि विषयेभ्यः परमस्तीति मूढविज्ञानास्तदासक्त्या गुणपुरुषान्तरोपलब्धिरूपं नित्यनिरतिशयसुखाभिव्यक्तये ज्ञानावबोधं न कुर्वन्ति इत्येष महामोहः। तेनामी ते मुक्तिं न भजन्ते । तामिस्रोऽष्टादशधेति । देवमनुष्याणां दश विषयाः प्रागभिहिता अविशेषसविशेषतया । अणिमाद्यैश्वर्यं चाष्टगुणम् एवमष्टादशधा भवति । तेभ्यः केनचिद्दैगुण्येनाप्राप्त्याऽभिहतस्य यः क्रोधः स तामिस्र इत्युच्यते । तथा अष्टादशधा चेत्यर्थः । अन्धतामिस्रोऽपि भवति तत्सङ्ख्य एव। तथा एवमष्टादशधात्रापि। [1]तेषु च मरणत्रासाद् दुःखमुत्पद्यते । ऐश्वर्ये विद्यमान ऐश्वर्यं परित्यज्य मृत्युना ह्रियमाणस्य गच्छामीति सङ्कल्पयतो यस्त्रासः सोऽन्धतामिस्र इत्युच्यते दश विषयानैश्वर्यं प्राप्यापि भोक्तुं न लभतेऽन्तरालेऽपि म्रियत इति यावत् । एवममी विपर्ययस्य तमःप्रभृतयः पञ्च भेदा विभिद्यमाना द्विषष्टिभेदाः सञ्जाताः । अत ऊर्ध्वमशक्तेरष्टाविंशतिभेदान् वक्ष्यामः ॥ ४८ ॥

एकादशेन्द्रियवधाः सह बुद्धिवधैरशक्तिरुद्दिष्टा ।
सप्तदश वधा [2]बुद्धेर्विपर्ययात्तुष्टिसिद्धीनाम् ॥ ४९ ॥

एकादशेन्द्रियवधाः आन्ध्यबाधिर्यघ्राणपाकजडत्वकुष्ठत्वमूकत्वकुणित्वपङ्गुत्वगुदावर्तक्लैब्योन्मादा इत्येकादशेन्द्रियवधाः । इन्द्रियाणां स्वविषयग्रहणासामर्थ्यं वध इव वधः। यथेह लोके कश्चिद् देवदत्तो यज्ञदत्तमाहूय अब्रवीत्—भो दुःखितोऽस्मि किं करवाणीति। स तेनोक्तः साङ्ख्यज्ञानाधिगमं कुरुष्व दुःखान्तमोक्षं प्राप्स्यसीति। एवमुक्तोऽसावाह—नाहमेतदभ्यासं कर्तुमलम् । बाधिर्यात् गुरुवचनं न शृणोमि, शुश्रूषायामसमर्थोऽस्मि । आन्ध्यकुणित्वपङ्गुत्वादिदोषाश्रयत्वात् कुतो मम ज्ञानाधिगम इति । एवमेवान्ध्यमूकत्वोन्मादाद इन्द्रियोपघाता विद्याग्रहणे असमर्था[3] बोद्धव्याः। एवमेते एकादशेन्द्रियवधा अशक्तिरुच्यन्ते । किञ्च—सह बुद्धिवधैरिति । बुद्धेर्वधा बुद्धिवधास्तैः सह । के ते बुद्धिवधाः ? सप्तदशसङ्ख्याः । ते च सप्तदशापि—नव तुष्टिभेदा अष्टौ सिद्धयः । तन्निरूपणप्रस्तावे व्याख्यास्यामः ॥ ४९ ॥

---

१. अत्र किञ्चित् त्रुटितं भाति ।

२. 'बुद्धि०' इति क्वचित्पाठः ।

३. प्रतिबन्धा इत्युचितम् ।

तत्र नवधा तुष्टिमाह—

आध्यात्मिक्यश्चतस्रः प्रकृत्युपादानकालभाग्याख्याः ।
बाह्या विषयोपरमात् पञ्च नव च[1] तुष्टयोऽभिहिताः ॥५०॥

[2]आत्मन्यधिकृत्य प्रवर्तन्ते ताश्चतस्रस्तुष्टयः। प्रकृतितुष्टिरुपादानतुष्टिः कालतुष्टिः भाग्यतुष्टिश्चेति । यथा कश्चित्प्रकृतिमात्रं वेत्ति, न तु जानीते सगुणागुणत्वनित्यानित्यत्वचेतनाचेतनत्वसर्वगतत्वधर्मानस्याः केवलं प्रकृत्यस्तित्वमात्रज्ञानेनाहं जानामीति तुष्टः प्रव्रजितस्तस्य नास्ति मोक्षः । एषा प्रकृतितुष्टिः। कश्चित् त्रिदण्डकुण्डिकाक्षमालाकृष्णाजिनोपादानमात्रेणैवाहं मुक्त इत्यभिमानी ब्रूते । तेन मम मोक्षो भावीति । एतावन्मात्रेण तुष्टो ज्ञानाधिगमे न प्रवर्तते । तस्यापि न मोक्ष इत्येषा उपादानतुष्टिः । कश्चिदेवं ब्रूते कालेन स्वयं मोक्षो भावी किं तत्त्वविज्ञानेनेति । ज्ञाने अप्रवृत्त्यैव तुष्टः। तस्यापि न मोक्ष इति कालतुष्टिः। कश्चिदेव महाभाग्येनैव मुक्तो भवति। तस्माज् ज्ञानमसाधकं मुक्तेः स्यादिति तावता तुष्टः तस्य न मोक्ष एषा भाग्यतुष्टिः । एवमेता आत्मन्यधिकृत्य जायन्ते इत्याध्यात्मिक्यश्चतस्रस्तुष्टयः। बाह्यास्तु पञ्च तुष्टयः पञ्चानां विषयाणामुपरमाद्भवन्ति, अर्जनरक्षणक्षयातृप्तिहिंसादोषान् भावयतः पञ्च । एवमुभयत्र नव तुष्टयः । तत्रार्जनं नाम विषयाणां तदर्थं कृषिपाशुपाल्यादिव्यवसायदुःखमवधार्य तेभ्य एवोपरतस्तुष्टिं लभते । एषा पञ्चमी तुष्टिः । अर्जितानामपि राजचौरादिभ्यो दुःखं विषयाणां रक्षणं कर्तुं तस्मान्न विषयैः कार्यमित्युपरतस्तुष्टिं लभते, सा षष्ठी तुष्टिः । रक्षणेऽपि कृत उपभुज्यमानास्ते क्षीयन्त इति न तैः कार्यमित्युपरतस्तुष्टिं लभते, एषा सप्तमी। तथाऽर्जनक्षयादिप्रतीकारैरपि कृतैर्नास्तीन्द्रियाणां वैतृष्ण्यम् , तस्मान्न तैः कार्यमित्युपरतस्याष्टमी तुष्टिः। प्रोक्तानां प्रतीकारे कृतेऽप्यर्जनादिप्रवृत्तेन हिंसामन्तरेण भूतोपरोधं विनामी न प्राप्यन्ते तस्मान्न तैः कार्यमित्युपरतः तुष्टिं लभते । एषा नवमी तुष्टिः । एवमेताः पञ्च बाह्यास्तुष्टयः । उभयं नव भवन्ति । (एवमेताभिस्तुष्टिभिर्ज्ञानं विना मोक्षोऽस्तीति केवलेन वैराग्येण तुष्टः।) आसां नवानामपि तुष्टीनां ग्रन्थान्तरे संज्ञान्तराणि । तद्यथा—

---

१. 'पञ्च च नव' इति पाठो वाचस्पतेः सम्मतः। गौडपादानुसारिपाठे तु 'च' इति न दृश्यते ।

२. अध्यात्मं भवा आध्यात्मिक्य इति समुचितम् ।

अम्भः सलिलम् ओघो वृष्टिः तारं सुतारं सुनेत्रं सुमरीचम् उत्तमाम्भसिकमिति । आसां विपरीता अतुष्टयोऽनम्भ इत्याद्याः । एवं तुष्ट्यतुष्टयो व्याख्याताः ॥ ५० ॥

इदानीं सिद्धयो व्याख्यायन्ते—

ऊहः शब्दोऽध्ययनं दुःखविघातत्रयं[1] सुहृत्प्राप्तिः ।
दानं च सिद्धयोऽष्टौ सिद्धेः पूर्वोऽङ्कुशस्त्रिविधः ॥ ५१ ॥

तत्र ऊहो नाम यथा कश्चिच् चिन्तयति, किं परं याथात्म्यम्, किं निःश्रेयसम्, किं कृत्वा सुखं प्राप्यते । एवमस्य चिन्तयतो ज्ञानमुत्पद्यते स्वतः शास्त्रतो गुरुतो वा । यत् प्रधानबुद्ध्यहङ्कारतन्मात्रेन्द्रियभूतान्यन्यानि, अहमन्य इति ततो मोक्षं गच्छति । एषा ऊहसिद्धिः प्रथमा । चौरसाधुतदनुगामिस्वामिपथिकसंयोगादिवत् । प्रकृतिपुरुषशिष्यगुरुक्रमज्ञानम् । तद्यथा ग्राममाच्छिद्य चौरा यान्ति । तत्सार्थमध्ये साधुरेको गच्छति । तदनुगामी च स्वामी । चतुर्थः पथिकस्तदभिज्ञः । पथिकचौरमध्ये साधुरपि चौरगुणास्पृष्टोऽपि तदनुगामिना चौरतया प्रतीतस्तादृग्गणनायां (प्रतीतः) तदभिज्ञेन पथिकेन स्वामी सम्बोधितो यदहं सर्वं जानामि, अमी चौरा अयं साधुरेव तत्सार्थानुवर्तीति । एवं चौरस्थानीयो बुद्ध्यहङ्कारतन्मात्रेन्द्रियभूतसमवायः, साधुस्थानीयश्च पुरुषः, तदनुगामिस्थानीयः शिष्यो, भेदेन बोध्याः । पथिकस्थानीयो गुरुः । तस्माज्ज्ञानं प्रतीकत्रयेणैवावगम्यते—गुरुतः, शास्त्रतः, स्वत इत्यूहसिद्धिः प्रथमोक्ता । शब्दो नाम यथा कस्यचित्पठतः (तमस्य जनं) शब्दं श्रुत्वाऽन्यत् प्रधानमन्योऽहमिति तन्मार्गप्रवृत्तिप्रबुद्धो मोक्षं गच्छति । एवमेषा द्वितीया सिद्धिः शब्दत उत्पन्ना । कश्चिद् गुरूपासनया ततोऽधीत्यावगम्य सकलं ज्ञानमाप्नोति, तृतीयाध्ययनसिद्धिः साङ्ख्यज्ञानमधीत्य सञ्जाता । एवमेतास्तिस्रः सिद्धयः । शेषा व्याख्यायन्ते । दुःखविघातत्रयमिति । यथा कश्चिदादावभिहिताध्यात्मिकादिदुःखत्रयेणाभिभूतोऽस्य प्रतीकारायोहं शब्दमध्ययनं वा प्रतिपद्य ज्ञानमधिगम्य मोक्षं यातीति दुःखविघाताय यत्रोहादित्रयमधिकुरुते तदपि सिद्धित्रयम् । एवं षट् सिद्धयः । कश्चिद्दुर्मेधा गुरोः सकाशान्नावधारयति । तत् केनचित् प्रत्युपकारानपेक्षेण सुहृदा तस्मात् संसारकूपादुज्जिहीर्षुणा तदनुकूलतया कृपावता सुगमवचोभिर्वैराग्यपूर्वकं गुणपुरुषान्तरोपलब्धिरूपं साङ्ख्यज्ञानमुपदिशता समुद्धृतमालो-

१. 'दुःखविघातास्त्रयः' इति वाचस्पतिः पठति ।

क्याह, भगवान् शास्त्रकारः—सुहृत्प्राप्तिरिति । ते हि सुहृदस्तथोपदिशन्ति सुहृत्तया यथा पाषाणोऽप्यवबुध्यते । उक्तं च—

'एषा आतुरचित्तानां मात्रास्पर्शेच्छया विभुः ।
भवसिन्धुप्लवो दृष्टो यदाचार्यानुवर्तनम् ॥' (भागवतम् १।६।३५)[1]

एषा सप्तमी सिद्धिः । कश्चिदावाहनसंवाहनभिक्षापात्रवस्त्रच्छत्रकमण्डलुप्रभृतिदानेन गुरूनाराध्य साङ्ख्यमधिगम्य मोक्षं गच्छतीत्येषाऽष्टमी सिद्धिर्दानादिभिरुपायैर्निष्पन्ना । आसामष्टानां पूर्ववन्नामान्तराणि । तारं सुतारं तारतारं प्रमोदं प्रमुदितं मोहनं रम्यकं सदाप्रमुदितमिति । विपरीता असिद्धयः । तद्यथा अतारमित्याद्याः । ततश्च एकादशेन्द्रियवधाः, नवानां तुष्टीनां विपर्ययाः प्रकृत्युपादानकालभाग्याख्यानां पञ्चविषयोपरमतुष्टीनां च । अष्टानां सिद्धीनां विपर्यया अनूहादयः । सप्तदश वधा बुद्धेरेवमेकादश सप्तदश चाष्टाविंशतिभेदा अशक्तेरभिधीयन्ते । एवं विपर्ययाशक्तितुष्टिसिद्धीनामुद्देशः कृत इति वाक्यशेषः । सिद्धेः पूर्वोऽङ्कुशस्त्रिविधः । या ऊहाद्याऽष्टधा सिद्धिस्तस्या पूर्वो विपर्ययाशक्तितुष्टिरूपोऽङ्कुशो नियामकः । त्रिविधस्त्रिप्रकार इत्यर्थः । यथाऽङ्कुशेन गृहीतो गजो वश्यो भवति । एवं विपर्ययाशक्तितुष्टिरूपं त्रिविधं प्रत्ययसर्गं हित्वा सिद्धिः संसेव्या, सिद्धेस्तत्त्वज्ञानं, तस्माच्च मोक्ष इति तात्पर्यम् ॥ ५१ ॥

अत्राह—भगवता उक्तं पूर्वस्यामार्यायां भावैरधिवासितं लिङ्गं संसरति । तत्र किं लिङ्गं पूर्वोत्पन्नम् आहोस्वित् भावा इत्यत्रोच्यते—लिङ्गं तावत्सूक्ष्मं तान्मात्रिकं शरीरमनादिकालोत्पन्नं त्रयोदशविधेन करणेन संयुक्तं भावैरधिवासितं संसरति । करणानि बुद्ध्यहङ्कारमनोबुद्धिकर्माख्यानि त्रयोदश । एवं त्रयोदशविधकरणमाश्रित्य सूक्ष्मशरीरं तान्मात्रिकं संसरति । शरीरं करणानि चैतल्लिङ्गमित्यत्रोच्यते । भावैरधिवासितमिति भावा धर्मज्ञानवैराग्यैश्वर्याणि चत्वारः सात्त्विकाः । विपरीतास्तामसाः । एवमष्टौ भावाः । तत्र सन्देहः । किं लिङ्गं पूर्वोत्पन्नम्, उतस्विद् भावा इति । उच्यते—

न विना भावैर्लिङ्गं न विना लिङ्गेन भावनिर्वृत्तिः[2] ।

१. श्रीमद्भागवतस्य मुद्रितसंस्करणेषु 'एतद्ध्यातुर०' इति 'हरिचर्यानुवर्णनम्' इति च भिन्नौ पाठौ ।
२. 'भावनिष्पत्तिः' 'भावसंसिद्धिः' इति च पाठान्तरे ।

लिङ्गाख्यो भावाख्यस्तस्माद्भवति द्विधा[1] सर्गः ॥ ५२ ॥

लिङ्गेन विना भावो न भवति भावैश्च विना लिङ्गं न भवति। यथाऽग्निना विनाऽनोष्णत्वमुष्णत्वं विना नाग्निः। एवमेतयोर्लिङ्गभावयोर्युगपदुत्पत्तिः, गोविषाणवत्, कुमारीस्तनवत्। यत्र लिङ्गं तत्र भावा यत्र भावास्तत्र लिङ्गम्। तस्मादुच्यते—लिङ्गाख्यो भावाख्यः। लिङ्गेन आख्यायते स लिङ्गाख्यः। भावैराख्यायत इति भावाख्यः। तस्माद् द्विधा सर्गो भवति जायते ॥ ५२ ॥

अत्राह—किं द्विविध एव सर्गः किं तस्मादन्यस्तृतीयोऽप्यस्ति इति। अत्रोच्यते—

अष्टविकल्पो दैवस्तैर्यग्योनश्च पञ्चधा भवति।
मानुष्यश्चैकविधः समासतो भौतिकः सर्गः ॥ ५३ ॥

अष्टविकल्पो दैव इति। तद्यथा—ब्राह्मं प्राजापत्यम् ऐन्द्रं पैत्रं गान्धर्वं याक्षं राक्षसं पैशाचमित्येवमष्टविधो देवसर्गः। तैर्यग्योनश्च पञ्चधा भवति। अत्र तुल्यलिङ्गत्वाद्भवति पशुपक्षिमृगसरीसृपस्थावरान्तश्चेति। मानुष्य एकविधस्तुल्यलिङ्गत्वाद् ब्राह्मणादिचाण्डालान्तः। समासतः सङ्क्षेपेण त्रिविधोऽयं भूतमयः सर्गः। एवं चतुर्दशविधः ॥ ५३ ॥

अत्राह—एतेषु त्रिषु स्थानेषु कतरो गुण उत्कटत्वेन वर्तते—

ऊर्ध्वं सत्त्वविशालस्तमोविशालश्च[2] मूलतः सर्गः।
मध्ये रजोविशालो ब्रह्मादिस्तम्बपर्यन्तः ॥ ५४ ॥

ऊर्ध्वं सत्त्वविशाल इति। ब्रह्मादिपिशाचान्तो योऽष्टविधः सर्गः। असौ सत्त्वबहुलः। यस्मात्तेषु सत्त्वमुत्कटत्वेन वर्तते। तत्रापि रजस्तमसी स्तः किं तु सत्त्वस्योद्रिक्तता। तस्मात्सुखप्राया देवाः। तमोविशालश्च मूलतः। पश्वादिषु तमस उद्रेकात् पश्वादिस्थावरपर्यन्तो यस्मात्तेषु तम उत्कटत्वेन वर्तते तत्रापि गौणतया सत्त्वरजसी स्तः। तस्मात्ते तमोबहुलाः। मध्ये रजोविशालः। तत्रापि सत्त्वतमसी स्तः। किंतु रज उत्कटत्वेन वर्तते। तस्मात्ते दुःखप्राया मनुष्याः। ब्रह्मादिस्तम्बपर्यन्तः। चतुर्विध एष स्वेदजाण्डजादिना भूतसर्गः ॥ ५४ ॥

१. 'द्विविधः प्रवर्तते' इति गौडपादसम्मतः पाठः। 'द्वेधा प्रवर्तते' इत्यपि कुत्रचित्।

२. '०विशालास्तु' इति कुत्रचिद्दृश्यते।

अत्राह—भूतसर्ग उत्पन्नो भावसर्गः सम्पन्नो लिङ्गसर्गः सम्पन्न इति यत्र सर्गाः प्राधानिका इति प्रधानकार्यं समाप्तमिति। उत्पन्नास्त्रयो लोकाः प्रधानं चोपरतमुत्पाद्य लोकान् इति तेषु देवमनुष्यतिर्यग्योनिगतेषु दुःखं कोऽनुभवति। किं चतुर्विंशतितमं प्रधानम्, आहोस्वित् महदादित्रयोविंशतिकम्, उतस्वित्पुरुष इति? अत्रोच्यते—

अत्र जरामरणकृतं दुःखं प्राप्नोति चेतनः पुरुषः।
लिङ्गस्याविनिवृत्तेस्तस्माद् दुःखं समासेन[1] ॥ ५५ ॥

अत्र त्रिषु लोकेष्विति। देवलोके, मनुष्यलोके, तिर्यग्योनौ च जरामरणकृतं दुःखं प्राप्नोति चेतनः पुरुषः। तत्र जराकृतं वलीपलितैरभिभूतः कासश्वासैः परिगृहीतो यष्टिविष्टम्भगामी पुत्रस्नुषाद्यभिभूतो यद्दुःखमनुभवति तज्जराकृतम्। मरणकृतमिति। अष्टविधमैश्वर्यमस्ति यत्प्रागभिहितमणिमादि, दश विषयाः सन्ति। देवानां पञ्चाविशेषाः केवलसुखरूपाः। मनुष्याणां सविशेषास्त एव शब्दादयः सुखदुःखमोहसम्पन्नाः। तन्मरणपातावस्थायां यद्दुःखमुत्पद्यते तन्मरणकृतमित्येव। एवमेतैर्दुःखैरन्तकाले च जनितदुःखानि सर्वाणि प्राप्नोति चेतनः पुरुष एव प्रधानादीनामचेतनत्वात्। तस्मात्तस्यैव विज्ञानितया दुःखं न तु जडानां प्रधानादीनाम्। तर्हि कियन्तं कालं पुरुषो दुःखमाप्नोति। अत्रोच्यते—लिङ्गस्याविनिवृत्तेः। यावन्महदादि लिङ्गं न निवर्तते तावत्कालं पुरुषो दुःखभोक्ता। तस्माद्दुःखं समासेन—सङ्क्षेपेण प्राप्नोति चेतनः पुरुषः। यदा तु तत्प्रतिनिवर्तते महदादिलिङ्गं ज्ञानोत्पत्त्या ततो मोक्षं प्राप्नोति। मोक्षं गतस्य दुःखं नास्ति। ज्ञानेन हि लिङ्गं निवर्तते। यदा प्रत्येकं प्रधानमहदहन्तन्मात्रेन्द्रियभूतान्यन्यानि अहमन्य इति ज्ञानं तदा लिङ्गाभावः ॥ ५५ ॥

प्रकृतेः किं निमित्तमारभ्य इत्यत्रोच्यते—

इत्येष प्रकृतिकृतो[2] महदादिविषयभूतपर्यन्तः[3]।
प्रतिपुरुषविमोक्षार्थं स्वार्थ इव परार्थ आरम्भः ॥ ५६ ॥

१. 'स्वभावेन' इति गौडपादवाचस्पत्योः सम्मतः पाठः।

२, 'प्रकृतिकृतौ' इति गौड़पादः।

३. '०विशेषभूतपर्यन्तः' इति गौडपादवाचस्पती। 'प्रवर्तते तत्त्वभूतभावाख्यः' इति तु पुनः कुत्रचित्।

इत्येष प्रकृतिकृत इति। एवमादिर्यः पूर्वमुपवर्णितो लिङ्गसर्गो महदादिभूतपर्यन्तः, एष प्रकृतिकृत इति। अत्राह—एवं लिङ्गसर्गः प्रधानेन किमर्थं कृत इति? अत्रोच्यते—प्रतिपुरुषविमोक्षार्थम्। पुरुषं पुरुषं प्रति विमोक्षस्तदर्थं प्रतिपुरुषविमोक्षार्थम्। देवलोकगतानाम्, मनुष्यलोकगतानाम्, तिर्यग्योनिगतानां च मोक्षार्थमित्यर्थः। स्वार्थ इव परार्थ आरम्भः। स्वकीयोऽर्थः स्वार्थः। इवोपमायाम्। यथा कश्चित् स्वार्थमिव मित्रार्थं करोति तथा स्वार्थमिव प्रधानं पुरुषार्थं करोति। स चार्थो द्विविधः। शब्दाद्युपलब्धिरादिर्गुणपुरुषान्तरोपलब्धिरन्तश्च। त्रिषु लोकेषु शब्दादिविषयैः पुरुषं योजयति। अन्ते च गुणपुरुषान्तरोपलब्ध्या मोक्षं कुरुते ॥ ५६ ॥

अत्राह—उक्तं भगवता प्रधानं स्वार्थमिव परार्थमारभते। अथ च त्वया प्रधानमचेतनमुक्तं तत्कथं प्रवर्तते। [1]अचेतनानामपि प्रवृत्तिर्दृष्टा, निवृत्तिश्च।

वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य।
पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्य ॥ ५७ ॥

यथा तृणोदकं गवा भक्षितं पीतं च क्षीरभावेन परिणमति, वत्सवृद्धिं करोति, पुष्टे वत्से निवर्तते। एवं पुरुषविमोक्षनिमित्तं प्रधानस्याज्ञस्य प्रवृत्तिः ॥ ५७ ॥

औत्सुक्यनिवृत्त्यर्थं यथा क्रियासु प्रवर्तते लोकः।
पुरुषस्य विमोक्षार्थं प्रवर्तते तद्वदव्यक्तम् ॥ ५८ ॥

यथा लोक इष्टविषयौत्सुक्ये सति तस्य निवृत्त्यर्थं क्रियासु गमनागमनासु प्रवर्तते कृतकार्यो निवर्तते। तथाऽव्यक्तं पुरुषस्य विमोक्षार्थं शब्दादिभोगलक्षणं गुणपुरुषान्तरोपलब्धिलक्षणं द्विविधं पुरुषार्थं कृत्वा निवर्तते ॥ ५८ ॥

किञ्चान्यत्—

रङ्गस्य दर्शयित्वा निवर्तते नर्तकी यथा नृत्यात्।
पुरुषस्य तथाऽऽत्मानं प्रकाश्य विनिवर्तते प्रकृतिः ॥५९॥

यथा नर्तकी शृङ्गारादिरसैर्हावभावैश्च निबद्धगीतवादित्रनृत्यानि रङ्गस्य दर्शयित्वा कृतकार्या नृत्यान्निवर्तते। एवं प्रकृतिर्महदहङ्कारत-

१. अत्र 'उच्यते' इत्यपेक्षितम्।

न्मात्रेन्द्रियभूतभावेन देवमानुषतिर्यग्रूपासु योनिषु सुखदुःखमोहाकृतिः शान्तघोरमूढविषया सती आत्मानं पुरुषस्य प्रकाश्य निवर्तते। तस्यां च निवृत्तायामसौ केवलः पुरुषो दुःखत्रयं नानुभवति। यथा जलवाहकस्य घटाभावे तदाधेयस्योदकस्याभावः। तथा दुःखाभावः। ततोऽसौ मोक्षं गच्छति ॥ ५९ ॥

अत्राह—यथा नर्तकी नृत्यादिभिरुपायैरात्मानं प्रकाश्य रङ्गाद् विनिवर्तते, एवं प्रकृतिः पुरुषस्य कैरुपायैरात्मानं प्रकाश्य विनिवर्तते? अत्रोच्यते—

नानाविधैरुपायैरुपकारिण्यनुपकारिणः पुंसः।
गुणवत्यगुणस्य सतस्तस्यार्थमपार्थकं चरति ॥ ६० ॥

नानाविधैरुपायैः। शब्दस्पर्शादिभिरुपकर्तुं शीलमस्याः सा तथोक्ता। अनुपकारिणः पुंसः। निष्क्रियत्वादिति यावत्। तस्योपकारिणी प्रकृतिस्तस्योपकृत्याहमन्या त्वमन्य इति निवर्तते (प्रकृतिः)। किं चान्यत्—गुणवती। सा सत्त्वरजस्तमोमयी। अगुणस्य सतः। पुंसः निष्क्रियोदासीनामूर्तादिलक्षणवत्त्वात्। एवमस्य पुंसोऽगुणस्यापि सतः (नित्यस्य) सेयं गुणवती अर्थमपार्थकं चरति। करोति। यथा कश्चिदनुरक्तो मित्रसुहृत्त्वमवलम्ब्य मित्रार्थमनुक्तमपि प्रत्युपकारमनपेक्ष्य कुरुते। एवं प्रधानं पुरुषस्य द्विविधमपि विषयोपलब्धिमोक्षात्मकमर्थं कुरुते। पुमान् पुनः प्रधानस्य किमपि न प्रत्युपकरोति। तत् प्रधानपुंसोः शिखिपिच्छवदेकपक्षचित्रन्यायः ॥ ६० ॥

निवृत्ता किं करोत्येतदाह—

प्रकृतेः सुकुमारतरं न किञ्चिदस्तीति मे मतिर्भवति।
या दृष्टाऽस्मीति पुनर्न दर्शनमुपैति पुरुषस्य ॥६१॥

प्रकृतिरपि प्रधानमपि कुरुते। यथेह स्नुषा व्रीडया स्वगृहान्तः प्रविशति अतो ब्रवीति इयं विशिष्टतरेति। एवमियं प्रकृतिः सुकुमारतरा। तस्मात्प्रकृतेः सुकुमारतरं नान्यदस्तीति। एवं पुरुषस्य परमात्मनोऽपि मतिरुत्पन्ना। नास्तीति मे मतिर्भवति। ममेति पुरुष आत्मानं ब्रवीति। तत्र सुकुमारतरत्वं वर्णयति ईश्वरः कारणमिति केचिदाचार्या ब्रुवते। उक्तं च—

"अज्ञो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः।
ईश्वरप्रेरितो गच्छेत्स्वर्गं नरकमेव वा ॥" (महाभा० ३।३१।२७)

वेदवादिनः पुनरित्थं कारणमाहुः। 'पुरुष एवेदं सर्वम्' (श्वे० उ० ३।१५) इत्यतः पुरुषं कारणमाहुः। अपरे स्वभावमाहुः। स्वभावः कारणमिति। तथा हि—

'येन शुक्लीकृता हंसाः शुकाश्च हरितीकृताः।
मयूराश्चित्रिता येन स नो वृत्तिं विधास्यति॥' (हि० १।१८३)

अत्र साङ्ख्या वदन्ति। ईश्वरः कारणं न भवति। कस्मात्, निर्गुणत्वात्। इमाः सगुणाः प्रजाः। सत्त्वरजस्तमांसि त्रयो गुणाः, ते च प्रजासु सन्ति। तांश्च गुणान् दृष्ट्वा साधयामः। प्रकृतेरिमाः समुत्पन्नाः प्रजाः। यदीश्वरः कारणं स्यात्ततो निर्गुणादीश्वरान्निर्गुणा एव प्रजाः स्युः। न चैवम्। तस्मादीश्वरः कारणं न भवति। एवं पुरुषोऽपि द्रष्टव्यः। स्वभावो नाम न कश्चित्पदार्थोऽस्ति। यतः प्रजानामुत्पत्तिसङ्गतिः स्यात्। तस्माद्यो ब्रूते स्वभावः कारणमिति तन्मिथ्या। केचित् कालं कारणतया वर्णयन्ति—

'कालः सृजति भूतानि कालः संहरते प्रजाः। (महाभा॰ ३।१३।७०।५७*)[1]
कालः सुप्तेषु जागर्ति तस्मात्कालस्तु कारणम्॥'

तदपि साङ्ख्यो निराकुरुते। कालो नाम न कश्चित्पदार्थोऽस्ति। व्यक्तमव्यक्तं पुरुष इति त्रय एव पदार्थाः। तत्र कालोऽन्तर्भूतः। एवं प्रधानं हित्वा नास्त्यन्यत् कारणम्। तत्प्रधानावगमं प्रति यदा पुरुषस्य सम्यग् ज्ञानमुत्पद्यते तदा तेन ज्ञानेन दृष्टा प्रकृतिः पुरुषसङ्गान्निवर्तते। स्वैरिणीव पुरुषेणोपलक्षिता। अये इयमसाध्वी मां मोहयति, तस्मान्न ममानया कार्यमितिवत्। तस्यां च निवृत्तायां मोक्षं गच्छति। एवमीश्वरादीनि अकारणानि। सुकुमारतरम् इत्येतद् वाक्यशेषः कृतः। यस्मात्सुकुमारतरं प्रधानं तस्मादुच्यते—प्रकृतेः सुकुमारतरं न किञ्चिदस्तीति मे मतिर्भवति। इति मे पुरुषस्य। अत्राह—सा दृष्टा पुरुषेण कथं निवर्तते प्रकृतिः। अत्रोच्यते—या दृष्टास्मीति पुनर्न दर्शनमुपैति पुरुषस्य। यथा काचित्कुलस्त्री साध्वी स्वगृहद्वारि स्थिता पुरुषेण सहसैवागतेन दृष्टा सहसैवं व्रीडमाना त्वरितं गृहं प्रविष्टा सा एवं मत्वा दृष्टाऽहमनेनेति न पुनर्दर्शनमुपैति पुरुषस्य। एवं प्रकृतिः परमात्मना पुरुषेण ज्ञानचक्षुषा दृष्टा सव्रीडा कुलस्त्रीवन्न पुनर्दर्शनमुपैति पुरुषस्य। तस्यां च निवृत्तायां पुरुषो मोक्षं गच्छति॥ ६१॥

१॰ महाभारतेऽन्यत्र (११।२।२४) 'सृजति' इत्यत्र 'पचति' इति, अन्तिमचरणे तु 'कालो हि दुरतिक्रमः' इति च पाठान्तरद्वयमवलोक्यते।

अत्राह—लोके शिष्टा वदन्ति पुरुषो बद्धः, पुरुषो मुक्तः, पुरुषः संसरति। अत्रोच्यते—

तस्मान्न बध्यते नापि[1] मुच्यते नापि संसरति कश्चित्।
संसरति बध्यते मुच्यते च नानाश्रया प्रकृतिः॥ ६२॥

पुरुषो न बध्यते सर्वगतत्वात्, अविकारत्वात्, निष्क्रियत्वात्, अकर्तृत्वात्। यस्मान्न बध्यते तस्मान्न मुच्यते। मुक्त एव सः। अबद्धः कुतो मुच्यते। कस्याभुक्तेन विसूची भवति। न संसरति सर्वगतत्वात्। सर्वगतस्य बन्धमोक्षौ कुतः। अनधिगतप्रापणार्थं संसरणमित्युपदिश्यते। तेन च सुनिपुणं सर्वं प्राप्तम्। पुरुषं न विदन्ति ये त एवं वदन्ति पुरुषो बद्धः, पुरुषो मुक्तः, पुरुषः संसरति। अत्राह—यदि पुंसो बन्धमोक्षसंसरणानि न स्युः तर्हि कस्य भवन्ति। तदुच्यते—संसरति बध्यते मुच्यते च नानाश्रया प्रकृतिः। प्रकृतिरात्मानं बध्नाति, मोचयति, संसरति च। यत्तत्सर्गादौ सूक्ष्मं शरीरं तान्मात्रिकं प्रागुक्तं त्रयोदशविधेन करणेन संयुक्तं त्रिविधेन बन्धेन बद्धं संसरति। स च बन्धस्त्रिविधः पूर्वमाख्यातः[2]। तदेव सूक्ष्मशरीरमुत्पन्ने ज्ञाने त्रिधा बन्धान्मुच्यते। तस्मान्मुच्यते बध्यते संसरति नानाश्रया प्रकृतिः। नानाश्रया देवमनुष्यतिर्यक्शरीरभूतेत्यर्थः। एवं यत् प्रधानं तत् सूक्ष्मं शरीरं तत् प्रधानं प्रकृतिरित्यनर्थान्तरम्। तत्र यः पुंसो बन्धमोक्षसंसरणानि ब्रूते स मूढः॥ ६२॥

अत्राह—सा प्रकृतिः कैर्गुणैरात्मानं बन्धयति, कैर्वा मोचयतीति? अत्रोच्यते—

रूपैः सप्तभिरेवं[3] बध्नात्यात्मानमात्मना प्रकृतिः।
सैव च पुरुषस्यार्थं प्रति विमोचयत्येकरूपेण॥ ६३॥

सप्तभी रूपैरियमेवं प्रकृतिर्धर्मादिभिर्विना ज्ञानम् आत्मनाऽऽत्मानं बध्नाति। सैव च प्रकृतिः गुणपुरुषान्तरोपलब्धिरूपं प्रति, एकरूपेण ज्ञानेनात्मानं विमोचयति॥ ६३॥

---

१. 'बध्यतेऽसौ न' इति वाचस्पतिसम्मतः पाठः।

२ प्रकृतिबन्धो वैकारिकबन्धो दक्षिणाबन्धः। प्राकृतेन च बन्धेन तथा वैकारिकेण च। दाक्षिणेन तृतीयेन बद्धो ज्ञानेन मुच्यते।

३. 'सप्तभिरेव तु' इति गौडपादवाचस्पतिचन्द्रिकाकाराः पठन्ति।

कथं तज्ज्ञानमुत्पद्यते—

एवं तत्त्वाभ्यासान्नास्मि न मे नाहमित्यपरिशेषम् ।
अविपर्ययाद्विशुद्धं केवलमुत्पद्यते ज्ञानम् ॥ ६४ ॥

एवमिति । यथा, एतानि पञ्चविंशतितत्त्वानि पुरुषाद्यानि भूतपर्यन्तानि तेषामभ्यासस्तत्त्वाभ्यासः । अभ्यासेनैव तत्त्वदर्शनम् । तस्मादभ्यासात् पुरुषस्य बुद्धिरुत्पद्यते । नास्मि तत्त्वानि, न मे तत्त्वानि, नाहं तत्त्वानाम्, किं तु प्राधानिकान्येतानि । तस्माज्ज्ञानमुत्पद्यत एवमादि । अपरिशेषं निरवशेषमित्यर्थः[1] । किं चान्यत् (ज्ञानं यस्मादाह)—अविपर्ययात् । विपर्ययः संशयस्तद्विपरीतोऽविपर्ययस्तस्मादविपर्ययादसंशयायथाभूतार्थदर्शनाद्विशुद्धम् निरवद्यमव्यामिश्रं केवलं[2] ज्ञानमुत्पद्यते प्रादुर्भवति । किं ज्ञानम् ? गुणपुरुषान्तरोपलब्धिरूपमित्यर्थः ॥ ६४ ॥

अत्राह—तेन ज्ञानेन पुरुषः किं करोति । अत्रोच्यते—

तेन निवृत्तप्रसवामर्थवशात् सप्तरूपविनिवृत्ताम् ।
प्रकृतिं पश्यति पुरुषः प्रेक्षकवदवस्थितः स्वस्थः[3] ॥ ६५ ॥

यथा कश्चित्प्रेक्षको रङ्गस्थितो गीतवादित्रनृत्यादिभिर्वर्तमानां नर्तकीं स्वस्थो निर्विकल्पः पश्यति । एवं पुरुष आत्मकृतेन ज्ञानेन तासु तास्ववस्थासु वर्तमानां प्रकृतिं पश्यति—इयं सा प्रकृतिर्या सर्वपुराणमात्मानं बध्नाति । प्रेक्षकवत् प्रेक्षकेण तुल्यः स्वस्थः स्वस्मिन् भावे स्थितः । किंभूतां प्रकृतिम् ? निवृत्तप्रसवाम् । निवृत्तबुद्ध्यहङ्कारकार्याम् । अर्थवशात्सप्तरूपविनिवृत्ताम् । निर्वर्त्तितोभयपुरुषप्रयोजनवशाद् यैः सप्तभी रूपैर्धर्मादिभिरात्मानं बध्नाति तेभ्यो रूपेभ्यो विनिवृत्ताम् । यावज्ज्ञानचक्षुषा दृष्टा प्रकृतिः पुरुषेण तथा च पुमान् दृष्टः ॥ ६५ ॥

अत्राह—ज्ञानचक्षुषा दृष्ट्वा प्रकृतिं पुरुषः किं करोति ? अत्रोच्यते—

दृष्टा मयेत्युपेक्षक[4] एको दृष्टाऽहमित्युपरतान्या[5] ।

---

१. न मे शरीरं यतोऽहमन्यः शरीरमन्यत् नाहम् इत्यपरिशेषम् अहङ्काररहितम् ।

२. मोक्षकारणं पञ्चविंशतितत्त्वज्ञानम् । ३. 'सुस्थः' इति वाचस्पतिः ।

४. 'रङ्गस्थ इत्युपेक्षक' इति गोडपादसम्मततया प्रतिभाति ।

५. '०त्युपरतैका' इति गौडपादः । '०त्युपरमत्यन्या' इति वाचस्पतिचन्द्रिकाकारौ ।

सति संयोगेऽपि तयोः प्रयोजनं नास्ति सर्गस्य ॥ ६६ ॥

यथेमां रङ्गगतां नर्तकीं सर्वास्ववस्थासु वर्तमानां दृष्ट्वा विरमति रङ्गात् प्रेक्षकः दृष्टा मयेत्युपेक्षक एकः केवलः शुद्धः पुरुषः । तथा प्रकृतिरपि—'अनेनाहं दृष्टे'ति निवृत्ता । एका त्रैलोक्यस्यापि प्रधानकारणभूता न द्वितीया प्रकृतिरस्ति । नर्तक्यपि—'अहमनेन दृष्टा' इत्युपरमते नृत्यात्, एवं पुरुषोऽपि 'दृष्टा मयेयं ज्ञानचक्षुषा प्रकृतिः' इति प्रेक्षकवदुपरमते मोक्षं गच्छतीत्यर्थः । तथा प्रकृतिरपि दृष्टाऽहमनेनेति स्वव्यापारादुपरमत्येव । अत्राह—पुंप्रकृत्योः सर्वगतत्वान् सर्वनिषेधो न शक्यते वक्तुम् । तदस्य संसारसर्गस्य विनिवृत्तिरेव । तत्कथमिदं साधनं समीचीनमिति । अत्रोच्यते—सति संयोगेऽपि तयोः प्रयोजनं नास्ति सर्गस्येति । यद्यपि प्रधानपुरुषयोः सर्वगतयोः संयोगो भवत्येव । तस्मिंश्च सति सर्गसम्भवस्तथाऽपि नासौ सर्गः स्यात् प्रयोजनाभावात् । यस्मात् प्रधानस्य पुरुषार्थो प्रवृत्तिः । स च पुरुषार्थो द्विविधः । शब्दाद्युपलब्धिरादिर्गुणपुरुषान्तरोपलब्धिरन्तश्च । ब्रह्मादिस्थावरान्तेषु पुरुषः शब्दादिभिर्विषयैर्योजयितव्यः । अन्ते च गुणपुरुषान्तरोपलब्ध्या मोक्षयितव्यः । एवं पुरुषदर्शनार्थं सम्प्रयोगः कृतः । एवं प्रकृतिपुरुषयोस्तयोः शरीरोत्पत्तिर्नास्ति पुनः ऋणिकधारिणकवद्[1] यथेह लोके ऋणिकधारिणकौ उत्तमाधमर्णौ देवदत्तयज्ञदत्तौ योऽस्मिन् ऋणं धारयति स उत्तमर्णस्तेनाधमर्णोक्तः—'ऋणं मे देही'ति । ततस्तेन तद्दत्तम् । ततस्तौ कृतप्रयोजनौ परस्परमर्थेन सन्त्यक्तावथ तयोर्भूयः संयोगो भवति । तथाऽपि नार्थकृत्यं प्रयोजनाभावात् । यथा वा वृद्धसंयोगादपत्यं न भवति, प्रयोजनाभावात् । तथा प्रधानपुरुषयोः कृतप्रयोजनयोः प्रयोजनं नास्तीति सिद्धम् ॥ ६६ ॥

किञ्चान्यत्, यदि पुरुषस्योत्पन्ने ज्ञाने मोक्षस्तर्हि मम कस्मान्न भवति । अत उच्यते—

सम्यग्ज्ञानाधिगमाद् धर्मादीनामकारणप्राप्तौ ।
तिष्ठति संस्कारवशाच्चक्रभ्रमवद्[2] धृतशरीरः ॥ ६७ ॥

यदा पुरुषेण पञ्चविंशतितत्त्वज्ञानमधिगतं भवति तदा धर्मादीन्यकारणानि प्राप्तानि पुनर्जन्मसमर्थानि न भवन्ति । को दृष्टान्तः—यथेह

---

१. 'ऋणिकधनिकवत्' इति पाठः समुचितः ।

२. '०चक्रभ्रमिवत्' इति काञ्चित्कः पाठः, किन्तु स कस्य सम्मत इति निश्चयेन न वक्तुं शक्यते ।

लोके बीजान्यग्निदग्धानि न प्ररोहसमर्थानि भवन्ति। धर्मो येषाम् आदिस्तानि धर्मादीनि तेषाम् अकारणानां प्राप्तिरकारणप्राप्तिः। तथा सत्यां पुनर्जन्म न भवति। अत्राह—यदि सम्यग् ज्ञानान्मोक्षो भवति तत्राचार्यस्योपदेष्टुः सम्यग् ज्ञानमुत्पन्नं किमर्थं मोक्षं न गतोऽस्ति, अथवा त्वत्प्रसादात्तज्ज्ञानं ममापि सञ्जातं किमहं मोक्षं न गच्छामि। अत्रोच्यते—तिष्ठति संस्कारवशात्। संस्कारो नाम धर्माधर्मौ निमित्तं कृत्वा शरीरोत्पत्तिर्भवति तिर्यङ्मनुष्यदेवादिषु। तस्य संस्कारेण ग्रहणम्। स च संस्कारः फलमदत्त्वा क्षयं न गच्छति, उत्पन्नज्ञानस्यापि तस्मादिदं शरीरं विनाशं यास्यति। तन्निमित्ताभावादिदं शरीरं पतिष्यति। यथा च विद्वान् मोक्षं यास्यति। तस्मात् हेतोरुत्पन्नज्ञानस्यापि धर्माधर्मवशात् तिष्ठति शरीरम्। को दृष्टान्तः? अत्रोच्यते—चक्रभ्रमवद् धृतशरीरः। यथा कुलालश्चक्रं भ्रमयति घटं करिष्यामीति। स कुलालो घटं कृत्वा यथा स्वस्थो भवति, अवतिष्ठते। यस्मिंश्चावतिष्ठमाने चक्रं भ्रमत्येव। संस्कारवशात्—कर्मवशादित्यर्थः। एवमेव पूर्वकृतयोर्धर्माधर्मयोर्बलवत्त्वाद् दुर्बलत्वाज् ज्ञानस्य, उत्पन्नेऽपि ज्ञाने विद्वांस्तिष्ठति संस्कारवशाच् चक्रभ्रमवद् धृतशरीरः॥ ६७॥

अत्राह—उत्पन्नज्ञानः फलनिरपेक्षं कर्म निर्बीजं कुर्वन्न देहमारभते, आरब्धफलं यावत् जन्मदायि 'नाभुक्तं क्षीयते कर्म' 'अवश्यमेव भोक्तव्यं कृतम्' इति क्षपयन्, अनारब्धफलेषु 'यथैधांसि समिद्धोऽग्निः (गी० ४।३७)' इति परिहारेण भस्मीकरणम्। एवं कर्मणां ध्वंसे, उत्पन्ने ज्ञानेऽपि कदा विद्वान् मोक्षं गच्छतीति? अत्रोच्यते—

प्राप्ते शरीरभेदे चरितार्थत्वात्प्रधानविनिवृत्तौ[1]।
ऐकान्तिकमात्यन्तिकमुभयं कैवल्यमाप्नोति॥ ६८॥

तदेवं सति शरीरभेदे देहनाशे प्राप्त आयात इत्यर्थः। चरितार्थत्वात्। स चार्थो द्विविधः (शाब्दात्मिकः) पूर्वमुक्तः। तस्यार्थस्य चरितार्थत्वात् कृत्वेत्यर्थः। प्रधानविनिवृत्तौ। यदा पूर्वकृतयोर्धर्माधर्मयोः क्षयो भवति तदा शरीरं भिद्यते। तस्मिंश्च शरीरे भिन्ने पूर्वोक्तेन ज्ञानेन शरीरं प्रधानाख्यं कारणमविशेषमयं तान्मात्रिकं सर्गादावुत्पन्नं तन्निवर्तते। इह शरीरे यत् पार्थिवं तत् पृथिवीं प्रविशति। एवमन्यदन्येषु प्रविशति। एवं स्थूलं शरीरं पञ्चधा भिद्यते। प्रधानं च कृतप्रयोजनं भूयोऽन्यत्

१. '०निवृत्तेः' इति क्वचित्कः पाठो न कस्यापि टीकाकर्तुः सम्मतः।

शरीरं द्वितीयं नारभते विदुषः। एवमयं विद्वान् तस्मिन् शरीरे भिन्ने—ऐकान्तिकमात्यन्तिकमुभयं कैवल्यमाप्नोति। ऐकान्तिकमवश्यम्भावित्वादात्यन्तिकमपुनरावृत्तित्वात् सर्वथेत्यर्थः। न त्वौषधादिवत् कादाचित्करोगनिवृत्तिवत्। न च निवृत्ते रोगे पुनः सम्भवेदित्युभयोदाहरणमैकान्तिकात्यन्तिकयोः। इत्थमेकान्तात्यन्तस्तापत्रयस्याभावादुपरमादनुत्पत्तेः कैवल्यं मोक्ष इत्यर्थः। तमाप्नोति॥ ६८॥

अत्राह—किंप्रयोजनमिदं ज्ञानमुच्यते। अत्रोच्यते—

पुरुषार्थज्ञानमिदं[1] गुह्यं परमर्षिणा समाख्यातम्।
स्थित्युत्पत्तिप्रलयाश्चिन्त्यन्ते यत्र भूतानाम्॥ ६९॥

यश्चासौ पुरुषार्थो मोक्षस्तदर्थं पुरुषविमोक्षार्थं ज्ञानमिदमिति। यदेतत पूर्ववर्णितं ज्ञानं एतद् गुह्यं दुर्विज्ञेयमित्यर्थः। परमर्षिणा कपिलेन समाख्यातं कथितमित्यर्थः। अत्राह—अस्मिन् ज्ञाने केऽर्थाश्चिन्त्यन्ते। अत्रोच्यते—स्थित्युत्पत्तिप्रलयाः तत्र देवादीनामष्टौ स्थानानि भवन्ति। मानुष्यं चैकविधम्, भूलोके पञ्चविधं तैर्यग्योनम्। एषु स्थानेषु ब्रह्मादीनि तिर्यग्योनिपर्यन्तानि तिष्ठन्ति। एषा स्थितिः। उत्पत्तिं प्रादुर्भावं[2] प्रधानान्महदहङ्कारतन्मात्रेन्द्रियमहाभूतानीत्युत्पत्तिः। एवं भूतोत्पत्तिर्भावोत्पत्तिश्च व्याख्याता। लयं वक्ष्यामः—भूतानि तन्मात्रेषु लीयन्ते, तानीन्द्रियेषु, इन्द्रियाणि लीयन्ते चाहङ्कारे, स बुद्धौ, सा प्रधाने लयं गच्छति। प्रधानं तु क्वचिन्न लीयतेऽविकृतत्वात्। एवं प्रलयः॥ ६९॥

अत्राह—यदेतद् भगवता व्याख्यातं पञ्चविंशतितत्त्वज्ञानम्, तस्य कुत आगम इति? अत्रोच्यते—

एतत् पवित्र्यमग्र्यं मुनिरासुरयेऽनुकम्पया प्रददौ।
आसुरिरपि पञ्चशिखाय तेन च बहुलीकृतं[3] तन्त्रम्॥ ७०॥

१. 'पुरुषार्थं ज्ञानमिदं' इति चन्द्रिकाकर्तुः सम्मतः पाठः।

२. 'पुरुषार्थार्थमिदं' इति यत् केचित् पठन्ति तत्तु युक्तिदीपिकाकर्तुः सम्मत इति तत्सम्पादका मन्यन्ते।

३. 'बहुधा कृतं' इति वाचस्पतिचन्द्रिकाकारयोः सम्मतः पाठः। बहुलीकृतमिति पाठे माठराचार्यस्य सम्मतिरपि संशयास्पदमेव। गौडपादेन तु ७०-७२ संख्याकास्त्रिस्रः कारिका न व्याख्याताः।

एतत् विज्ञानमधिकुरुते । एतत् पवित्रं, कथं पवित्रम् ? । यस्मान्नरकप्रेततिर्यग्योनिषु पतनात् त्रायते तस्मात्पवित्रम् । अग्र्यं श्रैष्ठ्यात् । वेदपुराणभारतमन्वादिभ्योऽपि धर्मशास्त्रेभ्य एतत् पञ्चविंशतितत्त्वज्ञानमुत्तमम् । कस्मात् ? ऐकान्तिकत्वात्, आत्यन्तिकत्वाच्च । अतो दुःखाभावश्च । मुनिर्भगवान् कपिलः आसुरिसगोत्राय ब्राह्मणाय वर्षसहस्रयाजिनेऽधिकारितामवगम्य (अस्मै) प्रददौ । तदनुकम्पया तद्विमोक्षार्थम् । अन्धे तमस्यज्ञानेऽयं तपस्वी वर्तत इत्युत्पन्नयाऽनुकम्पया । मुनिर्मननात् । भगवान् भूतानां गतिमागतिं च विदन्ननति चलतीति भगवान् कपिलः । प्रत्युपकारानपेक्षसर्वोपकारी सुहृदित्यर्थमवलम्ब्योवाच । तदेव ज्ञानं भूय आसुरिसगोत्रोऽनुकम्पया पञ्चशिखाय प्रोवाच । पञ्चशिखेन तेन बहुधाकृतं तन्त्रम् । बहूनां शिष्याणां प्रदत्तम् ॥ ७० ॥

तन्त्रमिति व्याख्यायते । 'तम एव खल्विदमग्र आसीत्' (मै० उ० ५।२)[1] । तस्मिंस्तमसि क्षेत्रज्ञोऽभिवर्तते प्रथमम् । तम इति उच्यते प्रकृतिः, पुरुषः क्षेत्रज्ञः । षष्टिपदार्था यस्मिन् शास्त्रे तन्त्र्यन्ते तत् षष्टितन्त्रम् । षष्टितन्त्रं ज्ञात्वा कुशलः किलेश्वरकृष्णनामा । तेन ईश्वरकृष्णेन विस्तरग्रन्थग्रहणभीरुणा हितार्थं षष्टितन्त्रम् अतिसङ्क्षिप्तम् । तदाह—

शिष्यपरम्परयाऽऽगतमीश्वरकृष्णेन चैतदार्याभिः ।
सङ्क्षिप्तमार्यमतिना सम्यग् विज्ञाय सिद्धान्तम् ॥ ७१ ॥

शिष्यपरम्परयाऽऽगतमिति । कपिलादासुरिणा प्राप्तमिदं ज्ञानम् । ततः पञ्चशिखेन, तस्माद् भार्गवोलूकवाल्मीकिहारीतदेवलप्रभृतीनागतम् । ततस्तेभ्य ईश्वरकृष्णेन प्राप्तम् । तदेव षष्टितन्त्रम् आर्याभिः सङ्क्षिप्तम् आर्यमतिना विस्तीर्णमतिना सम्यग् विज्ञाय सिद्धान्तम् कार्यकारणसिद्धस्य शरीरस्यान्तोऽपुनर्भावो मोक्षस्तस्य तादात्म्यमित्यर्थः । तत्सिद्धस्य शरीरस्य सूक्ष्मस्य तान्मात्रिकस्य सर्गादिभवस्यान्तो मूर्तिनाश इति वा एष षष्टितन्त्र इति तात्पर्यम् ॥ ७१ ॥

सप्तत्यां किल योऽर्थास्तेऽर्थाः कृत्स्नस्य षष्टितन्त्रस्य ।
आख्यायिकाविरहिताः परवादविवर्जिताश्चेति[2] ॥ ७२ ॥

१. आकरे तु 'तमो वा इदमग्र आसीत् इति पाठभेदोऽवलोक्यते ।

२. '०विवर्जितश्चापि' इत्यत्र सर्वत्रैव पाठः ।

ये षष्टितन्त्रे पदार्था अभिहितास्ते सप्तत्यां व्याख्याताः कथिताः । षष्टिभेदाः प्राग् व्याख्याताः । 'भेदस्तमसोऽष्टविध' इति आर्यायां 'पञ्च विपर्ययभेदा' इत्यत्र चाभिहिता इत्येते पञ्चाशत् प्रत्ययाः इमे चान्ये दश मौलिकाः । तथा हि—

[1]अस्तित्वमेकत्वमथार्थवत्त्वं पारार्थ्यमन्यत्वमथो निवृत्तिः[2] ।
योगो वियोगो बहवः पुमांसः स्थितिः शरीरस्य च शेषवृत्तिः ॥

तत्र 'भेदानां परिमाणात्' इत्येतैः पञ्चभिर्हेतुभिः प्रधानास्तित्वमेकत्वमर्थवत्त्वं च सिद्धम् । 'सङ्घातपरार्थत्वात्' इति परार्थत्वमुक्तम् । 'जन्ममरणकरणानाम्' इति पुरुषबहुत्वं सिद्धम् । 'चक्रभ्रमवद् धृतशरीर' इतिस्थितिः सिद्धा, एते दश, 'पञ्च विपर्ययाः' अष्टाविंशतिधा अशक्तिः, नवधा तुष्टिः अष्टधा सिद्धिरिति पञ्चाशत् । उभयं मिलित्वा षष्टिपदार्थाः षष्टितन्त्रे । तन्त्र्यन्ते व्युत्पाद्यन्ते पदार्था इति तन्त्रम् । षष्टिपदार्थानां तन्त्रमिति सङ्गतिः । आख्यायिकाविरहिताः परवादविवर्जिताश्चेति । परेण सह वादः परवादः तेन वर्जिताश्च । इति परिसमाप्तमिति ॥ ७२ ॥

अत्राह—कथमेतदल्पग्रन्थं शास्त्रं कृत्स्नस्य वाचकं भविष्यति ? अत्रोच्यते—

तस्मात्समासदृष्टं शास्त्रमिदं नार्थतश्च परिहीनम् ।
तन्त्रस्य च बृहन्मूर्तेर्दर्पणसङ्क्रान्तमिव बिम्बम् ॥ ७३ ॥[3]

यस्मात् षष्टितन्त्रम्[4] इति हेतुः । समासदृष्टं सङ्क्षेपतो ग्रन्थमित्यर्थः । शास्त्रमिति । शास्यते येनोत्पथादिति शास्त्रम् । तीर्थोदकमहत्फलम् । कर्ता भोक्ता भोज्यं मोक्षश्चात्र चिन्त्यते । अथ दुःखानां शासनात् शास्त्रम् । इदम्—इमां सप्ततिं दर्शयति । नार्थतश्च परिहीनम् । षष्टिपदार्थ-

१. अत्र एकत्वार्थवत्त्वपरार्थत्वानि प्रधानगतानि, अन्यत्वाकर्तृत्वबहुत्वानि पुरुषगतानि, अस्तित्वयोगवियोगा उभयगताः । स्थितिः शरीरस्य शेषगता वृत्तिः स्थूलसूक्ष्मगता । इत्यवधेयम् ।

२. ०मथो निवृत्तिरित्यस्य स्थाने मत्कर्तृता च इति पाठः समुचितः ।

३. कारिकेयं सर्वैरन्यैः टीकाकर्तृभिः परिहृता ।

४. बृहत् तस्मात् इत्यपेक्षितम् ।

विचारणायामहीनमित्यर्थः। तन्त्रस्येति। यथा स्वल्पेऽपि दर्पणे महतो रूपस्य निरूपणं स्यात्। एवमल्पशास्त्रे षष्टितन्त्रस्य कृत्स्नस्यापि व्यक्तिरभिहितेत्यर्थः॥ ७३ ॥

इत्याचार्येश्वरकृष्णप्रोक्तायाः साङ्ख्यसप्तत्या वृत्तिराचार्य-
माठरकृतिः समाप्ता।

॥ श्रीः ॥

सांख्यकारिका

सांख्यसप्ततिटीका जयमङ्गला

श्रीहरिः शरणम् ॥

अधिगततत्त्वालोकं लोकोत्तरवादिनं प्रणम्य मुनिम्।
क्रियते सप्ततिकायाष्टीका जयमङ्गला नाम ॥

प्रेक्षावन्तोऽनुक्ते प्रयोजने न कचित् प्रवर्तन्त इति प्रयोजनमुच्यते—तत्त्वज्ञानान्मोक्षः। तत्त्वानि पञ्चविंशतिः। तथाचोक्तम्—

'पञ्चविंशतितत्त्वज्ञो यत्र कुत्राश्रमे रतः।
जटी मुण्डी शिखी वापि मुच्यते नात्र संशयः॥' इति ॥
(पञ्चशिखस्य)

तेषु च षष्टितन्त्रादिष्वयातेष्विति। विस्तरत्वात् षष्टितन्त्रस्य संक्षिप्तरुचिसत्त्वानुग्रहार्थं सप्ततिकारम्भः। वक्ष्यति च 'एतदार्याभिः संक्षिप्तम् (का० ७१)' इति। मोक्षेण किं फलमिति चेत्? दुःखनिवृत्तिः। अतत्त्वज्ञो दुःखैरभिहन्यमानः संसरन्नास्ते। तत्त्वज्ञानात्तु कैवल्यमाप्नोति, न दुःखैरभिहन्यते। हन्यमानेन को हेतुर्जिज्ञासितव्य इत्यत्राह—

दुःखत्रयाभिघाताज्जिज्ञासा तदवघातके हेतौ।
दृष्टे साऽपार्था चेन्नैकान्तात्यन्ततोऽभावात् ॥ १ ॥

दुःखत्रयाभिघाताज्जिज्ञासेत्यादि। दुःखानां त्रयं दुःखत्रयम्। आध्यात्मिकम्, आधिभौतिकम्, आधिदैविकं चेति। आत्मन्यध्यात्मम्, तत्र यद् भवति तदाध्यात्मिकम्—शारीरं मानसं चेति। तत्र वातपित्तश्लेष्मणां वैषम्येण ज्वरादिदुःखम्, तच्छरीरे भवतीति शारीरम्। यत्कामक्रोधशोकादिभिर्मनसि दुःखं तन्मानसम्। यन्मानुषपशुमृगपक्षिसरीसृपस्थावराण्यधिकृत्य भवति तदाधिभौतिकम्। यच्छरीरे

ग्रहावेशादीनि दैवान्यधिकृत्य भवति तदाधिदैविकमिति। एतद् दुःखत्रयम्। तेनाभिघातात् पीडनाद्धेतोर्जिज्ञासा ज्ञातुमिच्छा भवति। कस्मिन् विषय इत्याह—तदवघातके हेताविति। अवघातयत्यपनयतीत्यवघातकः। तस्य दुःखत्रयस्यावघातकस्तदवघातकः। 'तृजकाभ्यां (पा० २।२।१५)' षष्ठीसमासप्रतिषेधः 'तत्प्रयोजको हेतुश्च (पा० १।४।५५)' इति ज्ञापनात्[1] न भवति। केन खल्विमानि दुःखान्युत्पद्यन्त[2] इति तदवघातको हेतुर्जिज्ञास्यो भवति। दुःखवानहमेतत्प्रतीकारमन्वेषयामीति प्रायोवादः। स च पञ्चविंशतितत्त्वज्ञानान्नान्य इति मनसि वर्तते। दृष्टे साऽपार्था चेदिति। स्यादेतद् यदि दृष्टस्तदवघातको हेतुर्न स्यात्। यावदाध्यात्मिकस्य शारीरदुःखस्यापनयने चिकित्साशास्त्रविहित एवोपायोऽस्ति। मानसस्यापि संख्यानबलं रम्याश्च शब्दादयो विषयाः। आधिभौतिकाधिदैविकयोरप्यवघातहेतुरनुष्ठीयमानो लोक इह[3] दृश्यते; तयोः सत्प्रतिपक्षत्वात्। तत्राधिदैविकस्य सामदानभेददण्डोपायघटितारम्भाः। आधिभौतिकस्यापि निपातप्रतिपातसंवृतप्रदेशाश्रयणादयः। ततश्च दृष्टे हेतौ सति जिज्ञासाऽस्मिन्[4] विषये निरर्थिकेत्याशङ्क्याह—नैकान्तात्यन्ततोऽभावादिति। नापार्था,[5] सार्थिकैव। कुतः? एकान्तः, अत्यन्ततः[6], एकान्तात्यन्ततोऽभावादपि। एकान्तेनात्यन्तेन च दुःखाभावस्याभावादित्यर्थः। दृष्टे ह्युपाये क्रियमाणेऽपि केषांचिद् दुःखत्रयं भवत्येवेति नैकान्तेनोपशमः। कथंचिदुपशमे पुनरुत्पादनान्नात्यन्तेनोपशमः। तस्मादैकान्तिकात्यन्तिकदुःखोपशमाय जिज्ञासा युक्तेति॥ १॥

ननु यद्येवमैकान्तिकात्यन्तिकदुःखोपशमहेतुर्वेदविहितोऽस्ति। तथा चाह—

'अपाम सोमममृता अभूमागन्म ज्योतिरविदाम देवान्।
किमस्मान्[7] कृणवदरातिः किमु धूर्तिरमृत मर्त्यस्य॥' इति॥
(ऋ० सं० ८।४२।३)

१. 'ज्ञापनात्' इति क० संस्करणे नास्ति।
२. '०न्त्यपोह्यन्त' इति ख०।
३. 'एव' इति क०।
४. '०सा यस्मिन्' इति काश्चित्कः पाठः, स तु न मनोरमः।
५. 'नापार्थिका' इति ख०।
६. 'अत्यन्ततः' इति क० पुस्तके नास्ति।
७. 'किं नूनमस्मान्' इति प्रकृतश्रुतिः।

अस्यायमर्थः—इन्द्रो देवानपण्डितानाह 'दिव्याः किमन्यत् सुखमस्ति' इति। ते तमाहुः 'नास्ति' इति। 'सोममपाम' सोमं पीतवन्तो वयम्। ततः 'अमृता अभूम' व्यपगतमृत्यवो जाताः। 'अगन्म ज्योतिः' इति। ज्योतिः स्वर्गोऽयम्, तं प्राप्ता वयम्। 'अविदाम देवान्'[1] इति। इयन्तो देवा अस्मिन् स्वर्ग इति ज्ञातवन्तः, ज्ञानमस्माकमुत्पन्नमित्यर्थः। 'किमस्मान् कृणवत्' इति। कृणवन्मृत्युरुच्यते। अस्मान् सोमपान्[2] किं मृत्युः करिष्यते[3]। अरातिः व्याधिः सोऽपि, धूर्तिर्जरा सापि चास्माकं किं करिष्यति। 'अमृत मर्त्यस्य' इति।

तस्मात् सोमपानाद् दुःखोपशमहेतुरस्तीत्यस्मिन् पूर्वपक्षे—

दृष्टवदानुश्रविकः स ह्यविशुद्धिक्षयातिशययुक्तः।
तद्विपरीतः श्रेयान् व्यक्ताव्यक्तज्ञविज्ञानात्॥ २॥

दृष्टवदानुश्रविक इत्यादि। अनुश्रूयते पारम्पर्येणेत्यनुश्रवो वेदः। श्रवः 'ऋदोरप्' (पा० ३।३।५७)। तत्र भवो हेतुरानुश्रविकः, अध्यात्मादिः। दृष्टेन तुल्यो दृष्टवत्; तस्यापि दोषदर्शनात्॥

यदाह—स ह्यविशुद्धिक्षयातिशययुक्त इति। यस्मादानुश्रविको हेतुरविशुद्ध्यादिभिस्त्रिभिर्दोषैर्युक्तः। तत्राग्निहोत्रादौ पशुव्यापादनात् सोमपानादविशुद्धियुक्तः। कर्मक्षयात् स्वर्गच्युतिरिति क्षययुक्तः। तथा चाहुः—'बहूनीन्द्रसहस्राणि व्यतीतानि युगे युगे' इति। 'स हि देवेष्वपि देवो दरिद्राति' इति। 'ईश्वरं दृष्ट्वा महद् दुःखमुत्पद्यते' इत्यतिशययुक्तः। तथाहि—'यः क्रतुशतेन यजते तस्य महदैश्वर्यम्, यो द्वाभ्यां त्रिभिर्वा तस्याल्पम्' इति। तस्मादानुश्रविकोऽपि दृष्टवत्परित्याज्यः। कस्तर्हि श्रेयानित्याह—तद्विपरीतः श्रेयानिति। दृष्टानुश्रविकद्वारा यो विपरीतः, तत्त्वज्ञानाख्यः स श्रेयान्; तस्य कैवल्यप्रापकत्वात्। तत्रैकान्तात्यन्ततोभावात् दृष्टाच्छ्रेयान्। शरीरहानाद्विशुद्धफलः,[4] प्रकृतिहानादक्षयफलः, अनुत्तरत्वाच्च निरतिशयफल इत्यानुश्रविकाच्छ्रेयान्। स कथं प्रोच्यत इत्यत्राह—व्यक्ताव्यक्तज्ञविज्ञानादिति।

१. 'देवान् प०' इति ख०, तत्तु नोपपद्यते।
२. 'सोमपानान्' इति क०, स तु पाठः प्रामादिक एव।
३. '०ति' इति ख०।
४. '०ज्ञानाद्वि शुद्धफलः' इति क० पाठः, स मूलेनासङ्गतः।

राशित्रयेण पञ्चविंशतितत्त्वानि कथ्यन्ते। तत्र महदादिभूतपर्यन्तं त्रयोविंशतिप्रकारं व्यक्तमुच्यते; तेन रूपेण प्रधानस्य व्यक्तत्वात्। अव्यक्तं प्रधानम्; केनचिद्रूपेणाव्यक्तत्वात्। जानातीति ज्ञः पुरुषः। तेषु यद्विज्ञानं स्वरूपपरिच्छेदः; तस्मात् प्राप्यत इत्यर्थः। तन्वादिभिः[1] परिच्छिद्य तदभ्यासादुत्तरकालं प्रकृतिपुरुषान्तरज्ञानमुत्पद्यते, ततश्च कैवल्यमिति। अस्या आर्याया वक्ष्यमाणार्याः,[2] सर्वा एवार्थेन भाष्यस्थानीया द्रष्टव्याः ॥ २ ॥

तत्रैषां व्यक्तादीनामुत्पादानुत्पादाभ्यां स्वरूपमाह—

मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त ।
षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः ॥ ३ ॥

मूलप्रकृतिरित्यादि। प्रकृतिः प्रधानम्। प्रक्रियत उत्पद्यते प्रधानादस्या इति प्रकृतिः। मूलं च तत्प्रकृतिश्चेति मूलप्रकृतिः। सप्तानां प्रकृतीनां मूलमाद्यं कारणमित्यर्थः ॥

अविकृतिरिति। न विक्रियत इत्यविकृतिः। न कुतश्चिदुत्पद्यत[3] इत्यर्थः। एतत् प्रथमं तत्त्वम् ॥

महदाद्याः प्रकृतिविकृतयः सप्तेति। महान् बुद्धिः स[4] आद्यो यासां प्रकृतीनां तास्तथोक्ताः। प्रकृतयश्च विकृतयश्चेति प्रकृतिविकृतयः। तत्र महानहङ्कारं जनयन् प्रकृतिः, प्रधानादुत्पद्यमानो विकृतिः। अहङ्कारस्तन्मात्राण्येकादशेन्द्रियाणि च जनयन् प्रकृतिः, महत उत्पद्यमानो विकृतिः। तन्मात्राणि शब्दस्पर्शरूपरसगन्धाः पञ्च यथाक्रममाकाशवाय्वग्न्युदकपृथिव्याख्यानि भूतानि जनयन्तः प्रकृतयः, अहङ्कारादुत्पद्यमाना विकृतयः। इत्येतानि सप्त तत्त्वानि ॥

षोडशकश्च विकार इति। षोडश परिमाणमस्येति षोडशकः। पञ्च बुद्धीन्द्रियाणि, पञ्च कर्मेन्द्रियाणि, मनश्चेत्येकादशेन्द्रियाणि, पञ्च महाभूतानीत्ययं षोडशको गणः। चकार एवकारार्थः। विकारो विकृतिरेव। नास्मात् किञ्चिदुत्पद्यत इत्यर्थः। एतानि षोडश तत्त्वानि।[5]

१. 'तन्वादि हि' इति क०। २. 'वक्ष्यमाणा याः' इति क०।
३. '०दुत्पाद्यत' इति क०।
४. 'स' इति ख० पुस्तके नास्ति।
५. 'नास्मात्' इत्यारभ्य 'तत्त्वानि' इत्यन्तः पाठः ख० पुस्तके नास्ति।

न प्रकृतिर्न विकृतिः पुरुष इति। पुरं शरीरं तस्मिन् वसतीति पुरुषः। नैरुक्तोऽत्र विधिः। तस्मान्न किञ्चिदुत्पद्यत इति न प्रकृतिः; निष्क्रियत्वात्। नाप्ययं कुतश्चिदुत्पद्यत इति न विकृतिः, अनादित्वात् ॥ ३ ॥

एषां व्यक्तादीनां सिद्धौ प्रमाणान्याह—

दृष्टमनुमानमाप्तवचनं च सर्वप्रमाणसिद्धत्वात् ।
त्रिविधं प्रमाणमिष्टं प्रमेयसिद्धिः प्रमाणाद्धि ॥ ४ ॥

दृष्टमित्यादि। 'दृष्टम्' प्रत्यक्षम्। अनुमीयते येन तदनुमानम्। आप्तः क्षीणदोषस्तेन यदुच्यते तदाप्तवचनम्, आगमः। एतत् त्रिविधं प्रमाणमिष्टम् ॥

ननु चान्यान्यपि प्रतिभादीनि प्रमाणानि सन्ति। तद्यथा—

'प्रतिभौपम्यमैतिह्यमभावः सम्भवस्तथा।
अर्थापत्तिरितीमानि प्रमाणान्यपरे जगुः ॥' इति ॥

अस्मिन् पूर्वपक्ष आह—सर्वप्रमाणसिद्धत्वादिति। सर्वेषां प्रतिभादीनां प्रमाणानां सिद्धत्वात्, त्रिविध एवान्तर्भावादित्यर्थः। तत्र[1] ग्रामे नगरे वा वर्तत इति प्रतिभोत्पन्ना। तत्र यदा क्षीणदोषस्य, तदाभिज्ञप्राप्तत्वात् प्रत्यक्षमेव। तस्याक्षीणदोषस्य वितथत्वादप्रमाणम्। याप्यर्थाविसंवादिनी कादाचित्का,[2] सापि कादाचित्कादेव[3] निमित्तादुत्पद्यमानाऽनुमानमेव न प्रमाणान्तरम्। 'गौरिव गवयः' इत्यौपम्यम्। तत्र गवयमजानानः कश्चिदाप्तं पृच्छति 'कीदृशो गवयः' इति। स तमाह—'यादृशो गौस्तादृशो गवयः' इति। तदेतदाप्तवचनमेव न प्रमाणान्तरम्। यदापि लब्धोपदेशो गवयं पश्यति, तदापि गवि दृष्टेनैव विषाणादिना लिङ्गेन गवयस्य व्यवहारं प्रवर्तयतीत्यनुमानमेव न प्रमाणान्तरम्। 'इति ह वै वैश्रवणः' इत्यैतिह्यम्। एतदाप्तवचनमेव, न प्रमाणान्तरम्। 'इति ह' इति निपातसमुदाय उपदेशपारम्पर्ये वर्तते। इति ह एवैतिह्यम्। स्वार्थे ष्यञ्। 'नास्तीह घटोऽनुपलम्भात्' इत्यभावः। तत्र घटशून्यप्रदेश एव घटाभावः, स च प्रत्यक्षप्रमाणसिद्धत्वान्न प्रमाणान्तरम्[4]। 'माषः प्रस्थः', इत्युक्ते चत्वारः

१. 'अत्र' इति ख०। २. '०चित्की' इति ख०।
३. 'कादाचित्कत्वादेव' इति ख०।
४. इदमत्रावधेयम्—गौडपादेनाभावस्य पृथक्प्रमाणत्वं न निरस्तम्।

कुडवा[1] इतीदमपि सम्भवति' इत्ययं सम्भवः । तत्र समुदायलिङ्गावयवल्लिङ्गिनः परिच्छेदादनुमानमेव । अवयवैः समुदायस्यारब्धत्वात् कार्यकारणलक्षणः सम्बन्धः । 'देवदत्तो दिवा न भुङ्क्ते बलवांश्च' इत्युक्तेऽर्थाद् 'रात्रौ भुङ्क्ते', इत्यर्थापत्तिः । तत एव रात्रौ तस्य प्रतीतिरनुमानान्न भिद्यते । इदमेव चान्यथानुपपत्तिरित्युच्यते ॥

किं प्रमाणत्रयलक्षणे प्रयोजनमिति चेदाह—प्रमेयसिद्धिः प्रमाणाद्धीति । यस्मात् प्रमेयस्यार्थस्य सिद्धिः प्रमाणात्, अन्यथा कथं तत्प्राप्तिपरिहारौ स्याताम् ॥ ४ ॥

दृष्टादिप्रमाणानां लक्षणमाह—

प्रतिविषयाध्यवसायो दृष्टं त्रिविधमनुमानमाख्यातम् ।
तल्लिङ्गलिङ्गिपूर्वकमाप्तश्रुतिराप्तवचनं च ॥ ५ ॥

प्रतिविषयाध्यवसाय इत्यादि । विषयं विषयं प्रतिविषयम्, प्रतिविषयमध्यवसायः प्रतिविषयाध्यवसायः । विषयाः शब्दादयः, अध्यवसायो बुद्धिः । शब्दस्पर्शरूपरसगन्धेषु यथाक्रमं श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणेन्द्रियद्वारेण विशेषावधारणप्रधाना या बुद्धिरुत्पद्यते तद् दृष्टम्, शुद्धत्वात् प्रमाणम्, अशुद्धत्वादप्रमाणम् । तच्चतुर्विधम्—सव्यपदेशम्, सविकल्पम्, अर्थव्यतिरेकि, इन्द्रियव्यतिरेकि चेति । तत्र दूरात् कञ्चिदागच्छन्तं दृष्ट्वा देवदत्तसारूप्यं व्यपदिशति 'देवदत्तोऽयमिति' या बुद्धिरुत्पद्यते तत्सविकल्पम्, संशयितत्वादप्रमाणम् । तैमिरिकस्य द्विचन्द्रदर्शनं तदर्थव्यतिरेकि; द्वितीयचन्द्राभावात् । यत् स्वप्नदर्शनं तदिन्द्रियव्यतिरेकि; निद्रोपप्लुतत्वादिन्द्रियाणाम् ॥

त्रिविधमनुमानमाख्यातमिति । षष्टितन्त्रे व्याख्यातम्, पूर्ववत्, शेषवत्, सामान्यतोदृष्टमिति । अतीतानागतवर्तमानास्त्रयः पदार्थाः । तत्र भविष्यदर्थसाधनाय पूर्ववदनुमानम् । पूर्वं लिङ्गमस्यास्तीति पूर्ववत् । यथोन्नतजलधरं दृष्ट्वा वृष्टिर्भविष्यतीत्यनुमीयते । अतीतार्थसाधनाय शेषवत्—शेषं लिङ्गमस्यास्तीति । यथास्या नद्या उपरि वृष्टिर्भूता, यस्याः कलुषोदकं शेषं लिङ्गमिति । वर्तमानार्थसाधनाय सामान्यतोदृष्टम्—सामान्येन लिङ्गलिङ्गिदृष्टत्वात् । यथा देवदत्तस्य गतिपूर्विका देशान्तरप्राप्तिर्दृष्टा, तथा सूर्यादीनां सामान्येन देशान्तरप्राप्त्या गतिरनुमीयते ॥

१. 'कुडपा' इति क० ।

तल्लिङ्गलिङ्गिपूर्वकमिति । त्रिविधमनुमानम् । कदाचिल्लिङ्गपूर्वकं कदाचिल्लिङ्गिपूर्वकं लोके दृश्यते । तद्यथा—श्राव्येण[1] विरुतेन कदाचित् कोकिलोऽनुमीयते, कदाचित् कोकिलं लिङ्गिनं दृष्ट्वा श्राव्येणापि[2] विरुतेनास्य भवितव्यमिति तयोर्गम्यगमकत्वं सति सम्बन्धे । सम्बन्धाश्च सप्त—तत्र स्वस्वामिभावसम्बन्धो यथा राजपुरुषयोः । कदाचित् पुरुषेण राजा राज्ञा वा पुरुषः । एवं प्रकृतिविकारसम्बन्धो यथा यवसक्त्वोः[3] । कार्यकारणसम्बन्धो यथा धेनुवत्सयोः । पात्रपात्रिकसम्बन्धो[4] यथा परिवृट्[5]त्रिविष्टब्धयोः । साहचर्यसम्बन्धो यथा चक्रवाकयोः । प्रतिद्वन्द्विसम्बन्धो यथा शीतोष्णयोः । तत्रैकस्य भावेऽन्याभावः प्रतीयते । निमित्तनैमित्तिकसम्बन्धो यथा भोज्यभोजकयोरिति । एभिः सम्बन्धैस्त्रिविधमनुमानं प्रमाणं न लुप्यते ॥

आप्तश्रुतिराप्तवचनं चेति । आप्तः क्षीणदोषः । यच्चाहुः—

'स्वकर्मण्यभियुक्तो यो रागद्वेषविवर्जितः ।
निर्वैरः पूजितः सद्भिराप्तो ज्ञेयः स तादृशः ॥' इति ॥

आप्तेभ्यो या श्रुतिपरम्परया श्रुतिरागता तदाप्तवचनम्[6], तैर्दृष्टोऽनुमितो वार्थः, परत्र स्वबोधसदृशबोधान्तरोत्पत्तये शब्देनोपदिश्यते । यदाप्तवचनं तन्न[7] स्रवते । चशब्दोऽनुमानेन तुल्यकक्ष्यत्वख्यापनार्थः । यथा त्रिकालविषयमनुमानं तथाऽऽप्तवचनमपीति ॥ ५ ॥

एषां त्रयाणां कः कस्य विषय इत्यत आह—

सामान्यतस्तु दृष्टादतीन्द्रियाणां प्रतीतिरनुमानात्[8] ।
तस्मादपि चासिद्धं परोक्षमाप्तागमात् सिद्धम् ॥ ६ ॥

१. 'श्रव्येण' इति ख० ।
२. 'श्रव्येणापि' इति ख० ।
३. ख० पुस्तकेऽत्र पाठस्त्रुटितः, 'यवस' एतावन्मात्रं दृश्यते ।
४. ख० पुस्तके नास्ति ।
५. 'परिव्राट्' इति ख० ।
६. 'आप्तवचनम्' इति क० ।
७. 'यदन्यवचनं सो न' इति क० पुस्तकपाठः स तु सुव्यक्तं प्रामादिक एव ।
८. कुत्रचित् पुस्तकेऽत्र 'प्रसिद्धि०' इति पाठोऽवलोक्यते । स एव टीकाकृत्सम्मत इति प्रतिभाति ।

सामान्यतस्त्वित्यादि । त्रिविधं प्रमेयम्—प्रत्यक्षम्, परोक्षम्, अत्यन्तपरोक्षं चेति । तत्र यत्सामान्यतोदृष्टमनुमानं तस्मादतीन्द्रियाणां परोक्षाणां प्रसिद्धिरस्ति, तन्निश्चयः; तेषां प्रत्यक्षविषयत्वात् । पूर्ववच्छेषवतोस्त्वनुमानयोर्भविष्यद्भूतार्थवृत्तित्वाद् वर्तमानेष्वतीन्द्रियेषु च प्रवृत्त्यसम्भवः ॥

तस्मादपि चासिद्धमिति । सामान्यतोदृष्टादनुमानाद् यदसिद्धं परोक्षम्, तदत्यन्तपरोक्षत्वादागमात् सिद्धम् । यथा स्वर्गापवर्गाविति । प्रत्यक्षे तु प्रमेये दृष्टमेव व्याप्रियत इत्यर्थादुक्तम् ॥ ६ ॥

ननु च 'व्यक्ताव्यक्तज्ञविज्ञानात्', व्यक्तं तावत् प्रत्यक्षानुमानाभ्यां सिद्धम्, प्रधानपुरुषयोस्तु सर्वदाऽनुपलम्भात् कथं सिद्धिर्नस्तयोरिति नानुपलब्धिमात्रेणासत्त्वम् । यतश्चतुर्भिः प्रकारैः सतामपि पदार्थानामनुपलब्धिर्भवति । देशदोषादिन्द्रियदोषाद्विषयदोषादर्थान्तरदोषाच्च । तानेव भेदेन दर्शयन्नाह—

अतिदूरात् सामीप्यादिन्द्रियघातान्मनोऽनवस्थानात् ।
सौक्ष्म्याद् व्यवधानादभिभवात् समानाभिहाराच्च ॥ ७ ॥

अतिदूरादित्यादि । यथा दूरमुत्पतितस्य[1] पक्षिणो नोपलब्धिः । सामीप्यादिति । अतिशब्दोऽत्रापि योजनीयः । अतिसामीप्यादिति । यथा चक्षुःस्थस्याञ्जनस्य । उभयत्रापि देशदोषकृताऽनुपलब्धिः । इन्द्रियघातादिति । श्रोत्रादीनां बुद्धीन्द्रियाणां दोषाद् योग्यदेशावस्थितानामपि शब्दादीनामनुपलब्धिः । मनोऽनवस्थानादिति । मनसोऽनवस्थानमसमाहितता, विषयान्तरप्रवृत्तत्वात् । ततश्चानुपहतेन्द्रियेऽपि सन्निहितं[2] विषयं नोपलभते । उभयत्रापीन्द्रियदोषादनुपलब्धिः । मनसोऽपीन्द्रियत्वाद् भेदेनोपादानं तु मनसः प्राधान्यार्थम् । सौक्ष्म्यादिति । विषयदोषात् । विषय एव परमाण्वादिस्तथा, येनाव्यग्रमनसाऽप्यनुपहतेन्द्रियेण नोपलभ्यते । व्यवधानादिति । यवनिकादिभि[3]स्तिरोधानात् स्थूला अप्यविकृष्टा घटादयो नोपलभ्यन्ते । अभिभवादिति । आदित्यप्रभाभिभूतत्वाद् दिवा तारका नोपलभ्यन्ते । समानाभिहाराच्चेति ।

१. 'यो दूरमुत्पतति तस्य' इति ख० ।
२. '०तेन्द्रियसन्निहितं' इति ख० ।
३. 'जवनिका०' इति ख० ।

सदृशानां राशीकरणात् । धान्यराशौ ह्येको धान्यगुडकः प्रक्षिप्तो न दृश्यते । त्रिष्वप्यर्थान्तरदोषादनुपलब्धिः । न त्वेतेऽनुपलभ्यमाना न सन्ति ॥ ७ ॥

यद्येवं केन प्रकारेण सतोरपि प्रधानपुरुषयोरनुपलब्धिरित्याह—

सौक्ष्म्यात्तदनुपलब्धिर्नाभावात् कार्यतस्तदुपलब्धेः ।
महदादि तच्च कार्यं प्रकृतिसरूपं विरूपं च ॥ ८ ॥

सौक्ष्म्यात्तदनुपलब्धिरित्यादि । प्रकारान्तराभावात् सूक्ष्मत्वात्[1] सतोरपि तयोरनुपलब्धिः । नन्वभावादेव कस्मादनुपलब्धिर्न भवति । यथा घटस्योत्पत्तेः प्राङ् मृदि तस्य प्रागभावात्, खर्परादिषु[2] तस्य प्रध्वंसाभावात्, गवि वाऽश्वत्वस्याश्वत्वे वा गोत्वस्येतरेतराभावात्, बन्ध्यासुतस्य वाऽत्यन्ताभावादित्याह—नाभावादिति । चतुर्विधादित्यर्थः । यद्येवं कथं तौ स्त इति गम्यत इत्याह[3]—कार्यतस्तदुपलब्धेरिति । यद्यप्यत्रोभयं प्रक्रान्तं तथापि तच्छब्देन प्रधानं निर्दिश्यते । प्रधानस्यास्तित्वप्रतिपत्तिः कार्यादित्यर्थः । पुरुषस्यास्तित्वप्रतिपत्तौ हेतुं वक्ष्यति । किं तत्कार्यमित्याह—महदादि तच्च कार्यमिति । महान् बुद्धिः स आदिर्यस्य तन्महदादिभूतपर्यन्तं कार्यमस्ति । तत् प्रधानम्, यस्येदं महदादिकार्यं व्यक्तम्; अकारणस्य कार्यस्यानुत्पादात् । प्रकृतिसरूपं विरूपं चेति[4] । तद्व्यक्तं प्रकृतेः प्रधानस्य सदृशमसदृशं चेत्यर्थः । एतदुत्तरत्र योजयिष्यते ॥ ८ ॥

तत्कार्यं कारणादुत्पद्यमानं सदुत्पद्यते, किमसत्, किं वा सदसदिति ? तत्र विरुद्धधर्माध्यासितत्वात् सदसन्नोपपद्यते । असदिति[5] वैशेषिकाः । अत्र दूषणमाह—

असदकरणादुपादानग्रहणात् सर्वसम्भवाभावात् ।
शक्तस्य शक्यकरणात् कारणभावाच्च सत् कार्यम् ॥ ९ ॥

१. 'सूक्ष्मत्वात्' इति ख० पुस्तके नास्ति ।
२. 'प्राक् मृत् शरावादिषु' इति क० ।
३. नाभावादित्यादिः, इत्याहेत्यन्तः पाठः ख० पुस्तके नास्ति ।
४. ख०पुस्तके टीकायां 'प्रकृतिविरूपं सरूपं च' इति पाठः । तदनुसारेण मूलेऽपि तथैव । किन्तु स न टीकाकृत्सम्मत इति प्रतिभाति; अनन्तरवर्तिपङ्क्तेर्निपुणमवलोकनात् ।
५. ख०पुस्तके 'असत्' इति नास्ति ।

असदकरणादित्यादि । इह लोकेऽसतः करणं नास्ति, यथा शशविषाणादीनाम् । यदेव सद् घटादिद्रव्यं तदेव मृत्पिण्डादिना कारणविशेषेण क्रियते, नासत् ।

उपादानग्रहणादिति । इह यदर्थं यदुपादीयते तस्य तदुपादानं कारणम्, यथा तैलस्य तिलाः, दध्नः क्षीरम् । अत्र तैलं दधि च यदि न स्यात् कथं तस्योपादानस्य ग्रहणं तदर्थिभिः क्रियते । तस्मादुपादानसंग्रहात् सदेव कार्यम् । अन्यथा सिकतासलिलयोरपि ग्रहणं स्यात् ।

सर्वसम्भवाभावादिति । यद्यसत्कार्यं भवेत् तदा सर्वस्य सर्वदा सर्वत्र सम्भवः स्यात् । न चैवम् । तस्मात् सदेव कार्यम् ।

शक्तस्य शक्यकरणादिति । शक्तं[1] कारणं नाशक्तमित्येवमप्यवगन्तव्यम् । अन्यथोपहतशक्तेर्बीजादङ्कुरोत्पत्तिप्रसङ्गः । शक्तश्च को भवितुमर्हति, यः शक्तिमान् । तस्य शक्तिमतः शक्यस्य करणात्, शकनीयस्य कार्यस्योत्पादनादित्यर्थः । एवं च तच्छकनीयं तदि कारणे शक्तिरूपेणावस्थितं स्यात् । तस्मात् सदेवोत्पद्यते, नासत् । कारणभावाच्चेति । कारणस्य सत्त्वादित्यर्थः । यद्यसत्कार्यमुत्पद्यते किमिति कारणादेव न[2] कार्यस्य भावो भवति ? भवति च । तस्माच्छक्तिरूपेणावस्थितमिति गम्यते । अथवा—कारणभावादिति कारणस्वभावात् । यत्स्वभावं कारणं तत्स्वभावं कार्यम्, यथा स्निग्धस्वभावेभ्यस्तिलेभ्यः स्निग्धमेव तैलम्, मृदो मृत्स्वभावो घटः । यद्यसत्कार्यं स्यात्, असत्स्वभावेभ्यो ह्युत्पाद्यतेत्येवं सांख्यानां सदेवोत्पद्यत इति सिद्धान्तः ॥९॥

एवं महदादिकार्यं सदेवोत्पद्यत इति व्यवस्थाप्य प्रकृतेर्विरूपं सरूपं च दर्शयति । तत्र प्रकृतेर्विरूपमधिकृत्याह—

हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिङ्गम् ।
सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तम् ॥ १० ॥

हेतुमदित्यादि । व्यक्तं महदादिभूतपर्यन्तम्, अव्यक्तं प्रधानम् । तत्र व्यक्तं हेतुमत्; यथास्वं कारणेभ्य उत्पद्यमानत्वात् । तत्र प्रधानादुत्पद्यमानो महान् हेतुमान्, महतोऽहङ्कारो हेतुमान्, अहङ्कारात्तन्मात्राण्येकादशेन्द्रियाण्युत्पद्यमानानि हेतुमन्ति च, तन्मात्रेभ्यश्च महाभूतानि हेतुमन्ति । विपरीतमव्यक्तमहेतुमदित्यर्थः; तस्यान्यतः

1. 'शक्तं' इति ख० पुस्तके नास्ति ।
2. 'कारणभावेन' इति क० ।

कुतश्चिदनुत्पादात् । न हि प्रधानात् किंचिदपरमस्ति यतस्तदुत्पद्यते । अनित्यं व्यक्तम्; कारणेभ्य उत्पन्नत्वात्, घटादिवत् । कारणानि च प्रागुक्तान्येव । विपरीतमव्यक्तं नित्यमित्यर्थः; कुतश्चिदनुत्पन्नत्वात् । अव्यापि व्यक्तं प्रादेशिकमित्यर्थः । दैवं मानुषं तैर्यग्योनं च;[1] तदानीमन्यत्रावर्तमानत्वात् । सर्वगतं विपरीतमव्यक्तं व्यापीत्यर्थः; देवादिषु त्रिषु लोकेषु सर्वदा वर्तमानत्वात् । सक्रियमिति । क्रियाशब्देनात्र संसरणमभिप्रेतम्, न क्रियामात्रम् । महदादिसूक्ष्मपर्यन्तं व्यक्तं देवादि संसरतीत्यर्थः । विपरीतमव्यक्तम्, असंसारि । त्रिषु लोकेषु स्थितत्वान्न संसरति । न पुनः क्रियैव नास्तीति निष्क्रियम्; तस्य जगत्कर्तृत्वात् । अनेकं व्यक्तम्; महदादिभूतपर्यन्ततायास्त्रयोविंशतिप्रकारत्वात् । विपरीतं व्यक्तम्; त्रयाणां लोकानां तस्यैकस्य कारणत्वात् ।

आश्रितमिति । यद्यस्मादुत्पन्नं महदादि व्यक्तं तदेव तदाश्रितं नान्यत् । उत्पन्नमन्यदाश्रितमिति दर्शनार्थं वचनम्; अन्यथा हेतुमदित्यनेनैवाश्रितं सिद्धमेव । विपरीतमव्यक्तम्, अनाश्रितम्; ततोऽन्यस्य कारणस्याभावात् ।

लिङ्गमिति । लिङ्ग्यतेऽनेनाव्यक्तमिति लिङ्गम् । विपरीतमव्यक्तम्, न लिङ्ग्यते किञ्चिदनेनेति । अथवा लयं गच्छतीति लिङ्गम् । प्रलयकाले ह्याकाशादयः पञ्च यथाक्रमं शब्दादितन्मात्रेषु लीयन्ते, तन्मात्राणीन्द्रियाणि चाहङ्कारे, अहङ्कारो महति, महान् प्रधान इति । विपरीतमव्यक्तम्, न कुत्रचिदिदं लीयते; अहेतुत्वात् । सावयवमिति । शब्दादयोऽवयवा उच्यन्ते । तैराध्यात्मिकं बाह्यं च व्यक्तं युक्तम् । विपरीतमव्यक्तम्, तैरयुक्तत्वात् । परतन्त्रम्, न स्वतन्त्रम् । यदस्मा[2]दुत्पद्यते तदेवानुरुद्ध्य स्वकार्यं जनयति न तद्व्यतिरेकेणेति दर्शनार्थम्, अन्यथा हेतुमदित्यनेनैव परतन्त्रत्वं प्रसिद्धमेव[3] । विपरीतमव्यक्तम्, स्वतन्त्रं न किंचिदपेक्षते ॥ १० ॥

सारूप्यमधिकृत्याह—

त्रिगुणमविवेकि विषयः सामान्यमचेतनं प्रसवधर्मि ।
व्यक्तं तथा प्रधानं तद्विपरीतस्तथा च पुमान् ॥ ११ ॥

1. 'दैवं मानुषं (पातालीयं च) तैः' इति ख० पुस्तकपाठो न मनोरमः ।
2. 'यद् यस्मा०' इति ख० ।
3. 'सिद्धमेव' इति ख० ।

त्रिगुणमित्यादि। त्रयः सत्त्वादयो गुणा यस्य तत्त्रिगुणं व्यक्तम्। तथा प्रधानमपि त्रिगुणं; तत्स्वभावत्वात्। अविवेकीति। अविवेचनशीलं व्यक्तम्; अचेतनत्वात्। यद्वा गुणेभ्यस्तस्य पृथक्त्वाभावादविवेकि। तथा प्रधानमपि सामान्यं व्यक्तम्; सर्वपुरुषोपभोग्यत्वान्मल्लदासीवत्। तथा प्रधानमपि। अचेतनं व्यक्तम्, सुखदुःखमोहान् न वेदयतीत्यर्थः। तथा प्रधानमपि। प्रसवधर्मीति।[1] प्रसवो धर्मोऽस्यास्तीति प्रसवधर्मि व्यक्तम्। तथा प्रधानमपि। द्वयोरपि प्रसवधर्मित्वम्। तथा च प्रधानान्महान्, महतोऽहङ्कार इत्यादिना स्वकार्योत्पादनधर्मत्वाद्। यथा व्यक्ताव्यक्तयोर्वैरूप्यं सारूप्यं च, तथा किं पुरुषस्य चापीत्याह— तद्विपरीतस्तथा च पुमानिति। व्यक्ताव्यक्ताभ्यां कैश्चिद्धर्मैर्विलक्षण इत्यर्थः।

अत्र पूर्वस्या आर्याया अर्थो योज्यते। हेतुमद् व्यक्तम्, अहेतुमदव्यक्तम्। पुरुषोऽप्यहेतुमान्; तस्य कुतश्चिदनुत्पादात्। अनित्यं व्यक्तम्, नित्यमव्यक्तम्। पुरुषो नित्यः; कुतश्चिदनुत्पन्नत्वात्[2]। अव्यापि व्यक्तम्, व्याप्यव्यक्तम्। पुरुषोऽपि व्यापी यदा प्रकृत्या मुक्तः[3]। युक्तश्चेत्, व्यक्तेन सदृशः, न प्रधानेन हि सर्वदा देवादिषु प्रवर्तते। सक्रियं व्यक्तम्, निष्क्रियमव्यक्तम्; असंसारित्वात्। पुरुषोऽपि निष्क्रियः; कर्तृत्वाभावात्। अनेकं व्यक्तम्, एकमव्यक्तम्। पुरुषोऽनेकः; बहुत्वात्। तस्य बहुत्वं प्रतिपादयिष्यति। प्रधानेनात्र वैसादृश्य; तस्यैकत्वात्। आश्रितं व्यक्तम्, अनाश्रितमव्यक्तम्। पुरुषोऽप्यनाश्रितः; कुतश्चिदनुत्पन्नत्वात्। लिङ्गं व्यक्तम्, अलिङ्गमव्यक्तम्। पुरुषोऽप्यलिङ्गः। न किंचिदनेन लिङ्ग्यते; न चायं[4] कदाचिल्लीयतेऽनुत्पन्नत्वात्। सावयवं व्यक्तम्, निरवयवमव्यक्तम्। पुरुषोऽपि निरवयवः; शब्दादिभिरयुक्तत्वात्। परतन्त्रं व्यक्तम्, स्वतन्त्रमव्यक्तम्। पुरुषोऽपि स्वतन्त्रः; कुतश्चिदनुत्पन्नत्वात्।

द्वितीयस्या आर्याया अर्थो योज्यते—

त्रिगुणं व्यक्तमव्यक्तं च। निर्गुणः पुरुषः; गुणानां तत्राभावात्। अविवेकि व्यक्तमव्यक्तं च। विवेका पुरुषः, चेतनत्वात्। विविक्तो वा;

१. ख० पुस्तके नास्ति।
२. 'अनित्यम्' इत्यारभ्य 'अनुत्पन्नत्वाद्' इत्यन्तं ख० पुस्तके नास्ति।
३. 'प्रकृत्यात्मकः' इति ख०, स तु न समीचीनः।
४. 'वायं' इति क०।

निर्गुणत्वात्। विषयो व्यक्तमव्यक्तं च। पुरुषो निर्विषयः; भोक्तृत्वात्, न भोग्यः। सामान्यं व्यक्तं च। पुरुषोऽसामान्यः; अविषयत्वात्। अचेतनं व्यक्यमव्यक्तं च। चेतनः पुरुषः; सुखादिवेदनत्वात्। प्रसवधर्मि व्यक्तमव्यक्तं च। पुरुषोऽप्रसवधर्मी; अकर्तृत्वात्। इत्युक्तम्॥ ११॥

त्रयाणामपि वैरूप्यं सारूप्यं चेति त्रिगुणमित्युक्ते, के के त्रयो गुणाः किमात्मका इत्याह—

प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः।

अन्योऽन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः॥ १२॥

प्रीत्यप्रीतिविषादात्मका इत्यादि। प्रीत्यादय आत्मानो येषां गुणानां ते तथोक्ताः सत्त्वरजस्तमांसि त्रयो गुणाः। तत्र प्रीत्यात्मकं सुखात्मकं[1] सत्त्वम्। अप्रीत्यात्मकं दुःखात्मकं रजः, विषादात्मकं मोहात्मकं तमः। गुणा ह्यतीन्द्रियत्वात् परिणत्या सुखादिनाऽनुमीयमानास्तदात्मका इति व्यपदिश्यन्ते। किं पुनरेषां प्रयोजनमित्याह— प्रकाशप्रवृत्तिनियमार्था इति। प्रकाशार्थं सत्त्वम्; प्रकाशकत्वात्। प्रवृत्त्यर्थं रजः; चलत्वात्, नियमार्थं तमः; स्तिमितत्वात्। किमिति ते गुणाः परस्परसव्यपेक्षाः, किं वा नेत्याह—अन्योऽन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणा इति। अन्योऽन्यशब्दः प्रत्येकमभिसम्बध्यते। अभिभवतीत्यभिभवः। पचाद्यच्। अन्योऽन्यस्याभिभवा अन्योऽन्याभिभवाः। तद्यथा—देवेषु सत्त्वमुद्रिक्तं रजस्तमसी अभिभवति, मनुष्येषु रजः सत्त्वतमसी[2], तिर्यक्षु (तमः सत्त्वरजसी)[3]। आश्रीयन्त इत्याश्रयाः कर्मण्यण्। अन्योऽन्यस्याश्रयाः त्रिदण्डवत्। नाश्रयान्तरमेषाम्, अनाश्रयाश्च कर्तारः। जनयन्तीति जननाः। 'कृत्यल्युटो बहुलम् (पा० ३।३।११३)' इति कर्तरि ल्युट्। अनेकार्थत्वात्

१. 'सुखादि' इति ख०।
२. 'रजस्तमसी' इति ख०।
३. कोष्ठकान्तर्गतं ख० पुस्तके नास्ति। क० पुस्तकसम्पादकमहोदयैः प्रसङ्गानुरोधेन योजितमासीदिति तदीयटिप्पणीतः ज्ञायते। योजनं तु सर्वथा समीचीनमेव।

च[1] धातूनां बोधनार्था द्रष्टव्याः। अन्योऽन्यस्य प्रबोधका इत्यर्थः। सर्वं हि व्यक्तमुत्पद्यमानं त्रिगुणात्मकमुत्पद्यते। तत्र यदा सत्त्वमुत्कटं तदा रजस्तमसी न्यक्कृतशक्तिके। प्रबोध्यायस्कान्तो लोहवदुक्तम् (?)। सत्त्वन्यक्कृतेन[2] गुणेन व्यक्तं जनयति। एवं रजस्तमश्च योज्यम्। यदा गुणद्वयमुद्भूतशक्ति तदा द्वयमपीतरदभिभवति, प्रबोधयतीत्यर्थः। अन्योऽन्यमिथुना इति। अन्योऽन्यस्य सहाया इत्यर्थः। तथा चोक्तं विष्णुगीतायाम्—

'रजसो मिथुनं सत्त्वं सत्त्वस्य मिथुनं रजः।
उभयोः सत्त्वरजसोर्मिथुनं तम उच्यते॥' इति॥

(देवी भा० ३।५०)

एकस्यां व्यक्तौ त्रयाणामभिभवप्रबोधनानुक्तौ व्यक्तम्, इतरे तु तत[3] एव प्रवृत्तिं जनयन्त इति दर्शयन्नाह—अन्योऽन्यवृत्तय इति। वृत्तिः सुखादिरूपेण परिणतिः। वृत्तिहेतुत्वाद्[4] वृत्तय उच्यन्ते। अन्योऽन्यवृत्तिहेतव इत्यर्थः। तद्यथा काचिद्योषिद्रूपशीलवद(?)त्यन्तगुणान्वितत्वात्[5] सात्त्विकी, सा भर्त्तुः सुखमुत्पादयति सपत्नीनां कासांचिद् दुःखं कासांचिद् विषादमित्यत्र[6] सत्त्वमात्मनो द्वयोश्च वृत्तिहेतुः। कस्यचित्प्रभोरत्यन्तशूरत्वात् भृत्या राजसाः, परेषां[7] युध्यमानानां प्रहारैर्दुःखं जनयन्ति, पलायमानानां विषादम्. स्वामिनश्च तुष्टिमित्यत्र रज आत्मनो द्वयोश्च वृत्तिहेतुः। मेघाश्चाम्बुगु........वानिषान्धकारीकृत्योन्नतत्वात् तामसाः, ते वर्षन्तः प्रोषितभर्तृकाणां विषादं जनयन्ति, पथिकानां दुःखम्, कृषीवलानां तुष्टिमित्यत्र तम आत्मनो द्वयोश्च वृत्तिहेतुः॥ १२॥

---

१. 'च' इति ख० पुस्तके नास्ति।
२. 'सत्त्वन्यत्कृतेन' इति क० पुस्तकपाठः प्रामादिकः।
३. 'तौ' इति क०।
४. 'वृत्तिहेतुभूतत्वाद्' इति ख०।
५. '०गुणा सितत्वात्' इति क०।
६. 'सपत्नीं कासांचिद् विषादं तामविन्दतो दुःखमित्यत्र' इति ख०।
७. 'राजपरेषां' इति सर्वपुस्तकपाठो भ्रमविजृम्भित एव प्रतीयते। उपरिष्टात् स्थापितपाठस्तु विद्वद्भिः क० सम्पादकैः कल्पितः।

एषां दुर्लक्षणानां लक्षणान्तरमाह—

सत्त्वं लघु प्रकाशकमिष्टमुपष्टम्भकं चलं च रजः।
गुरु वरणकमेव तमः प्रदीपवच्चार्थतो वृत्तिः॥ १३॥

सत्त्वमित्यादि। इष्टं सांख्याचार्याणां सत्त्वं लघुस्वभावं[1] प्रकाशं च। यस्योद्रेकाच्छरीरेऽङ्गानि[2] लघूनि भवन्ति, विषयप्रकाशनसमर्थानि चेन्द्रियाणि। बाह्यानि च द्रव्याणि लघूनि प्रकाशात्मकानि निर्मलानि[3] (?) भवन्ति। उपष्टम्भकं चलं च रज इति। उपष्टम्भयतीत्युपष्टम्भकम् यस्योद्रेकाद् देवदत्तो व्यवस्यति, चलचित्तश्च भवति। बाह्यानि च[4] चलानि भवन्तीति॥

गुरु वरणकमेव तम इति। वृणोति पिधत्त इति। 'कृत्यल्युटो बहुलम् (पा० ३।३।११३)' इति कर्तरि ल्युट्, करणे वा। पश्चात् स्वार्थे कन्। यस्योद्रेकाद् गुरूण्यङ्गानि भवन्ति, इन्द्रियाणि च तमसैवात्तानि भवन्ति। बाह्यानि च गुरूण्यनिर्मलानि च भवन्ति। उदाहरणदिगियमन्यान्यपि विज्ञेयानि भवन्ति[5]। तथा चाहुः—प्रीतिप्रीति (?) स्वाभिषङ्गलाघवानि प्रसादहर्षौ[6] च, स्तम्भौद्धत्यद्वेषचलनशोषण[7]तापभेदाश्च, वरणापध्वंसनसादनगौरवदैन्यभीतयश्चैतानि सत्त्वरजस्तमसां क्रमेण ज्ञातव्यानि लिङ्गानि। ननु चैते परस्परविलक्षणा गुणा विरुद्धत्वात् कथं सम्भूयैकत्र वर्तन्त इत्याह—प्रदीपवच्चार्थतो वृत्तिरिति। प्रदीपस्येव प्रदीपवत्। तैलवर्त्यग्निसमुदायः प्रदीपः। यदा समुदायात्म...... परस्परविलक्षणानामपि प्रदीपभा..प्रवृत्तिः, तमसि स्थिता घटादयो देवदत्तस्य प्रकाशयितव्या इति, तथा सत्त्वरजस्तमसां पुरुषार्थहेतुना प्रवृत्तिः, पुरुषार्थशब्दोपलब्धिश्चेति॥ १३॥

---

१. 'खलु' इति ख०।
२. '०ऽङ्गानि' इति ख०
३. 'निर्मल्यानि' इति ख०।
४. 'च' इति क० पुस्तके नास्ति।
५. 'उदाहरण' इत्यादि 'भवन्ति' इत्यन्तं ख० पुस्तके नास्ति।
६. '०द्व स०' इति ख०।
७. '०शोषण०' इति ख० पुस्तके नास्ति।

ननु च 'त्रिगुणमविवेकि विषयः सामान्यमचेतनं प्रसवधर्मि व्यक्तम्', तत्र सुखदुःखमोहोपलब्धेस्त्रैगुण्यं व्यक्तं सिद्धम्। अविवेकयादयो धर्माः प्रसवपर्यन्ताः कथं सिद्ध्यन्तीत्याह—

अविवेक्यादिः सिद्धस्त्रैगुण्यात्तद्विपर्ययाभावात्।

कारणगुणात्मकत्वात्कार्यस्याव्यक्तमपि सिद्धम् ॥ १४ ॥

अविवेक्यादिः सिद्ध इत्यादि। गुणिद्वारेण गुणाभिधानम्। अविवेक्यादिगुणस्सिद्धः। व्यक्त इति वाक्यशेषः। कुतः? त्रैगुण्यात्। कथं यस्माद् गुणा एवाविवेकिनो भोग्याः सामान्या अचेतनाः प्रसवधर्मिणश्च, ते च व्यक्ते सिद्धा इति सिद्धो गुणः। तद्विपर्ययाभावादिति। त्रैगुण्यस्याभावादिति[1]। त्रैगुण्यस्याभावेऽविवेक्यादयोरभावात्। न हि निर्गुणस्य पुरुषस्याविवेक्यादिः सम्भवति। तस्मात् त्रैगुण्यादेवाविवेक्यादिः सिद्धः। एवं च सति प्रधानमपि त्रैगुण्यात्तथाविधं सिद्धम्। यदाह—कारणगुणात्मकत्वात्कार्यस्याव्यक्तमपि सिद्धमिति। कारणस्य यो गुणः स आत्मा स्वभावो यस्य तत्तथोक्तम्। तस्य स्वभावस्तत्त्वम्। तस्मादिह लोके कारणगुणकं कार्यं दृष्टम्। शुक्लैः कृष्णैर्वा तन्तुभिरारब्धः पटः शुक्लः कृष्णो वा भवति। यद्यव्यक्तं तथाविधं न स्यात्, कथ व्यक्तं तथाविधं भवेत् ॥ १४ ॥

ननु च सति धर्मिणि धर्माश्चिन्त्यन्ते, प्रधानस्यैव धर्मिणोऽलब्धसिद्धित्वात् कथमविवेक्यादीत्याह—

भेदानां परिमाणात् समन्वयाच्छक्तितः प्रवृत्तेश्च।

कारणकार्यविभागादविभागाद्वैश्वरूप्यस्य ॥ १५ ॥

भेदानामित्यादि। कार्यतस्तदुपलब्धेर्महदादि तच्च कार्यमित्यनेनैव साधितेऽस्मिन् यथावदधिगते पुनर्दार्ढ्यार्थं समनन्तरोपादानम्। भिद्यन्त इति भेदाः, कार्यविशेषास्तेषां एकस्संसर्गी दृष्टः[2] परिमाणाच्च। भेदानां[3] परिमितत्वादित्यर्थः। येन च परिमितास्तेषामेकः संसर्गी दृष्टः। यथा मूलाङ्कुरपत्रकाण्डप्रसवपुष्प(तु)षतण्डुलकणानां भेदानां व्रीहिः तवि (?)

१. ख० पुस्तके नास्ति।
२. ख० पुस्तके नास्ति।
३. 'परिमाणान्ताभेदाना' इति ख०।

बाह्याध्यात्मिकभेदाः। परिमितबाह्या ब्रह्मादिस्तम्बपर्यन्ताश्चतुर्दश। आध्यात्मिकाश्च महदहङ्कारतन्मात्रेन्द्रियभूताख्यास्त्रयोविंशतिः। तस्मादेतेषामेकेन (सं)सर्गिणा भवितव्यम्। यत्रैषां संसर्गस्तदव्यक्तं कारणमस्तीति सामान्यतो(दृष्टम)नुमानम्। समन्वयात्। भेदानामिति वर्तते। समन्वयोऽनुगमः एकजात्यनुगमादित्यर्थः। य एकजात्यनुगता भेदास्तेषामेकमेव तथाभूतं कारणं दृष्टम्। यथा कटककेयूरादीनां सुवर्णपिण्डः। यथा वा शरावादीनां मृत्पिण्डः। एवमेषामपि बाह्याध्यात्मिकानां सुखःदुःखमोहानुगतत्वादेकेन तथाविधेन भवितव्यम्। य[1] एषां समुदायस्तत्प्रधानमिति सामान्यतोदृष्टम्।

शक्तितः प्रवृत्तेश्चेति। इह कुलालादिशक्तिपूर्विका घटादीनां प्रवृत्तिर्दृष्टा नाशक्तिपूर्विका। एषामविगा[2]ह्याध्यात्मिकानां प्रवृत्तिर्दृश्यते। ततश्च प्राक् च[3] प्रवृत्तेर्जनितया शक्त्या भवितव्यम्। यासौ शक्तिः सैवाव्यक्तभावमापद्यत इति सामान्यतोदृष्टम्। कारणकार्यविभागादिति। कारणस्य पूर्वभावित्वात् पूर्वनिपातः। अल्पाच्तरस्य पूर्वनिपातस्यानित्यत्वम्। यत उत्पद्यते तत्कारणम्, यच्चोत्पद्यते तत्कार्यम्। यथा मृत्पिण्डघटयोर्जन्यजनकत्वेन पृथगर्थक्रियाकरणाच्च विभागो दृष्टः। अन्यथा घटस्योदकाहरणक्रिया या न सा मृत्पिण्डस्य, या मृत्पिण्डस्य न सा घटस्य। एवं व्यक्तस्य महदादेः कार्यत्वात् पृथगर्थक्रियाकरणाच्च विभागः। तस्मादस्य[4] कारणेन भवितव्यम्। तच्चाव्यक्तात् किमन्यत् स्यादिति। अस्मिन् व्याख्याने 'कार्यतस्तदुपलब्धेर्महदादि तच्च कार्यम्' इत्यनेनैव सिद्धत्वादन्यैरन्यथा व्याख्यायते। यदुपकरोति तत्कारणम्[5], यदुपक्रियते तत्कार्यं तयोर्विभागात्, उपकार्योपकारकभावादित्यर्थः। तत्र कार्य...व्यादीनि शरीरस्थानि स्थानसाधना...वभोगैः कारणान्युपकुर्वन्ति। कारणानि च वृद्धिक्षतसंरोहणपालनैः कार्याणि। बाह्यानि च कारणानि पृथिव्या धृतिसङ्ग्रहपक्तिव्यूहनावकाशदानैः परस्परमुपकुर्वन्ति। तथा दैवमानुषतैर्यग्योनानि परस्परोपकारीणि। तत्र दैवम्,

१. 'यत' इति ख०।
२. 'एषामपि बाह्या०' इति क०।
३. 'प्राक् च' इति ख० पुस्तके नास्ति।
४. 'कस्मादन्य०' इति ख०।
५. 'तत्करणम्' इति ख०।

यथाकालं शीतोष्णपातवर्षागमः, मानुषतैर्यग्योनान्युपकरोति[1] । मानुषमिज्यायागस्तुतिभिर्दैव रक्षति, पोषणभैषज्यैश्च तैर्यग्योनमुपकरोति । यथाध्यात्मिकानां बाह्यानां चोपकार्योपकारकभावो बुद्धिकृत इव दृश्यते तदस्य कश्चिद्व्यवस्थापिता स्यात्, कुतोऽयं विभाग इत्यन्यथानुपपत्तेः ॥

अविभागाद्वैश्वरूप्यस्येति । न विद्यते विभागोऽस्येत्यविभागः । अविभक्तादित्यर्थः । तस्माद्वैश्वरूप्यस्योपलब्धेरिति शेषः । इह लोकेऽविभक्तादेकस्मादिक्षुद्रव्याद्रस[2]फाणितगुडखण्डशर्करादिवैश्वरूप्य नानात्वं दृश्यते, तथैकस्माद्दुग्धाद्दधिमस्तु[3]नवनीतघृतादिवैश्वरूप्यमुपलभ्यते । एवमाध्यात्मिकानां बाह्यानां च वैश्वरूप्यम् । तस्मादेषामविभक्तेनैकेन भवितव्यमिति सामान्यतोदृष्टम् ॥

अन्यस्त्वाह—अविभागे वैश्वरूप्यस्येति । अविभागो लयः, वैश्वरूप्यं जगत् नानारूपत्वात् । प्रलयकाले वैश्वरूप्यं क लीयते स्थित्युत्पत्तिप्रलयाज्जगत इति । न चेश्वरे लयनं सम्भवति; तस्य निर्गुणत्वेनाभ्युपगमात् । तस्मादन्यथानुपपत्त्यास्ति तदेकमिति । तथा चाहुः—

प्रधानादानुपूर्व्येण सृष्टिर्लोकस्य संसरः ।
प्र(धानात्) प्रातिलोम्येन पुनस्तत्रैव चत्वरः[4] ॥ इति ॥ १५ ॥

एषां हेतूनां प्रवर्तनार्थमाह—

कारणमस्त्यव्यक्तम् प्रवर्तते त्रिगुणतः समुदयाच्च ।
परिणामतः सलिलवत् प्रतिप्रतिगुणाश्रयविशेषात् ॥ १६ ॥

कारणमस्तीत्यादि । यदि कारणमस्त्यव्यक्तं तत्कथं प्रवर्तत इत्याह—त्रिगुणतः समुदयाच्चेति[5] । यदा प्रकृतिस्था गुणाः[6] साम्येन प्रवर्तन्ते तदा (त्रीनेवाधिकृत्य प्रवर्तन्ते नैकैकमित्यर्थः । यदा वैषम्येण प्रवर्तन्ते तदा)[7]

१. '०नानु०' इति ख० ।
२. '०द्रव्यरस' इति ख० ।
३. '०मस्तु०' इति ख० ।
४. 'सञ्चरः' इति क० सम्पादकमहाशयानामभिमतः पाठः । कुत्रचित् पुस्तके 'चञ्चरः' इत्यपि पाठो दृश्यते ।
५. 'समुदायाच्च' इति ख० पुस्तकपाठः प्रामादिकः ।
६. 'त्रयो गुणाः' इति ख० ।
७. कोष्ठकान्तर्गतः पाठः ख० पुस्तके नास्ति ।

कार्यं कारणारब्धत्वात् समुदयात् प्रवर्तते । समन्तादुदयो यस्य गुणस्य तमधिकृत्येत्यर्थः, शेषन्यक्कृतशक्तिकत्वात्[1] । यदि समुदयादव्यक्तं प्रवर्तते तस्मादुत्पन्नं तदव्य···स्मान्न भवति ॥ शुक्लेभ्यः कृष्णेभ्यो वा तन्तुभ्यः शुक्लः कृष्णो वा पटो भवतीत्याह—परिणामत इत्यादि । पूर्वस्यामवस्थायामवस्थान्तरं परिणामः, तस्माद्धेतोः प्रवर्तते । यथा कणिकायाः सूक्ष्मायाः मूलकः शाखाप्रशाखादिप्रवृद्धो महान्वनस्पतिर्व्यक्तो भवति, एवमव्यक्ताद् व्यक्तं परिणमति । यद्येवमेकरूपादुत्पन्नस्य त्रैलोक्यस्य कथमनेकरूपत्वमित्याह—सलिलवत्प्रतिप्रतिगुणाश्रयविशेषादिति । सलिलेन तुल्यं वर्तत इति सलिलवत् । एकैकं प्रति गुणाः प्रतिप्रतिगुणाः । त एवाश्रयास्तेषां यो विशेषस्तस्माद्धेतोः प्रवर्तन्ते । यथा सलिलमन्तरिक्षादेकरसमपि तदेकस्य कटुवम्लादेर्गुणस्याश्रयभूतस्य विशेषान्नानारसं वर्तते एवमव्यक्तमपीति गुणात्मकत्वादेकैकगुणाश्रयविशेषान्नानारूपं प्रवर्तते । तत्र सत्त्वस्य कृतेराश्रयस्य विशेषाद्देवभावेन वर्तनम्, रजस आश्रयस्य विशेषान्मानुषभावेन तमस आश्रयस्य विशेषात्तिर्यग्योनिभावेनेति ॥ १६ ॥

एवमव्यक्तस्यास्तित्वं प्रवृत्तिं च प्रसाध्य पुरुषास्तित्वं प्रसाधयितुमाह—

संघातपरार्थत्वात् त्रिगुणादिविपर्ययादधिष्ठानात् ।
पुरुषोऽस्ति भोक्तृभावात्कैवल्यार्थं प्रवृत्तेश्च ॥ १७ ॥

संघातपरार्थत्वादित्यादि । संहन्यत इति संघातः । संघातश्चासौ परार्थश्चेति संघातपरार्थः । संघातत्वं हेतुः परार्थत्वं साध्यम् । इह लोके संघातबाह्याः शयनासनादयो ये ते परार्था दृष्टाः । ते हि देवदत्तस्य परस्यार्थं कुर्वन्ति न स्वार्थम् । एतेऽप्याध्यात्मिका महदादयः शरीरसंज्ञकाः संघाताः, तैः परार्थैर्भवितव्यम् । न च पुरुषव्यतिरिक्तोऽन्यः परोऽस्ति, पुरुष एव पर इ(त्य)न्यतोदृष्टम् ॥

ननु महदादिभूतपर्यन्तं(शरी)रमेव पुरुषो नान्यः कश्चिदित्याह[2]—त्रिगुणादिविपर्ययादिति । आदिशब्देनाविवेक्यादयः पञ्च धर्मा दृश्यन्ते । तथाहि तद्विपरीतः पुमानित्युक्तम् । ततश्च तद्विपरीतत्वात् पुंसः कथं महदादिमात्रमेव पुरुषः । तस्माद् व्यतिरिक्तः पुरुषो यस्यार्थका इमे

१. अत्र ख० पुस्तके पाठस्त्रुटितो दृश्यते ।
२. '०दित्यत्राह' इति क० ।

संघाताः। अधिष्ठानादिति। अधितिष्ठत्यस्मिन्नित्यधिष्ठानम्। महदादिभूतपर्यन्तं शरीरमिह लोके यदधिष्ठानं तत्पराधिष्ठितं दृष्टम्, यथा रथादि। दृश्यते चाधिष्ठानं शरीरम्। तस्मादस्याधिष्ठात्रा[1] भवितव्यम्। योऽसावधिष्ठाता स पुरुषः, नान्तःकरणमधिष्ठातृ[2], तस्याचेतनत्वादिति सामान्यतोदृष्टम्॥

भोक्तृभावादिति[3]। भोक्तृत्वादित्यर्थः[4]। इह लोके भोग्यं दृष्ट्वा भोक्तानुमीयते। दृश्यते महदादिपर्यन्तं भोग्यम्, तस्मादस्यापि भोक्त्रा भवितव्यमिति सामान्यतोदृष्टम्। न चान्तःकरणं भोक्तृ, तस्याचेतनत्वाद्भोग्यत्वाच्च। यश्च भोक्ता स एव पुरुषः सात्मकं जीवच्छरीरं प्राणादिमत्त्वात्। अस्मिन् देहे योऽयमात्मा समानजातीयानेकवस्त्वन्तरसहायः; प्रतिनियतैर्जन्मादिभिर्युज्यमानत्वात्, मनोवत्॥ कैवल्यार्थं प्रवृत्तेश्चेति। कैवल्यं मोक्षः। तदन्यार्थप्रधानस्यैषा प्रवृत्तिः। तथाहि—प्रधानं बुद्ध्यात्मना परिणमति। बुद्धेश्चाष्टावंशानि। तेषु च ज्ञानं कैवल्यम्। तत्र यदि पुरुषो न स्यात्तदा तदर्था प्रवृत्तिर्न भवेत्। तस्मादन्यथानुपपत्त्या पुरुषोऽस्ति। तत्र सिद्धे पुंसि विवादाः। एक एवायं पुरुषः सर्वशरीरेषु स्थित इत्येके। सर्वे काया उपनतानेकात्मानः सात्मकत्वात्, योगिशरीरवृन्दवत् प्रतिशरीरमनेकः पुरुष इत्यपरे। एक एव[5] पुराणः पुरुषः, तस्मादग्नेरिव विस्फुलिङ्गाः[6] प्रतिशरीरं पुरुषा आविर्भूता इति वेदान्तवादिनः॥ १७॥

अत्राह—

जननमरणकरणानां प्रतिनियमादयुगपत्प्रवृत्तेश्च।
पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चैव॥ १८॥

जननमरणकरणानामित्यादि। करणं चक्षुरादीन्द्रियम्। देहेन्द्रियादेरधिष्ठानस्योत्पत्तिविनाशौ। तद्योगात्पुरुषस्य जननमरणे अपि

१. 'कस्मा०' इति ख०।
२. '०ष्ठात्रि' इति ख०।
३. ख०पुस्तके नास्ति।
४. 'भोक्तृभावादित्यर्थः' इति ख०।
५. 'एकमेव' इति ख०।
६. 'विस्फुरन्ति' इति ख०।

व्यवस्थाप्येते। स्वतः पुरुषस्य ते न सम्भवतः। कुतः? नित्यत्वात्। तत्र यद्येकः पुरुषः स्यात्तदैकस्मिन् जायमाने म्रियमाणे[1] वा सर्वेषां जननमरणे स्याताम्। तथैकस्मिंश्चक्षुष्मति श्रोत्रवति वा सर्वेऽन्धा बधिरा वा, पश्येयुः शृणुयुर्वा। एकस्मिन्नन्धे बधिरे वा तथा स्युः। न चैवम्, जननादीनां प्रतिनियमात्। तस्मादन्यथानुपपत्त्या पुरुषबहुत्वं सिद्धम्॥ अयुगपत्प्रवृत्तेश्चेति। यद्येकः पुरुषः स्यात्तदैकेनाधिष्ठात्राधिष्ठिते देहे, धर्माधर्मयोरर्थानर्थयोः सुखदुःखयोर्वा प्रवृत्ते,[2] सर्व एव युगपत् प्रवर्तेरन्। न चैवमित्यन्यथानुपपत्तिः। त्रैगुण्यविपर्ययाच्चेति। त्रय एव गुणास्त्रैगुण्यम्। तस्य विपर्ययोऽन्यथात्वम्। अधिष्ठानस्य त्रिगुणात्मकत्वात्तद्योगात्पुरुषोऽपि त्रिगुणात्मक इत्युच्यते। तत्र यद्येकः पुरुषः स्यात्तदैकस्मिन् सात्त्विके राजसे तामसे वा, सर्व एव तथाविधाः स्युः। न चैवम्, गुणानां विपर्ययदर्शनादित्यन्यथानुपपत्तिः॥

पुराणपुरुषादग्नेरिव विस्फुलिङ्गाः[3] प्रतिशरीरं पुरुषा इत्यस्मिन्नपि दर्शने पुरुषबहुत्वमस्त्येव। तेषां परस्परविलक्षणत्वात् ते पुराणपुरुषादभिन्ना भिन्ना वेति दर्शनद्वयम्। तदन्यत्र विचारितत्वादिह ग्रन्थगौरवभयान्नोपन्यस्तमस्माभिरिति॥ १८॥

एवं पुरुषबहुत्वं प्रसाध्य तद्धर्मान् कथयितुमाह—

तस्माच्च विपर्यासात् सिद्धं साक्षित्वमस्य पुरुषस्य।
कैवल्यं माध्यस्थं द्रष्टृत्वमकर्तृभावश्च॥ १९॥

तस्माच्च विपर्यासादित्यादि। यः प्रागुक्तो विपर्ययः—त्रिगुणमविवेकि विषयः—इत्यादिना, तस्मात्साक्षित्वादयो धर्माः पुरुषस्य सिद्धाः। तत्र निर्गुणस्य पुरुषस्याप्रसवधर्मित्वादकर्तृत्वम्[4]। यश्चाकर्ता स भवत्युदासीनः। सप्तविधं चास्यौदासीन्यम्। तथा चोक्तम्—

पश्यति शृणोति सर्वं करोति स्थितिं प्रसङ्गं च नापि।
स्वतो न परतो…नोभयतश्चाप्युदासीनः॥ इति॥

यश्चोदासीनः स साक्ष्यपि भवति प्रधानसम्बन्धिनः क्रियाकलापस्य; निर्गुणत्वात्। कैवल्यं केवलभावात्। चेतनत्वाच्च द्रष्टृत्वमिति॥

१. 'जायमानेन्द्रियमनो' इति ख०।
२. 'प्रवृत्तेः' इति ख०।
३. 'विष्णुलिङ्गाः' इति ख०।
४. 'संभव०' इति ख०।

ननु च यद्यकर्ता तत्कथं भोक्तृभावादस्ति पुरुषः ? तथा चाहुः—

बालहुताशनतरवः स्वयमकृतानां यथा हि भोक्तारः।
पुरुषोऽपि विषयफलानां स्वयमकृतानां तथापि भोक्ता ॥ इति ॥

इत्युक्तमकर्तुरपि भोक्तृत्वमस्येति ॥ १९ ॥

ननु च यद्यचेतनमव्यक्तं कथं देहेन्द्रियसंज्ञमधिष्ठानं धर्माधर्मादिषु प्रवर्तते, तस्याचेतनत्वादित्याह—

तस्मात्तत्संयोगादचेतनं चेतनावदिव लिङ्गम् ।
गुणकर्तृत्वेऽपि तथा कर्तेव भवत्युदासीनः ॥ २० ॥

तस्मात्तत्संयोगादित्यादि । तेन पुरुषेण यः संयोगस्तस्मादचेतनं[1] चेतनावदिव भवति[2] । यथाग्निसंयोगाल्लोहमणिरित्युच्यते । लिङ्गं महदादिसूक्ष्मपर्यन्तं वक्ष्यति । यदि तदेवं त्रिगुणात्मकं कर्तृ न पुमान्, कथं पुरुषो गच्छतीत्युच्यत इत्याह—गुणकर्तृत्वेऽपि तथा कर्तेव भवत्युदासीन इति । गुणानां कर्तृत्वं न पुरुषस्य । यथा पुरुषसंयोगादचेतनं लिङ्गं चेतनावदिव भवति, तथा गुणात्मकलिङ्गसंयोगादकर्तापि सन् कर्तेव भवति । उदासीनः । यथा स्वामी स्वयमयोद्धापि योध[3]भृत्यसंयोगाद् योद्धेति व्यपदिश्यते, तथा पुरुषोऽप्युपचारेण कर्तेति ।

तथाचोक्तम्—

'प्रवर्तमानान् प्रकृतेरिमान् गुणांस्तमोऽभिभूतो विपरीतदर्शनः ।
अहं करोमीत्यबुधोऽभिमन्यते तृणस्य कुब्जीकरणेऽप्यनीश्वरः ॥इति॥२०

ननु प्रधानपुरुषयोः किं कर्तृत्वं चैतन्यार्थमेव संयोगः, किं वान्यार्थमपीत्याह—

पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य ।
पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः ॥ २१ ॥

पुरुषस्येत्यादि । पुरुषस्यार्थो द्विविधः, विषयोपभोगः कैवल्यं च । तदुभयं प्रधानेन सम्पाद्यम् । विषयोपभोगश्च प्रधानविभूतिमन्तरेण न

१. 'तदचेतनं' इति ख० ।
२. 'भाति' इति ख० ।
३. 'यौध०' इति क० ।

सम्भवतीति दर्शनार्थं पुरुषः प्रधानेन संयुज्यते । मानं स्वां विभूतिं दर्शयितुमसमर्थात्पुरुषेण संयुज्यते (?) । दृष्ट्वा[1] स सर्वां विभूतिमनुभूय विरक्तत्वाद्[2] विरक्तः पुरुषः प्रधानेन त्यज्यते । त्यक्तस्य कैवल्यमित्यतो दर्शनार्थं कैवल्यार्थं च द्वयोरपि संयोगो मत्स्योदकवदुदुम्बरमशकवच्च ॥

पङ्ग्वन्धवदिति । दृष्टान्तः[3] । पङ्गुः सचक्षुः पश्यति पन्थानं न संचरति, अन्धोऽपि संचरति न पश्यति पन्थानम् । तयोः स्वा[4]र्थभ्रष्टयोर्ग्रामप्राप्त्यर्थः सम्बन्धो भूतः । तत्र पङ्गुरन्धस्कन्धमारुह्य गतिमान्, अन्धोऽपि दृष्टधिष्ठानाद् दृष्टिमान् जातः । ग्रामप्राप्तयोश्च तयो[5]र्वियोगः । एवं पुरुषो निष्क्रियः प्रधानेन संयुज्य तद्विभूतिदर्शनाय देवादिषु संचरति । प्रधानं निश्चेतनमपि पुरुषाधिष्ठानाच्चेतनावदिव द्वयमपि सम्पादयति । तस्मात्पङ्ग्वन्धवदुभयोरपि संयोगः ॥

ननु च संयोगमात्रेण कथं दर्शनं कैवल्यं चेत्याह—तत्कृतः सर्ग इति । संयोगकृतो महदादिग्रामोत्पाद इत्यर्थः ॥ २१ ॥

तमेव दर्शयन्नाह—

प्रकृतेर्महांस्ततोऽहङ्कारस्तस्माद् गणश्च षोडशकः ।
तस्मादपि षोडशकात्पञ्चभ्यः पञ्च भूतानि ॥ २२ ॥

प्रकृतेर्महानित्यादि । प्रकृतिः प्रधानं कारणमव्यक्तं गुणसाम्यं तमोबहुलमव्याकृतमिति प्रकृतिपर्यायाः । ततो महानुत्पद्यते स तु तमोबहुलः । महान् बुद्धिर्मतिः प्रत्यय उपलब्धिरिति बुद्धिपर्यायाः । ततोऽहङ्कार उत्पद्यते । स तु रजस्तमोबहुलः । अहङ्कारः सपर्णवन्हि[6] (?) स्तत्पुरुष इत्यहङ्कारपर्यायाः ॥

तस्माद्गणश्च षोडशक इति । तस्मादहङ्कारात् षोडशको गण उत्पद्यते । एकादशेन्द्रियाणि पञ्च तन्मात्राणीत्यर्थः । तानि हृषीकाणीन्द्रियाणीति पर्यायाः । सूक्ष्मा अतिशया अणवः इति तन्मात्रपर्यायाः ॥

१. ख० पुस्तके नास्ति ।
२. 'विरक्ताद्' इति ख० ।
३. 'पङ्ग्वन्धवद्दृष्टान्तः' इति ख० ।
४. 'स्वार्थ०' इति क० पुस्तकपाठो न मनोरमः ।
५. 'तयोः' इति ख० पुस्तके नास्ति ।
६. 'सुपर्वपणि' इति क० ।

तस्मादपि षोडशकात् पञ्चभ्यः पञ्च भूतानीति। षोडशाद् गणाद्यानि पञ्चतन्मात्राणि तेभ्य एकोत्तरवृद्ध्या पञ्च महाभूतानि भवन्ति। तत्र शब्दतन्मात्रादाकाशमेकगुणम्[1]। शब्दतन्मात्रप्रतिसंहितात् स्पर्शतन्मात्राद् द्विगुणो वायुः। ताभ्यां प्रतिसंहिताद्रूपतन्मात्रात् त्रिगुणं तेजः। तैः प्रतिसंहिताद्रसतन्मात्रात् चतुर्गुणा आपः[2]। चतुर्भिः प्रतिसंहिताद् गन्धतन्मात्रात्[3] पञ्चगुणा पृथिवीति। एतैराकाशादयः स्थूला विशेषा उच्यन्ते येष्ववसितानि चतुर्विंशतितत्त्वानि॥ २२॥

बुद्धेर्लक्षणमाह—

अध्यवसायो बुद्धिर्धर्मो ज्ञानं विराग ऐश्वर्यम्।
सात्त्विकमेतद्रूपं तामसमस्माद्विपर्यस्तम्॥ २३॥

अध्यवसाय इत्यादि। शब्दादिषु विषयेऽध्यवसायशब्दोऽयं यावद् गन्धोऽयमिति सुबुद्धेर्लक्षणम्। तस्याश्चाष्टौ रूपाणि॥

धर्मो ज्ञानं विराग ऐश्वर्यमिति। तत्र योऽयमनिर्विषयमनुष्ठानात्मकोऽध्यवसायः स धर्मः। यमाः पञ्च नियमाश्च। यथोक्तं सांख्यप्रवचने 'अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः' (पा. यो. सू. २।३०), 'शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः' (पा.यो.सू. २।३२) इति। तत्र सन्तोषः[4] संनिहितसाधनाभ्याशादधिकस्यानुपादित्सा। तपो जिघत्सापिपासाशीतोष्णस्थानसाधनजयः काष्ठामेनाकारमौनौ,[5] व्रतानि च कृच्छ्रचान्द्रायणादीनि। स्वाध्यायो मोक्षशास्त्राध्ययनं प्रणवजपो वा। ईश्वरप्रणिधानं विशिष्टदेवताराधनम्। असंसारिभिस्तुल्यवृत्तित्वादिति। तद्विपरीतानुष्ठानमधर्मः। पञ्चविंशतितत्त्वानां स्वसंज्ञालाक्षण्यकत्वप्रयोजनावधारणं ज्ञानम्, गुणपुरुषान्तरज्ञानम्। शेषमज्ञानम्। विषयशरीरेन्द्रियेभ्यो दोषदर्शनाद्वैमुख्यं विरागः। तेष्वभिलाषो रागः। ऐश्वर्यमष्टगुणम्—अणिमा, महिमा, लघिमा, प्राप्तिः, प्राकाम्यम्, ईशित्वं वशित्वम्, यत्रकामावशालि(यि ?)त्वं चेति। तत्राणिमाऽणुत्वम्, येन गुणेन सूक्ष्मो भूत्वा विचरति। कार्ये कारणोपचारादणिमेत्युच्यते।

१. '०मेकं' इति ख०।
२. 'ताभ्यां प्रतिसंहिताद्रसतन्मात्राच्चतुर्गुणो रूपः' च इति ख०।
३. '०तमान्त्रे' इति ख०।
४. 'सन्तोषात्' इति ख०
५. 'काष्ठमैनाकारमौने' इति क०।

उत्तरत्रा[1]प्येवं योज्यम्। लघिमा लघुत्वम्, येन वायुवल्लघुतरो भवति। महिमा महत्त्वम्, येन भुवनेषु धर्मादिप्राप्तिः, येन गुणेनेषितस्य प्रापणम्। प्राकाम्यं प्रचुरकामिता येनैकमनेकं प्राकाम्यतेऽनेकं चैकम्। ईशित्वं प्रभुता, येन स्थावरादीनि भूतानि सन्देशकारीणि भवन्ति। वशित्वं वशिता, येन स्वतन्त्रश्चरति। यत्रकामावशायित्वं (कामेनेच्छयावशेतुं) शीलं यस्य स यत्रकामावशायी। तस्य भावः यत्रकामावशायित्वम्। अनेकार्थत्वाद्धातूनां 'शी' तिष्ठतौ[2] वर्तते। येन गुणेन दिव्यन्तरिक्षे भूमौ वाऽवस्थायित्वमित्यर्थः। सात्त्विकमेतद्रूपमिति। सत्त्वतमोबहुलत्वात्। बुद्धेर्यदा सत्त्वमुत्कटं भवति तदैतच्चतुष्टयं भवतीत्यर्थः। तामसमस्माद्विपर्यस्तमिति। उत्कटलक्षणात् धर्मादिचतुष्टयाद्विपरीतं तमस्युद्रिक्ते भवतीत्यर्थः[3]। अधर्मोऽज्ञानमवैराग्यमनैश्वर्यं चेति[4]॥ २३॥

अहङ्कारलक्षणमाह—

अभिमानोऽहङ्कारस्तस्माद् द्विविधः प्रवर्तते सर्गः।
एकादशकश्च गणस्तन्मात्रपञ्चकश्चैव॥ २४॥

अभिमान इत्यादि।[5] अभिमतिरभिमानः। रूपादिषु विषयेष्वभिमानो रूपवानहम्, ममैते विषयाः, इत्यहङ्कारलक्षणम्। तस्मादभिमानलक्षणादहङ्कारात् द्विविधः[6] प्रवर्तते सर्ग इति। सृज्यत इति सर्गः॥

तमेव द्विविधं[7] दर्शयितुमाह—एकादशकश्च गण इति। एकादश परिमाणमस्येत्येकादशः श्रोत्रादिर्गणः॥

तन्मात्रपञ्चकं चेति। तन्मात्रतस्मादत्र(तन्मात्र ?)शब्दादिस्वरूपमात्र इत्यर्थः। तन्मात्राणि शब्दस्पर्शरूपरसगन्धाः। मात्राग्रहणं भूतसंश्लेषनिवृत्त्यर्थम्। भूतेष्वपि शब्दादिसम्भवात्॥ २४॥

१. 'प्रा०' इति ख० पुस्तके नास्ति।
२. 'गीतिषु तेन' इति ख० पाठोऽप्रासङ्गिकः प्रामादिकश्च प्रतिभाति।
३. '०द्रिक्तेत्यर्थः' इति ख०।
४. अत्र 'आह' इति अधिकः पाठः ख० पुस्तके। तस्य संगतिश्चिन्त्या।
५. सर्वेष्वेव पुस्तकेषु 'अभिमानमिति' इति पाठोऽवलोक्यते। स तु सुव्यक्तमेव लिपिकरप्रमादजन्यः। विद्वद्वर्यैः क० सम्पादकैरेवास्य संशोधनं विहितं यदस्माभिरप्यङ्गीक्रियते।
६. अत्र 'विविधः' इति ख० पुस्तकपाठः प्रामादिको मूलविरोधात्।
७. अत्रापि 'विविधं' इति ख० पुस्तकपाठः।

स चाहङ्कारस्त्रिविध इति दर्शयन्नाह—

सात्त्विक एकादशकः प्रवर्तते वैकृतादहङ्कारात् ।
भूतादेस्तन्मात्रः स तामसस्तैजसादुभयम् ॥ २५ ॥

सात्त्विक इत्यदि । यदा सत्त्वमुद्रिक्तं तदाहङ्कारो वैकृताभिमानो भवति, रजश्चोद्रिक्तं तैजसः । तमश्चोद्रिक्तं भूतादिरिति । तत्र वैकृतादेकादशको गणः प्रवर्तते । स च सात्त्विकः सत्त्वबहुलः, स्वविषयग्रहणत्वात् । भूतादेस्तामसादहङ्कारात्तन्मात्रः स तामसः, तमोबहुलत्वात् । ततस्तामसस्तन्मात्राद्[1] गणात् तामसो भूतगणः प्रवर्तते । तैजसादुभयमिति । एतदाशयः—पञ्चकञ्चैतदुभयमपि प्रवर्तते[2] । आदिकाल उभयत्राप्यस्य सहायत्वात् । वैकृतभूतादि द्वावपि प्रकाशस्थितिशीलत्वात् न क्रियाशीले[3] । ततस्तैजसमहङ्कारं क्रियाशीलं सहायमपेक्ष्यैकादशकं पञ्चकं च मलाजनयत (?) इति ॥ २५ ॥

कः पुनरेकादश इत्याह—

बुद्धीन्द्रियाणि चक्षुःश्रोत्रघ्राणरसनत्वगाख्यानि ।
वाक्पाणिपादपायूपस्थान् कर्मेन्द्रियाण्याहुः ॥ २६ ॥

बुद्धीन्द्रियाणीत्यादि । द्विविधमिन्द्रियम् । तत्र चक्षुर्येन दृश्यते । श्रोत्रं येन श्रूयते । त्वग्यया स्पृश्यते । रसनं येन रस्यते । नासिका यया घ्रायते । ता आख्या येषामिन्द्रियाणामिति शब्दप्रधानो निर्देशः । तानि चक्षुःश्रोत्र[4]त्वग्रसनानासिकाख्यानि पञ्च । बुद्धिपूर्वकमर्थालोचन[5]मिति बुद्धीन्द्रियाण्याहुः साङ्ख्याचार्याः । शब्दवशादत्राक्रमः कृतः । क्रमस्तु श्रोत्रत्वक्चक्षुरिति ॥ वाक्पाणिपादपायूपस्थानिति । कर्मेन्द्रियाणि कर्माभिनिर्वर्तनात्[6] । अस्मादेव प्रयोगादुपस्थशब्दः पुंलिङ्गोऽप्यस्तीति ज्ञायते । स च स्त्रैणः पौरुषेयश्च । तत्र वागिन्द्रियं कण्ठस्थम् । अन्यानि प्रसिद्धान्येव ॥ २६ ॥

१. 'तामसात्तन्मात्रात्' इति क० सम्पादकैः संशोधितः पाठः ।
२. 'तैजसात्' इत्यारभ्य 'प्रवर्तते' इत्यन्तं ख० पुस्तके नास्ति ।
३. 'वैकृत०' इत्यारभ्य '०शीले' इत्यन्तं ख० पुस्तके नास्ति ।
४. 'येषाम्' इत्यादिः 'श्रोत्र' इत्यन्तः पाठः ख० पुस्तके नोपलभ्यते ।
५. '०पर्यालोचन०' इति क० ।
६. 'कर्माभिवर्तनात्' इति ख० ।

एकादशकमिन्द्रियं दर्शयन्नाह—

उभयात्मकमत्र मनः सङ्कल्पकमिन्द्रियं च साधर्म्यात् ।
गुणपरिणामविशेषान्नानात्वं बाह्यभेदाश्च ॥ २७ ॥

उभयात्मकमत्र मन इत्यादि । अत्रेत्यस्मिन्निन्द्रियवशे मन उभयात्मकमुभयस्वभावम् । बुद्धीन्द्रियाणां कर्मेन्द्रियाणां च स्वस्वविषयग्रहणकाले बुद्धीन्द्रियं कर्मेन्द्रियं चेत्यर्थः । उभयत्राप्यस्य व्यापारादिति लक्षणं तदित्याह—सङ्कल्पयतीति सङ्कल्पकम्, इदं नेदमिति । कथमिन्द्रियमित्याह—इन्द्रियं च साधर्म्यादित्यादि । इन्द्रियैस्तुल्यत्वादित्यर्थः । यथान्यदिन्द्रलिङ्गं तथा मनोऽपीत्यर्थः । तत्रैकस्मादहङ्कारादुत्पन्नानां कथं स्वरूपभेदः ? यच्छ्रोत्रादिबुद्धीन्द्रियम्, तत् प्रतिनियतविषयं नेतरविषयमपि । यद्वागादि कर्मेन्द्रियं तत् प्रतिनियतकर्म, नेतरकर्मापि । मनश्चोभयात्मकम्, नैकात्मकमित्याह—गुणपरिणामविशेषान्नानात्वमिति । अहङ्कारस्था ये गुणाः सत्त्वादयस्तेषामन्योऽन्याभिभवाश्रयादिद्वारेण[1] यः परिणामविशेषस्तत एवैषां नानात्वम् । त एव हि गुणाः परिणामविशिष्टा इन्द्रियव्यपदेशभाजो नानाविषया भवन्ति । कथं देशनियमो वृत्तिनियमश्च ? तत्र त्वगिन्द्रियं सर्वशरीरस्थितबाह्याभ्यन्तरवृत्ति, चक्षुःश्रोत्रघ्राणरसनानि शिरसि बहिः पृथक् पृथगवस्थितानि बाह्यवृत्तीनि । वागास्ये स्थिता । पाण्या[2]दयश्च बहि[3]रधस्तात् पृथक् पृथगवस्थिता बहिःकर्मविषया इत्यत्राह—बाह्यभेदाश्चेति । ये चान्ये विषयभेदा देशनियमवृत्तिनियमाभ्यां तेऽपि गुणपरिणामविशेषादेव । नात्रान्तरा कारणान्तरमस्ति[4] ॥ २७ ॥

एषामिन्द्रियाणां कस्य का वृत्तिरित्याह—

शब्दादिषु पञ्चानामालोचनमात्रमिष्यते वृत्तिः ।
वचनादानविहरणोत्सर्गानन्दाश्च पञ्चानाम् ॥ २८ ॥

शब्दादिष्वित्यादि । आदिशब्देन शब्दस्पर्शरूपरसगन्धाः । तेषु यथाक्रमं पञ्चानां श्रोत्रादीनां बुद्धीन्द्रियाणामालोचनमात्रं वृत्तिरिष्यते

१. '०दिद्वारेण' इत्यादिः 'परि०' इत्यन्तः पाठः ख० पुस्तके नास्ति ।
२. 'वाण्या०' इति ख० पुस्तकपाठः, स तु प्रामादिकः ।
३. 'बाहि०' इति क० ।
४. 'कारणमस्ति' इति क० ।

सांख्याचार्यैः। श्रोत्रादीनि हि विषयस्य प्रकाशनमात्रं कुर्वन्ति, निश्चयं तु बुद्धिः। तथा हि बुद्ध्यवसितमर्थं पुरुषः चेतयत इति सिद्धान्तः। कर्मेन्द्रियाणामपि वागादीनां यथाक्रमं वचनादानादीनि वृत्तयः[1] कर्माणि। तत्र वागिन्द्रियस्य नानाविधवर्णोच्चारणं कर्म, आदेयस्यादानं पाण्योः, विहरणं देशान्तरगमनं पादयोः, उत्सर्ग आहारमलस्योत्सर्जनं पायोः, आनन्दनमानन्दो ह्लादः शुक्रविसृष्टिसंसृष्टिसुखं तदुपस्थेन्द्रियवृत्ति॥ २८॥

बुद्ध्यहङ्कारमनसां का वृत्तिरित्याह—

स्वालक्षण्यं वृत्तिस्त्रयस्य सैषा भवत्यसामान्या।
सामान्यकरणवृत्तिः प्राणाद्या वायवः पञ्च॥ २९॥

स्वालक्षण्यं वृत्तिरित्यादि। स्वात्मीयं लक्षणं यस्य तत् स्वलक्षणम्। तस्य भावः स्वालक्षण्यम्। तदेव वृत्तिः। त्रयस्येति। बुद्ध्यहङ्कारमनसामित्यर्थः। अध्यवसायो बुद्धेः, अभिमानोऽहङ्कारस्य, सङ्कल्पो मनसः। त एवाध्यवसायाभिमानसङ्कल्पास्त्रयस्य वृत्तिः। एषां च बुद्ध्यादीनां त्रयोदशानां चतुर्विधा वृत्तिः, असामान्यायुगपत्क्रमश्चेति (?)॥ तत्रासामान्यां दर्शयितुमाह—सैषेति। येयमुक्ता वृत्तिः सैषा भवत्यसामान्या। या यस्य सा तस्यैव नान्येषामपीत्यर्थः। श्रोत्रस्य यच्छब्दप्रकाशनं तच्छ्रोत्रस्यैव, नान्येषां त्वगादीनां द्वादशानाम्। एवं सर्वत्र योज्यम्। सामान्यामाह—सामान्यकरणवृत्तिरिति। सामान्या चासौ करणवृत्तिश्चेति सामान्यकरणवृत्तिः। प्राणाद्या वायवः पञ्चेति। प्राण आद्या येषां वायूनां ते प्राणाद्याः। प्राणापानव्यानोदानसमाना इति पञ्च वायवः। तत्र प्राणो यो मुखनासिकाभ्यां निर्गच्छति। यो नाभेरधः स्थितः सोऽपानः। येन कायेऽग्निर्दीप्येत आहारं च पचति स समानः। यो नाभिदेशादुत्थितशिरोगतिर्नादं जनयति स उदानः। यः सर्वशरीरं[2] व्याप्य स्थितः स व्यानः। एते त्रयोदशानामपि करणानां सामान्यवृत्तिः॥ २९॥

करणप्रभाविकत्वाद् वायूनां युगपत्क्रमशो वृत्तिमाह—

युगपच्चतुष्टयस्य तु वृत्तिः क्रमशश्च निर्दिष्टा।
दृष्टे तथाप्यदृष्टे त्रयस्य तत्पूर्विका वृत्तिः॥ ३०॥

१. 'वचनादानादिवृत्तयः' इति ख०।
२. 'सर्वं शरीरं' इति ख०।

युगपदित्यादि। चतुष्टयस्य त्विति। तुशब्दो विशेषणार्थः। बुद्धिरहङ्कारो मनश्चक्षुरित्येतस्य चतुष्टयस्यैकस्मिन् रूपे युगपद्वृत्तिः। यथान्धकारे विद्युत्संपाते कृष्णसर्पसन्दर्शने युगपदालोचनाध्यवसायाभिमानसङ्कल्पनानि भवन्ति। तथा हि चक्षुषाऽऽलोचितं बुद्ध्याध्यवसितमहङ्कारेणात्मीकृतं मनसा सङ्कल्पितमिति। क्रमशश्च तस्येति। चतुष्टयस्य क्रमेण कदाचिद्वृत्तिरिष्टा। मन्दप्रकाशे स्थाणुपुरुषोचितामूर्ध्वतां दृष्टवतः किं स्थाणुः पुरुष इति विकल्पः। तत्राकुञ्चनप्रसारणात् पुरुष इत्यध्यवसायः। तत आत्मीकरणादभिमान[1] इति।

येयमुभयथावृत्तिः सा कस्मिन्[2] विषय इत्याह—दृष्ट इति। अदृष्टे तर्हि नास्तीत्याह—तथाप्यदृष्ट इति। तथा अदृष्टे[3] दृष्टेऽपि वृत्तिः। किन्तु न चतुष्टयस्य तर्हीत्याह—त्रयस्येति। बुद्ध्यहङ्कारमनसामित्यर्थः। तत्रापि तत्पूर्विका[4] श्रोत्रादिपूर्विकेत्यर्थः। तथा स्मर्तव्यमनुस्मरतः सङ्कल्पाभिमानाध्यवसाया भवन्ति॥ ३०॥

अथ यदेतच्चतुष्टयं तत्किं युगपत् परस्परसव्यपेक्षं स्वां स्वां वृत्तिं प्रतिपद्यते किं वा निरपेक्षमित्याह—

स्वां स्वां प्रतिपद्यन्ते परस्पराकूतहैतुकीं वृत्तिम्।
पुरुषार्थ एव हेतुर्न केनचित् कार्यते करणम्॥ ३१॥

स्वां स्वामित्यादि। आत्मीयामात्मीयां वृत्तिम्। परस्पराकूतहैतुकीमिति। परस्परस्य यदाकूतं स्ववृत्तिभोगस्तदेव हेतुः। तत्र भूतां परस्पराकूतहैतुकीं वृत्तिं चत्वारि करणानि प्रतिपद्यन्ते। तत्र चक्षुर्बुद्ध्यादित्रयस्याकूतं ज्ञात्वा प्रकाशनं प्रतिपद्यते। एवं बुद्धिरहङ्कारो मनश्च त्रयाणामाकूतं ज्ञात्वा बुद्ध्यध्यवसाय[5]मभिमानं सङ्कल्पनं च प्रतिपद्यन्ते। क्रमशश्च परस्पराकूतहैतुकीम्। किन्तु पूर्वपूर्वहैतुकी द्रष्टव्या। यथा कस्यचिदुपनिमन्त्रणं श्रुतवतः श्रोत्रवृत्तिं ज्ञात्वा, बुद्धिर्गमनायाध्यवसिता। तद्वृत्तिं ज्ञात्वाऽहङ्कारो मोदकानहं भक्षयिष्यामीति

१. '०करणमभिमान' इति ख०।
२. 'तस्मिन्' इति ख०।
३. अत्र क० पुस्तके पाठस्त्रुटितः।
४. 'तत्पूर्वका' इति ख० पुस्तकपाठो मूलविरोधादसङ्गतः।
५. 'ज्ञात्वाऽध्यवसाय' इति क०, 'ज्ञात्वा बुद्ध्यवसाय'. इति च ख०। उपरिष्टान्निर्दिष्टपाठस्तु सङ्गत्यनुरोधेन मयैव कल्पितः।

मन्यते। तद्वृत्तिं ज्ञात्वा मनः, प्रचुरं घृतं प्रापयिष्यामीति किं स्तोकमिति, सङ्कल्पयतीति। एवं बाह्यान्यपि करणानि स्वां स्वां वृतिं परस्पराकृतहैतुकीं प्रतिपद्यन्ते। एतानि[1] किमात्मार्थं स्वां स्वां वृत्तिं प्रतिपद्यन्ते, किमन्यार्थमित्याह—पुरुषार्थ एव हेतुरिति। पुरुषस्यार्थो विषयोपभोगः कैवल्यं च स वृत्तिहेतुः। नन्वीश्वरः कर्ता जगतः, स एव बुद्ध्यादिकलापं सृष्टवान्[2] येन पुरुषस्यार्थः सम्पद्यते। तथा चोक्तम्—

'ईश्वरप्रेरितो गच्छेत्स्वर्गं वा श्वभ्रमेव वा' ॥ इति ॥

(महा० भा० ३।३१।२७)

तत्राह—न केनचित्कार्यते करणमिति। प्रधानव्यतिरेकेण न कश्चिद् बुद्ध्यादिकरणं स्वां स्वां वृतिं कारयतीत्यर्थः। यदि कर्ता स्यात्, किमिति प्रकृतिमपेक्षते। नापि सेश्वरवादिना प्रकृतिरभ्युपगतैव; निश्चेतनत्वात्। प्रकृतेः सचेतनोऽधिष्ठाता कर्ताऽपरो गवेष्यत इति चेत् पुरुष एवाधिष्ठाता। अचेतना प्रकृतिः। एतदुक्तमेव प्राक्॥ ३१ ॥

कतिविधमन्तःकरणमित्याह—

करणं त्रयोदशविधं तदाहरणधारणप्रकाशकरम्।
कार्यं च तस्य दशधा हार्यं धार्यं प्रकाश्यं च ॥ ३२ ॥

करणं त्रयोदशविधमित्यादि। पञ्च बुद्धीन्द्रियाणि, पञ्च कर्मेन्द्रियाणि, बुद्ध्यहङ्कारमनांसि च त्रीणि एतत् त्रयोदशविधम्। करणं करोतीति, 'कृत्यल्युटो बहुलम्' (पा० ३।३।११३) इति कर्तरि ल्युट्। तत्र[3] तस्य[4] का क्रिया यदपेक्षया करणमित्याह—तदाहरणधारणप्रकाशकमिति। तत्करणमाहरणादीनि करोतीति। तत्र कर्मेन्द्रियाण्याहरणं कुर्वन्ति, बुद्ध्यहङ्कारमनांसि धारणम्, बुद्धीन्द्रियाणि प्रकाशमिति। किं तत्कार्यं यस्याहरणं कुर्वन्तीत्याह—कार्यमिति। तस्य करणस्य दशविधम् कार्यम्[5]। तत्र शब्दस्पर्शरूपरसगन्धाः पञ्च, वचनादानविहरणोत्सर्गानन्दाः पञ्चेति दशधा। पूर्वे द्विविधाः—सूक्ष्मास्तन्मात्रलक्षणाः सुखैकस्वभावत्वाद्दिव्या, स्थूला आकाशादयः सुखदुःखमोहा-

१. 'इत्यकानि' इति ख०।

२. 'जगत् स एव बुद्ध्यादि कलापं सृष्टं' इति ख० पुस्तकपाठोऽसङ्गतः।

३. 'तत्र' इति ख० पुस्तके नास्ति।

४. 'कस्य' इति क०।

५. 'यस्याहरणं' इत्यारभ्य 'कार्यं' इत्यन्तं ख० पुस्तके नास्ति।

त्मकत्वाददिव्या[1] इति। एतत्कार्यं बुद्धीन्द्रियाणां प्रकाश्यम्। वागादीनामुक्तयादानादिकर्मकर्तृत्वात् कार्यम्। तत्र वाचा शब्दस्य, पाणिभ्यामादेयस्याह्रियमाणत्वादुभयमप्याहार्यम्। विहार्यं विहरणस्थानम् पूर्वावयवन्यासेनोत्तरावयवाक्रमणेन च पादाभ्यामाह्रियमाणत्वादाहार्यम्[3]। अन्यथा कथमुत्सर्गानन्दौ स्याताम्। उभयमपि कर्मेन्द्रियाविषयम्। बुद्ध्यहङ्कारमनसां धार्यम्, तैरन्तः स्ववृत्त्यावधार्यमाणत्वात्[4] ॥३२॥

तदेव त्रयोदशविधं करणं बाह्यान्तरभेदाद् द्विविधमिति दर्शयन्नाह—

अन्तःकरणं त्रिविधं दशधा बाह्यं त्रयस्य विषयाख्यम्।
साम्प्रतकालं बाह्यं त्रिकालमाभ्यन्तरं करणम् ॥ ३३ ॥

अन्तःकरणमित्यादि। करणं द्विविधम्[5]—बाह्यमाभ्यन्तरं च। तत्र शरीरस्यान्तःस्थितत्वादन्तःकरणं त्रिविधम्—बुद्धिरहङ्कारो मनश्चेति। दशधा बाह्यमिति। दशप्रकारम्[6]—पञ्च बुद्धीन्द्रियाणि, पञ्च कर्मेन्द्रियाणि। तद्बुद्धिर्भवति। तद् बाह्यं—त्रयस्य विषयाख्यमिति। त्र्यवयवस्यान्तःकरणस्य बाह्यं विषय इत्याख्यायते; तद्द्वारेण विषयावगाहनात्। तेनान्तःकरणस्य द्विविधो विषयः—द्वारं भोग्यं चेति। चतुष्टयस्य दृष्टे वर्तमाने[7] त्रयस्यादृष्टे वृत्तिरुक्ता। तत्रातीतानागतयोरपि विषययोः किं वृत्तिरस्ति, नेत्याह—साम्प्रतकालं[8] बाह्यमिति। कल्यत[9] इति कालः[10],

१. '०कत्वाद् दिव्या' इति सर्वपुस्तकपाठः। उपरिष्टादुपन्यस्तः पाठस्तु क० सम्पादकमहाशयैः कल्पितः। स सङ्गतत्वादस्माभिरपि अङ्गीकृतः।

२. '०हायमान०' इति सर्वपुस्तकपाठः। अत्रापि क० सम्पादकस्य संशोधनमेवाभिनन्द्यतेऽतीव संगतत्वात्।

३. 'आहार्यं' इति ख० पुस्तके नास्ति।

४. 'अन्यथा' इत्यादिः '०माणत्वात्' इत्यन्तः पाठः ख० पुस्तके नोपलभ्यते।

५. 'इति दर्शयन्नाह' इत्यारभ्य 'द्विविधम्' इत्यन्तं ख० पुस्तके नास्ति। मन्ये तल्लिपिकरप्रमादादेव पतितम्।

६. 'शब्दप्रकारम्' इति ख० पुस्तकपाठस्त्वसमीचीन एव।

७. दृष्टेवर्तमाने' इति क०।

८. '०तमान्त' इति ख० पाठस्तु मूलविरोधी।

९. 'कल्प्यत' इति ख०।

१०. 'काले' इति ख०।

विषय एवातीतोऽनागतो वर्तमानश्चोच्यते। न तद्व्यतिरेकेण कालोऽस्ति। मा भूत् षड्विंशतितत्त्वप्रसङ्ग इति तत्र साम्प्रतो वर्तमानः कालो यस्य बाह्यस्य तद्धि बाह्यम्। श्रोत्रादि वर्तमानमेव शब्दादिकं प्रकाशयति, नातीतानागते वागादि च वर्तमानमेवोक्त्यादानविहरणोत्सर्गानन्दान् करोति, नातीतानागतान्। त्रिकालमाभ्यन्तरमिति। त्रयः काला यस्य तत् त्रिकालम्। यथा बुद्धिर्वर्तमानमध्यवस्यति तथातीतानागतावपि। 'मान्धातासीत्', 'कल्की राजा भविष्यतीति'। यथाहङ्कारो वर्तमानमभिमन्यते तथातीतानागतावपि। 'ममैवमासीत्', 'ममैव भविष्यतीति'। यथा च मनो वर्तमानं सङ्कल्पयतीति तथातीतानागतावपि। तत्र किमिदं भूतं स्यात्, न ममेति। किमिदं भविष्यति, नेतीति॥ ३३॥

ननु च यदि स्थूलाः पृथिव्यादयस्ते विशेषाः। बाह्यं बाह्यकरणं स्वविषयं प्रतिपद्यते। पृथिव्यादयस्तर्हि भेदेन प्रतिपत्तव्या इत्याह—

बुद्धीन्द्रियाणि तेषां पञ्च विशेषाविशेषविषयीणि।
वाग्भवति शब्दविषया शेषाणि तु पञ्चविषयीणि॥ ३४॥

बुद्धीन्द्रियाणीत्यादि। तेषामपि त्रयोदशानां करणानां[2] यानि पञ्च बुद्धीन्द्रियाणि, तानि विशेषाविशेषविषयीणि। शब्दादयः पञ्च विषया द्विविधाः—विशेषा अविशेषाश्च। तत्र ये सूक्ष्मास्तन्मात्रलक्षणास्तेऽविशेषाः। ये स्थूलाः पृथिव्यादयस्ते विशेषाः। विशेषाश्चाविशेषाश्चेति द्वन्द्वः। त एव विषया[3] विद्यन्ते येषामिति मत्वर्थीयः। विशिष्टानविशिष्टांश्च[4] विषयान् गृह्णन्तीत्यर्थः[5]। तत्र श्रोत्रं स्थूलान् नानाशब्दानविकलान् गृह्णाति[6], शब्दतन्मात्रं च। नासिका स्थूलान् सुरभ्यादिगन्धान्, तन्मात्रं च गृह्णातीति[7]॥

वाग्भवति। केवलः शब्दो विषयो यस्याः, न विषयान्तरमित्यर्थः। शेषाणि पाण्यादीनि चत्वारि, पञ्चविषयीणि। पञ्च विषया एषामिति।

१. 'यथाबुद्धि वर्त०' इति ख०।
२. 'करणानि' इति ख०।
३. 'विशेषा' इति ख०।
४. 'विशिष्टा न विशिष्टांश्च' इति ख०।
५. 'गृह्णाती०' इति सर्वपुस्तकपाठः।
६. 'गृह्णातीति' इति ख०।
७. 'शब्दतन्मात्रं' इत्यारभ्य 'गृह्णातीति' इत्यन्तं ख० पुस्तके न विद्यते।

तत्र पाणिः शब्दस्पर्शरूपरसवन्तं घटादिकमादत्ते। पादौ श भूमौ विहरतः। पायुरुपस्थश्च शब्दादिमदेव मलं शुक्रं च विसृजतः। अनेन द्वारेण तु सर्वं बाह्य करण पञ्चविषयमेव द्रष्टव्यम्। यं हि यदेवमाश्रित्य स्फीतं तस्य शब्दस्पर्शरूपरसगन्धवत्त्वात्, 'बाह्यं त्रयस्य विषयाख्यम्' इत्युक्तम्॥ ३४॥

तत्कथं तस्य विषय इत्याह—

सान्तःकरणा बुद्धिः सर्वं विषयमवगाहते यस्मात्।
तस्मात् त्रिविधं करणं द्वारि द्वाराणि शेषाणि॥ ३५॥

सान्तःकरणेत्यादि। बुद्धेरुपात्तत्वाच्छेषमहङ्कारो मनश्चान्तःकरणम्। ताभ्यां युक्ता बुद्धिः। सर्वमिति। त्रिष्वपि कालेषु[1] व्यवस्थितं विषयमवगाहते गृह्णाति यस्मात्, तस्मात् त्रिविधमन्तःकरणं बुद्ध्यादि द्वारि भवति[2]। द्वाराण्यस्य सन्तीति कृत्वा। शेषाणि तु बुद्धीन्द्रियकर्मेन्द्रियाणि द्वाराणि। एभिर्द्वारभूतैरन्तःकरणं विषयान् गृह्णाति। ३५॥

ननु च यद्यन्तःकरणं बाह्यकरणद्वारेण सर्वं विषयमवगाहते, तस्मिन् किं लक्षणमित्याह—

एते प्रदीपकल्पाः परस्परविलक्षणा गुणविशेषाः।
कृत्स्नं पुरुषस्यार्थं प्रकाश्य बुद्धौ प्रयच्छन्ति॥ ३६॥

एत इत्यादि। श्रोत्रादयो वागादयो बुद्ध्यादयश्चेत्येते त्रयोदश गुणविशेषाः, त्रय एव गुणा अन्योऽन्याभिभवद्वारेण परिणताः श्रोत्रादिव्यपदेशभाज इत्यर्थः। प्रदीपकल्पाः, स्ववृत्त्या विषयस्य प्रकाशकत्वात्। परस्परविलक्षणाः। एकस्य या वृत्तिः स्वरूपं च, न तदितरेषामपि यदि स्यादेतेनैव विषयावगाहनं सिद्ध किमन्येन। कृत्स्नमिति। त्रैलोक्यगतं पुरुषस्यार्थं सूक्ष्मस्थूलविषयलक्षणं प्रकाश्याभिव्यक्तिं[3] नीत्वा पश्चादहङ्कारादयो द्वादश बुद्धौ प्रयच्छन्ति स्थापयन्तीत्यर्थः। अवगाहनफलमेतत्। तस्यां च विषयोपधानोपरक्तायां बुद्धौ पुरुष उपलभते। तत्रेदमुच्यते—बुद्ध्याध्यवसितमर्थं पुरुषश्चेतयत इति॥ ३६॥

१. 'कालेष्वपि' इति ख०।
२. 'द्वारीभवति' इति ख०।
३. 'प्राकाश्यादिव्यक्तिं' इति ख०।

ननु च तुल्ये करणत्वे किमित्यहङ्कारादयो बुद्धौ प्रयच्छन्ति । प्राधान्यात्तदेव दर्शयन्नाह—

सर्वं प्रत्युपभोगं यस्मात्पुरुषस्य साधयति बुद्धिः ।
सैव च विशिनष्टि पुनः प्रधानपुरुषान्तरं सूक्ष्मम् ॥ ३७ ॥

सर्वमित्यादि । उपभोगमुपभोगं प्रति प्रत्युपभोगम् । देवमनुष्यतिर्यग्योनिषु यो विषयस्योपभोगस्तं प्रति सर्वत्रैलोक्यगतविषयं पुरुषस्य साधयति, सम्पादयति । यस्माद् बुद्धिः प्रधानभूता सती नान्यः कश्चित्, तस्मात् तानि[2] करणानि बुद्धौ प्रयच्छन्ति । यथा ग्रामे हिरण्यादिभृत्यर्थं कुटुम्बिनः प्रधानाय प्रयच्छन्ति[3] । प्रधानोऽप्यासन्नवर्तित्वाद् भोगपतय इति । सैव च विशिनष्टीति । यदा तमस्वती बुद्धिर्भवति तदा सर्वमुपनीतं सम्पादयति । यदा सत्त्वाधिका बुद्धिर्भवति, तदा ज्ञानसङ्गता प्रधानपुरुषान्तरं विशिनष्टि । प्रधानपुरुषयोर्विभागं करोतीत्यर्थः । अन्यत् प्रधानमन्यः पुरुष इति ॥

सूक्ष्मम् । सांसारिकज्ञानस्याविषयत्वात् ॥ ३७ ॥

विशेषाविशेषविषयिणीत्युक्तम्, तत्र के विशेषाः केऽविशेषाश्चेत्याह—

तन्मात्राण्यविशेषास्तेभ्यो भूतानि पञ्च पञ्चभ्यः ।
एते स्मृता विशेषाः शान्ता घोराश्च मूढाश्च ॥ ३८ ॥

तन्मात्राणीत्यादि । सूक्ष्मविषयास्तन्मात्राणीत्युच्यन्ते । तैर्न कश्चिद्विशिष्यत इत्यविशेषाः । यथा सूक्ष्मतृणाग्रावस्थितं तेजो न लक्ष्यते, न च किञ्चित् प्रकाशयति, तद्वत् तेऽप्यविशेषाः ॥

तेभ्यो भूतानि पञ्च पञ्चभ्य इति । तन्मात्रेभ्यः पञ्च महाभूतान्युत्पद्यन्ते । एते स्मृता विशेषा इति । शब्दतन्मात्रादेकगुणमाकाशमुत्पद्यते । एवं स्पर्शादितन्मात्राद् द्वित्रिचतुःपञ्चगुणा वाय्वादय उत्पद्यन्ते[4] । तैश्च तन्मात्राणि । विशिष्यन्त इति विशेषाः ॥

१. 'सर्वं त्रैलोक्य०' इति क० ।
२. 'कानि' इति ख० ।
३. 'यथा ग्रामे' इत्यारभ्य 'प्रयच्छन्ति' इत्यन्तं ख० पुस्तके नास्ति ।
४. 'एवम्' इत्यादिः 'उत्पद्यन्ते' इत्यन्तः पाठः ख० पुस्तके नास्ति ।

ते च किंस्वरूपा इत्याह—शान्ता घोराश्च मूढाश्चेति । शान्ताः सुखप्रदाः, घोरा दुःखप्रदाः, मूढा मोहप्रदा इति ॥ ३८ ॥

किमेतावन्त एव विशेषा उतान्येऽपीत्याह—

सूक्ष्मा मातापितृजाः सह प्रभूतैस्त्रिधा विशेषाः स्युः ।
सूक्ष्मास्तेषां नियता मातापितृजा निवर्तन्ते ॥ ३९ ॥

सूक्ष्मा इत्यादि । ये सूक्ष्मास्तन्मात्रलक्षणाः संसारिणः शरीरस्याश्रयतां गतास्तेऽपि विशेषास्तैः[1] सूक्ष्मशरीरस्यारब्धत्वात् ॥

मातापितृजा इति । मातापितृजाः षट् । तत्र मातृतो लोमलोहितमांसानि, पितृतः स्नाय्वस्थिमज्जानः । तेऽपि विशेषाः, तैः स्थूलशरीरस्य षट्कोशिकस्यारब्धत्वात् । एते द्विविधा विशेषा आध्यात्मिकाः ॥

सहप्रभूतैरिति । यानि महाभूतानि बाह्यानि शान्तघोरमूढान्युक्तानि, तानि स्थूलशरीरस्यावकाशव्यूहनपक्तिक्लेदनधारणकर्तृत्वेन प्रकृष्टभूतान्युच्यन्ते । तैः सह त्रयो विशेषाः ॥

सूक्ष्मास्तेषां नियता मातापितृजा निवर्तन्त इति । सूक्ष्मशरीरनियतं ज्ञानप्राप्तेः प्राक्; तस्य सांसारिकत्वात् । स्थूलशरीरनियतं[2] तु निवर्तते; तस्य प्रतिमरण पतितस्य रसभस्मनिष्ठान्तत्वात् ॥ ३९ ॥

यदेतत् सूक्ष्मशरीरं तत्कथमुत्पन्नमित्याह—

पूर्वोत्पन्नमसक्तं नियतम्महदादिसूक्ष्मपर्यन्तम् ।
संसरति निरुपभोगं भावैरधिवासितं लिङ्गम् ॥ ४० ॥

पूर्वोत्पन्नमित्यादि । प्रधानेनादिसर्गे प्रतिपुरुषमुत्पादितत्वात् पूर्वोत्पन्नम् । असक्तमप्याह । तन्न क्वचिद् विहन्यते, पर्वतमपि भित्त्वा[3] गच्छति । 'नियतम्' नित्यम्, ज्ञानोत्पत्तेः प्रागित्यर्थः । किं परिमाणमिदमित्याह—महदादिसूक्ष्मपर्यन्तमिति । बुद्धिरादिर्यस्य तत्, महदादिसूक्ष्मविषयास्तन्मात्रलक्षणाः पर्यन्तं यस्य तत् सूक्ष्मपर्यन्तम् । बुद्धिरहङ्कार एकादशेन्द्रियाणि पञ्च तन्मात्राणीत्येतत्परिमाणमित्यर्थः । संसरति त्रिषु लोकेषु ॥

१. क० पुस्तके 'तैः' इति नास्ति ।
२. 'स्थूलशरीरं' इति ख० ।
३. 'भूत्वा' इति ख० ।

निरुपभोगमिति । बाह्येन स्थूलशरीरेण विकलत्वाद् विषयभोगसमर्थं न[1] भवतीत्यर्थः । भावैरधिवासितमिति । धर्मादिभिरुपरक्तमित्यर्थः । लिङ्गमिति । प्रलयकाले लयं गच्छतीति कृत्वा ॥ ४० ॥

ननु करणमात्रमेव संसरति, किं सूक्ष्मशरीरेणेत्याह—

चित्रं यथाश्रयमृते स्थाण्वादिभ्यो विना यथा छाया ।
तद्वद्विनाऽविशेषैर्न तिष्ठति निराश्रयं लिङ्गम् ॥ ४१ ॥

चित्रमित्यादि । यथा कुड्यादिकमाश्रयमृते चित्रं न तिष्ठति ॥

स्थाण्वादिभ्य इति । आदिशब्देन वृक्षस्तम्भादयः । 'पृथग्विनानानाभिस्तृतीयाऽन्यतरस्याम्' (पा० २।३।३२) इति पञ्चम्यपि भवति । तैर्विना यथा छाया स्निग्धा परुषा वा न तिष्ठति । तद्वद्विनाऽविशेषैर्न तिष्ठति निराश्रयं लिङ्गमिति । अविशेषास्तन्मात्राणि । लिङ्गं त्रयोदशविधं करणमिह गृह्यते । न तिष्ठति निराश्रयत्वात् । तैर्हि सूक्ष्मशरीरमारब्धम्, तदभावात्तदपि नास्तीति निराश्रयत्वात्[2] न संसरति । न च निराधारेण करणेन पुरुषस्य संयोगः सम्भवति । पुरुषोऽपि निष्क्रियत्वान्न संसरति ॥ ४१ ॥

तदेव सूक्ष्मशरीरं किमर्थं संसरतीत्याह—

पुरुषार्थहेतुकमिदं निमित्तनैमित्तिकप्रसङ्गेन ।
प्रकृतेर्विभुत्वयोगान्नटवद्व्यवतिष्ठते लिङ्गम् ॥ ४२ ॥

पुरुषार्थहेतुकमित्यादि । पुरुषार्थो द्विविध उक्तः । स हेतुर्यस्येति । समासान्तः कप् । इदमिति । महदादि सूक्ष्मपर्यन्तं लिङ्गमुक्तम्, तन्नटवदवतिष्ठते । यथैक एव नटस्तं तं विशेषमास्थाय यवनिकातो निर्गत्य राजामात्यविदूषकादिभावेनानुविद्धोऽवतिष्ठते, तथा लिङ्गमपि तं तं देहम्[3] आस्थाय देवमनुष्यतिर्यग्भावेन व्यवतिष्ठते ॥

तदेव कथं[4] भवतीत्याह—निमित्तनैमित्तिकप्रसङ्गेनेति । निमित्तं धर्माधर्मादि, नैमित्तिकमूर्ध्वाधोगमनादि । वक्ष्यति च 'तयोः प्रसङ्गेन' इति ॥

१. 'न' इति ख० पुस्तके नास्ति ।
२. 'तैर्हि' इत्यादिः 'निराश्रयत्वात्' इत्यन्तः पाठः ख० पुस्तके नास्ति ।
३. 'स्थूलदेह' इति ख० ।
४. 'तथा' इति ख० ।

किमेतत् सर्वमीश्वरात् किं वा स्वभावादित्यत्राह—प्रकृतेर्विभुत्वयोगादिति । प्रकृतिः प्रधानम्, तस्या विभुत्वं जगत्कर्तृत्वम् । तद्योगात् नटवद्व्यवतिष्ठते । प्रधानेनैव हि पुरुषस्यार्थः कर्तव्य इति महदादिसूक्ष्मपर्यन्तं लिङ्गमुत्पाद्य धर्मादिभिरधिवासयति । तदधिवासितं च नटवद्[1] व्यवतिष्ठते । नेश्वरान्न स्वभावादिति भावैरधिवासितमित्युक्तम् ॥ ४२ ॥

ते पुनः कियन्तः किमाश्रिता इत्याह—

सांसिद्धिकाश्च भावाः प्राकृतिका वैकृताश्च धर्माद्याः ।
दृष्टाः करणाश्रयिणः कार्याश्रयिणश्च कललाद्याः ॥४३॥

सांसिद्धिकाश्चेत्यादि । ये प्राकृतस्वभावास्ते सांसिद्धिका उच्यन्ते । ते च कपिलस्यैव महामुनेर्नान्यस्य । तस्य ह्युत्पद्यमानस्यैवादिसर्गे सहोत्पन्ना धर्मज्ञानवैराग्यैश्वर्यसंज्ञकाश्चत्वारो भावाः । ये त्वादिसर्गादुत्तरकालमुत्पन्नकार्यकारणानामस्मद्विधानां प्रयत्नपूर्वका उत्पद्यन्ते, ते वैकृताः । ते च द्विविधाः । यदाह—धर्माद्या दृष्टाः करणाश्रयिणः कार्याश्रयिणश्च कललाद्या इति । धर्मादयश्चत्वारः, विपरीताश्चाधर्मादयश्चत्वार इत्यष्टौ । एते त्रयोदशविधं करणमाश्रित्य प्रवर्तन्ते । पञ्च (कार्यं ?), कुक्षिस्थस्यास्य निच्छुरितस्य तु कौमारयौवनवार्धकानि यत्रः, इत्यष्टौ भावाः । तत्र वैकृते धर्मादिभिरधिवासितं संसरतीति ज्ञेयम् ॥ ४३ ॥

निमित्तनैमित्तिकप्रसङ्गेनेत्युक्तम् । तदुभयमपि दर्शयितुमाह—

धर्मेण गमनमूर्ध्वं गमनमधस्ताद्भवत्यधर्मेण ।
ज्ञानेन चापवर्गो विपर्ययादिष्यते बन्धः ॥ ४४ ॥

धर्मेणेत्यादि । धर्मादिनिमित्तमूर्ध्वंगमनादि नैमित्तिकम् । तत्र धर्मेण यमनियमलक्षणेन गमनमूर्ध्वमिति सूक्ष्मशरीरस्य देवादिव्यवस्थितिरित्यर्थः । गमनमधस्ताद्भवत्यधर्मेणेति । तिर्यग्योनिषु स्थितिः । मिश्रान्मनुष्यलोके स्थितिरित्यर्थोक्तम् । ज्ञानेन चापवर्ग इति । प्रधानपुरुषान्तरज्ञानाख्येन ज्ञानेन लिङ्गं निवर्तते । ततः केवलः पुरुषो भवति ॥

१. 'त्वनटवद्' इति ख० ।

विपर्ययादिष्यते बन्ध इति । ज्ञानविपर्ययादज्ञानात् संसारचक्रबन्धः, पुनः पुनरावर्तनम् । स च त्रिप्रकारः—प्रकृतिबन्धः, दक्षिणाबन्धः, विकारबन्धश्चेति । येषां प्रकृतिरेव परतत्त्वं नान्यत्, तेषां प्रकृतिवादिनां प्राकृतिको बन्धः । येषामिष्टापूर्तभाविन एव दिव्यादिव्यमानुषभोगाः पुरुषार्थ इति, तेषां कर्मवादिनां दक्षिणाबन्धः । इष्टापूर्तं दक्षिणेति । तथा चोक्तम्—

'अग्निहोत्रं तपः सत्यं देवानां परिपालनम् ।
अतिथिर्वैश्वदेवं च इष्टमित्यभिधीयते ॥
पुष्करिण्यः सभा वाप्यो देवतायतनानि च ।
अन्नप्रदानमारामः पूर्तमित्यभिधीयते ॥'

येषां[2] विकार एवैश्वर्यलक्षणः पुरुषार्थ इति, तेषां विकारत्ववादिनां वैकारिको बन्धः ॥ ४४ ॥

वैराग्यात् प्रकृतिलयः संसारो भवति राजसाद् रागात् ।
ऐश्वर्यादविघातो विपर्ययात्तद्विपर्यासः ॥ ४५ ॥

वैराग्यादित्यादि । यो विषयादिदर्शनाद्विरक्तो यमनियमपरिस्थितो न ज्ञानं पर्येषते, तस्य मृतस्य वैराग्यादष्टासु प्रकृतिषु प्रधानादितन्मात्रपर्यन्तासु लयः, न[3] स्थूलशरीरेण विषयोपभोगनिमित्तेन योगः । तल्लीनश्चात्मानं मुक्तमिव मन्यते न तु मुक्तम्; सर्गकाले पुनः संसरणात् । यदा तु ज्ञानं पर्येष्यते तदा तु[4] मुच्यत एव । तथा चोक्तम्—

'ज्ञानादथ विरागाच्च तथा कृत्स्नस्य सक्षयात् ।
इत्येवं जायते मोक्षो मुक्त आत्मस्थ उच्यते ॥' इति ॥

संसारो भवति राजसाद्रागादिति । वैराग्यविषयोऽशुभविषयाभिष्वङ्गो राजसो रागः; तस्य शुभाशुभकर्माक्षेपकत्वात् । तस्माद्देवादि-

1. 'पुनः' इत्यारभ्य 'प्रकृतिबन्धः' इत्यन्तं ख० पुस्तके नास्ति । लिपिकरप्रमादजन्य एष पाठलोप इत्यनुमीयते ।
2. 'एषां' इति सर्वपुस्तकपाठः । क० संपादकमहोदयानां संशोधनानुसारी पाठ एवोपरिष्टादुपन्यस्तः ।
3. 'न' इति नास्ति क० पुस्तके ।
4. 'तु' इति नास्ति क० पुस्तके ।

ष्वयं जनाद्यजिभावेन (?) संसरति । ऐश्वर्यादविघात इति । अनैश्वर्यात्तद्विपर्यास इति । अविघातविपर्यासो विघातः, प्रार्थितानामप्राप्तिरित्यर्थः । मुक्तिस्तु दूरोत्सारितैव ॥ ४५ ॥

एषामष्टानां बुद्धिरूपाणामेकेन मोक्षः सप्तभिर्बन्धः संसार इति यदेतन्निमित्तनैमित्तिकं[1] षोडशमुक्तं तत्संक्षेपेण चतुर्विधमाह—

एष प्रत्ययसर्गो विपर्ययाशक्तितुष्टिसिद्ध्याख्यः ।
गुणवैषम्यविमर्देन तस्य भेदास्तु पञ्चाशत् ॥ ४६ ॥

एष इत्यादि । प्रत्ययशब्देन बुद्धिरुच्यते । तस्य सर्गो यः षोडशविध उक्तः, एष विपर्ययाशक्तितुष्टिसिद्ध्याख्यः । विपर्ययादीनामाख्या यस्य प्रत्ययसर्गस्य स तथोक्तः । तत्र विपर्ययमज्ञानम्, अशक्तिर्ज्ञानाधिगमासामर्थ्यं सत्यामप्यधिजिगांसायाम्[2], तुष्टिर्मोक्षोपायेषु वैमुख्यम्, सिद्धिर्ज्ञानप्राप्तिः ।

तस्य चतुर्विधस्य पुनः पञ्चाशद् भेदा भवन्ति । केन प्रकारेणेत्याह—गुणवैषम्यविमर्देनेत्यादि । सत्त्वरजस्तमसामन्योऽन्याभिभवद्वारेण वैषम्यं विषमभावः, एकस्य द्वयोर्वाऽऽधिक्येऽन्यस्यानाधिक्यम् । एकद्वित्रियोगेन षड्विधं वैषम्यम् । तेन द्वयोर्विमर्दः परस्परक्षोभः । तेन हेतुना भवतीत्यर्थः ॥ ४६ ॥

तान् भेदान् दर्शयन्नाह—

पञ्च विपर्ययभेदा भवन्त्यशक्तिश्च करणवैकल्यात् ।
अष्टाविंशतिभेदा तुष्टिर्नवधाऽष्टधा सिद्धिः ॥ ४७ ॥

पञ्च विपर्ययभेदा इत्यादि । अज्ञानाख्यस्य सर्गस्य भेदाः पञ्च—तमो मोहो महामोहस्तामिस्रोऽन्धतामिस्रश्चेति । एत एव सांख्यप्रवचने क्लेशा उच्यन्ते 'अविद्यास्मितारागद्वेषाभिनिवेशाः (पञ्च) क्लेशाः' (पा.यो.सू. २।३)' इति । तत्राविद्याक्षेत्रमुत्तरेषाम् (द्र. पा.यो.सू. २.४.) । अशक्तिश्चेति । अशक्त्याख्यः सर्गः ॥

करणवैकल्यादिति । करणं बाह्यमाभ्यन्तरं च । तयोर्वैकल्यादष्टाविंशतिभेदा यस्या अशक्तेः सा भवतीति विभक्तिपरिणामेन योज्यम् ।

1. '०त्तिकत्वं' इति ख० ।
2. '०जिघांसायाम्' इति ख० ।

करणवैकल्यं च गुणवैषम्यविमर्देन भवति । तुष्टिर्नवधाऽष्टधा सिद्धिरिति । तुष्टिसर्गो नवप्रकारः, सिद्धिसर्गोऽष्टप्रकारो भवतीत्यर्थः । एतैः समुदायेन पञ्चाशद्भेदा इति ॥ ४७ ॥

तानवान्तरभेदसहितान् दर्शयन्नाह—

भेदस्तमसोऽष्टविधो मोहस्य च दशविधो महामोहः ।
तामिस्रोऽष्टादशधा तथा भवत्यन्धतामिस्रः ॥ ४८ ॥

भेदस्तमस इत्यादि । तम इत्यविद्योच्यते । सा चोत्तरेषां प्रसवभूमिः । सा च प्रकृतिः । तत्त्ववेदिनां सत्यपि वैराग्ये नापवर्ग इति; ज्ञानस्याभावात् । ततश्च तेषामष्टास्वेव प्रकृतिषु लयो भवतीति अष्टविधा अविद्या, विषयस्याष्टविधत्वात् । मोहस्य चेतिशब्देनाष्टविधो भेद इत्यनुवर्तते । मोह इत्यस्मितोच्यते । देवा अपि विनाशिनोऽपि, अष्टगुणमैश्वर्यमाश्रिता आत्मानमविनाशिनं मन्यन्ते । ततश्च तेषामष्टविधो मोहः, ऐश्वर्यस्याष्टविधत्वात् । दशविधो महामोह इति । सुखानुशयो रागो महामोह इत्युच्यते । स च दिव्यादिव्यविषयेषु वर्तमानो दशविधो भवति । तत्र सूक्ष्मास्तन्मात्रलक्षणाः पञ्च, सुखैकस्वभावत्वाद् दिव्याः । स्थूलाः पृथिव्यादयः पञ्च, सुखदुःखमोहात्मकत्वाददिव्याः । तामिस्रोऽष्टादशधेति । दुःखानुशयो द्वेषस्तामिस्र इत्युच्यते । स चाष्टगुणैश्वर्ये दशविधे च विषये प्रतिभवतीत्यष्टादशविधः । तथा भवत्यन्धतामिस्र इति । यथा तामिस्रोऽष्टादशधा तथाऽयमपीत्यर्थः । मरणत्रासोऽन्धतामिस्र उच्यते । स चाष्टगुणैश्वर्ये दशविधे विषय एव भवतीति । एवं द्विषष्टिभेदमज्ञानमुक्तम् ॥ ४८ ॥

अशक्तिः करणवैकल्यादित्युक्तम्, तस्या भेदान् दर्शयितुमाह—

एकादशेन्द्रियवधाः सह बुद्धिवधैरशक्तिरुपदिष्टा ।
सप्तदशधा च बुद्धेर्विपर्ययात्तुष्टिसिद्धीनाम् ॥ ४९ ॥

एकादशेत्यादि । एकादशानामिन्द्रियाणामेकादशैवोपघाताः । श्रोत्रचक्षुर्घ्राणानां बाधिर्यान्धत्वाघ्रातृत्वानि, वाचो मूकत्वम्[1], जिह्वाया जाड्यम्, मनस उन्मादः, पाणिपादोपस्थानां कौण्यपङ्गुत्वक्लैब्यानि, त्वगिन्द्रियस्य कुष्ठः, पायोरुदावर्त इति ।

१. 'वाचामुक्तत्वं' इति ख०

'बाधिर्यमान्ध्याघ्रातृत्वे मूकता जडता तथा ।
उन्मादकौण्यकुष्ठानि[1] क्लैब्यादावर्तपङ्गुताः ॥' इति ॥

एत इन्द्रियवधा अशक्तिरित्युपदिष्टाः साङ्ख्याचार्यैः ॥

सह बुद्धिवधैरिति । बुद्धेरपि वधा अशक्तिरुपदिष्टा । ते कियन्त इत्याह—सप्तदशधा च बुद्धेर्विपर्ययात्तुष्टिसिद्धीनामिति । तुष्टयो नव, सिद्धयश्चाष्टौ । वक्ष्यमाणाम्भसां ये विपर्ययास्ते सप्तदशविधा बुद्धेर्ज्ञेयाः[2] । एवमशक्तिरष्टाविंशतिभेदा यया कर्मस्वशक्तो भवति । ननु प्रत्ययसर्ग इत्युक्तम्; नायमिन्द्रियवधः प्रत्ययसर्गः किञ्चिदहङ्कारसर्ग इति सत्यम्, अहङ्कारस्य प्रत्ययसर्गत्वात् तत्सर्गोऽपि प्रत्ययसर्ग उच्यते । धर्मो वा प्रत्ययः सर्गः ॥ ४९ ॥

तुष्टिभेदानाह—

आध्यात्मिकाश्चतस्रः प्रकृत्युपादानकालभाग्याख्याः ।
बाह्या विषयोपरमात् पञ्च नव तुष्टयोऽभिमताः ॥ ५० ॥

आध्यात्मिका इत्यादिना । प्रकृत्यादीन्याख्या यासां तुष्टीनां तास्तथोक्ताः । तत्र प्रकृतिः प्रधानम् । सैव 'व्यक्तात्मना परिणम्य बन्धमोक्षौ कुरु'[4] इत्येतावन्मात्रोपदेशात् तुष्टो भवति यस्तस्य प्रकृत्याख्या तुष्टिरम्भ इत्युच्यते । उपादीयते प्राप्यते मोक्षोऽनेनेत्युपादानम् । प्रव्रज्यालिङ्गं चात्र दण्डादि । न प्रकृतिज्ञानमात्रेण मुक्तिः । 'उपादानेन चापरे' इत्यस्माद्द्वितीयादुपदेशादिहैव मुक्तिः प्राप्स्यते[5] इति परितुष्टः प्रव्रजितोऽयं तस्य द्वितीया उपादानाख्या तुष्टिः सलिलमुच्यते । कल्यते[6] इति कालः । महदादिसूक्ष्मपर्यन्तेन लिङ्गेन संसरताऽपरेण मोक्षो न प्रकृत्युपादानमात्रादिहैव जन्मनीति तस्मात् तृतीयादुपदेशात् तुष्टो यः कालापेक्षी स्थितस्तस्य तृतीया कालाख्या तुष्टिरोघ[7] इत्युच्यते । यस्यापरं भाग्य-

१. 'कुण्डानि' इति ख० । २. 'बुद्धेर्ये ज्ञेयाः' इति ख० ।
३. 'इष्ट०' इति ख० ।
४. 'कुरु' इत्यस्य स्थाने 'कुरुते' इति क० सम्पादककृतं संशोधनं व्यर्थं वाक्यसंगतेरभावात् ।
५. 'चेत्यपरे तस्मा०' इति ख० ।
६. 'कथ्यत' इति ख० पाठः प्रामादिक एव ।
७. '०रोघ' इति ख० ।

मस्ति तस्य मोक्षः, प्रकृत्युपादानकालमात्रेण न, कश्चिद्विपरीतभागधेयोऽस्तीति तस्माच्चतुर्थादुपदेशात् तुष्टो यो भाग्यापेक्षी स्थितस्तस्य चतुर्थी वृष्टिरित्युच्यते । एताश्चतस्र आत्मानमधिकृत्य भवन्तीत्याध्यात्मिकाः, आत्मना मोक्तव्यमिति कृत्वा । बाह्यविषयोपरमाच्चेति । शब्दादिभ्यो व्यावृत्तिरुपरमणं च[1] पञ्चधा भवति । आर्जनरक्षणक्षयसङ्गहिंसादोषदर्शनात् । तत्र विषयार्जने महद् दुःखं तदल्पविषयेभ्य इत्यार्जनदोषदर्शनान्निवृत्तस्य तुष्टिरियं पञ्चमी सुतारमित्युच्यते ॥

विषया आर्जितुं शक्याः, रक्षणं तु दुःखं बहुभिः तज्जन्यमानानां स्यादिति रक्षणदर्शनान्निवृत्तस्य तुष्टिरियं षष्ठी सुपारमित्युच्यते ॥

विषया आर्जितुं रक्षितुं क्षये च प्रतिविधातुं शक्याः, किन्तूपभुज्यमाना महतीमात्मशक्तिं[2] कुर्वन्ति, तदप्राप्तौ च महद् दुःखमिति सङ्गदोषदर्शनादुपरतस्याष्टमी तुष्टिरनुत्तमाम्भ इत्युच्यते । सर्वं शक्यं किन्त्वनुपहत्य भूतानि न भोगः सम्भवति । भूतोपघातान्महदनिष्टफलमिति हिंसादोषदर्शनादुपरतस्य तुष्टिरियं नवमी उत्तमाम्भ इत्युच्यते । एताः पञ्च विषयद्वारेणेति भवन्तीति बाह्याः । तत्पूर्विकाश्चाध्यात्मिकाः; विषये तत्परस्याध्यात्मिकतुष्ट्यसम्भवात् ॥

तत्र प्रकृत्युपादानकाला मोक्षोपाया इत्युपदिष्टमपि यो वैमुख्यान्न प्रतिपद्यते तस्याध्यात्मिकाश्चतस्रः, विषयोपरमाच्च बाह्याः पञ्चेति नव तुष्टयः । ता बुद्धिवधा इत्युच्यन्ते । तेषां शक्तेरन्तर्भवति (?) । तासां चतुष्षष्टीनां महत्प्रभृतयो विपर्ययेण संज्ञा । तदुभयमपि बुद्धावन्तर्भूतं तत्सर्गत्वात् ॥ ५० ॥

कतिभेदा[3] ज्ञानाज्ञानलक्षणा सिद्धिरित्याह—

ऊहः शब्दोऽध्ययनं दुःखविघातास्त्रयः सुहृत्प्राप्तिः ।
दानं च सिद्धयोऽष्टौ सिद्धेः पूर्वोऽङ्कुशस्त्रिविधः ॥५१॥

ऊहः शब्दोऽध्ययनमित्यादि । सिद्धिर्ज्ञानप्राप्तिः, तस्या भेदा उपायभेदात् । ऊह इति । जन्मान्तरसंस्कृतधियो यस्य बन्धमोक्षकारणमुत्प्रेक्षमाणस्य प्रधानपुरुषान्तरज्ञानमुत्पद्यते तस्य सिद्धिरूहहेतुका

१. 'च' इति क० पुस्तके नास्ति ।
२. मन्येऽत्र 'महतीमासक्तिं' इति पठनीयम् ।
३. ख० पुस्तके 'भेदा' इति नास्ति ।

प्रथमा तारमित्युच्यते । यस्य सांख्यशास्त्रपरं[1] मन्यदीयमाकर्ण्य तत्त्वज्ञानमुत्पद्यते, सा सिद्धिः शब्दहेतुका द्वितीया सुतारमित्युच्यते । यस्य शिष्याचार्यसम्बन्धेन सांख्यशास्त्रं शब्दतोऽर्थतश्चाधीत्य ज्ञानमुत्पद्यते, तस्याध्ययनहेतुका । अध्ययनेन हि तत्परिज्ञानात् । एषा तृतीया तारवि (?) इत्युच्यते । दुःखविघातकास्त्रय इति । योऽप्याध्यात्मिकेनाधिभौतिकेनाधिदैविकेन वा भावितस्तद्विघातार्थं ज्ञानं पर्येष्यति । ऊहेन शब्देनाध्ययनेन वा, तस्य तद्विघातहेतुकाः प्रमोदप्रमुदितमोदनाख्यास्तिस्रः; उपायस्य त्रित्वादिति । पूर्वा यास्तिस्रः सिद्धयस्ता न दुःखहेतुका इति बोद्धव्याः । सुहृत्प्राप्तिरिति । योऽधिगततत्त्वः सुहृदं प्राप्य ज्ञानमधिगच्छति, तस्य सुहृत्प्राप्तिपूर्विका । मित्रं हि स्नेहात् ज्ञानं प्रकाशयति । इयं सप्तमी रम्यकमित्युच्यते । दानं च सिद्धिहेतुः । दानेन ह्याराधितो ज्ञानी ज्ञानं प्रयच्छति । इयमष्टमी सदाप्रमुदितमित्युच्यते ॥

तद्विपरीता असिद्धयः । मन्दबुद्धित्वान्नोहते यस्तस्यानूहहेतुका असिद्धिः । यः शक्तोऽपि सांख्यशास्त्रं शृण्वन्नपि बुद्धिदौर्बल्यान्न बुद्ध्यति तस्य शब्दहेतुका असिद्धिः । बुद्धिदोष एवायम् । यस्य गुरुपूर्वकं नाध्ययनं बुद्धिदोषादेव तस्यानध्ययनहेतुका[2] असिद्धिः । न यत्र मित्रसंग्रहो न च दानमित्यष्टावसिद्धयो बुद्धिवधा अशक्तावन्तर्भूताः । तासां चासिद्धीनां मोषमुष्णामानोरमित्याद्याः (?) संज्ञाः । तदुभय बुद्धावन्तर्भूतं तत्सर्गत्वात् । सिद्धेः पूर्वो[3]ऽङ्कुशस्त्रिविध इति । तस्या अष्टविधायाः सिद्धेर्यः पूर्वो विपर्ययाशक्तितुष्ट्याख्यस्त्रिविध उक्तः सोऽङ्कुश इवेत्यङ्कुश उक्तः । तेन ह्यस्वतन्त्रीकृतो लोकः संसार[4]चक्रेऽवतिष्ठते । तत्र विपर्ययादिष्यते बन्ध इति वचनात् पञ्चविधमज्ञानमङ्कुशः । अशक्तिः[5] करणवैकल्यम्, ततोहि ज्ञाना[6]प्राप्तिरित्यङ्कुशः । तुष्टिरप्यङ्कुशः । तदा प्रकृत्युपादानकालभाग्या[7] मोक्षोपाय[8] इति, विषयो-

१. '०पाठ०' इति क० सम्पादकेन संशोधितः पाठः ।
२. 'तस्य नध्यान०' इति ख० ।
३. 'तत्सर्गत्वासिद्धेः पूर्वोक्तः' इति ख० ।
४. 'सोऽङ्कुश इवेत्यङ्कुश' इत्यारभ्य 'संसार०' इत्यन्तं ख० पुस्तके नास्ति ।
५. सर्वत्र 'अक्तिः' इति पाठः । उपरिष्टादुन्यस्तपाठस्तु क० सम्पादकमहाभागानां संशोधनानुसारम् ।
६. 'तानि ज्ञान०' इति ख० ।
७. '०भोग्या' इति ख० ।
८. 'मोक्षोपाया' इति क० ।

परमात्र मुक्त इत्येतावन्मात्रादुपदेशात्[1] तुष्टो न ज्ञानं पयष्यति । यदा तु पर्येष्यति तदाऽनङ्कुश इत्यर्थः । एते प्रत्ययसर्गभेदाः पञ्चाशत् पदार्थाः, अस्तित्वादयश्च दश । ते श। अस्यामेव[2] (?) सप्तत्यां निर्दिष्टाः । तथा चाह संग्रहकारः—

'अस्तित्वमेकत्वमथार्थवत्त्वं पारार्थ्यमन्यत्वमकर्तृभावः ।
योगो वियोगो बहवः पुमांसः स्थितिः शरीरस्य च शेषवृत्तिः ॥'
॥ इति ॥

एकत्वमर्थवत्त्वं पारार्थ्यं चेति प्रधानमधिकृत्योक्तम् । अन्यत्वमकर्तृत्वं बहुत्वं चेति पुरुषमधिकृत्य । अस्तित्वं योगो वियोगश्चेत्युभयमधिकृत्य । स्थितिमूलसूक्ष्म[3]मधिकृत्य । वक्ष्यति–'तिष्ठति संस्कारवशात्' इति । एते षष्टिः पदार्थाः, तदर्थं शास्त्रं षष्टितन्त्रमित्युच्यते ॥ ५१ ॥

पूर्वोत्पन्नं लिङ्गं भावैरधिवासितं संसरतीत्युक्तम्, तत्र किं भावा अपि पूर्वमुत्पन्नाः किं लिङ्गमेवेत्यत्राह—

न विना भावैर्लिङ्गं न विना लिङ्गेन भावनिष्पत्तिः ।
लिङ्गाख्यो भावाख्यस्तस्माद् द्विविधः प्रवर्तते सर्गः ॥५२॥

न विनेत्यादि । यदि भावा न पूर्वोत्पन्नास्तैर्विना लिङ्गमपि नास्ति । संसरणार्थं लिङ्गं संसारनिमित्तं च भावाः[4] । न विना लिङ्गेन भावनिष्पत्तिरिति । लिङ्गं विना न भावनिष्पत्तिः, लिङ्गाश्रितत्वाद्भावानाम् । यस्मादेवं तस्मात् लिङ्गाख्यो भावाख्यश्च द्विप्रकारः प्रधानत्वात् सर्गो भवतीति । सृज्यत इति सर्गः ॥ ५२ ॥

यथा[5] द्वावेतौ पूर्वोत्पन्नौ तथा भूतसर्गोऽपीति दर्शयन्नाह—

अष्टविकल्पो दैवस्तैर्यग्योन्यश्च पञ्चधा भवति ।
मानुष्यश्चैकविधः समासतो भौतिकः सर्गः ॥ ५३ ॥

१ '॰दुपभोगात्' इति ख० ।
२ 'ते चास्यामेव' इति क० संशोधितः पाठः ।
३. 'स्थितिर्मूलमूक्ष्म॰' इति क० ।
४. 'वाहाः' इति सर्वत्र पाठः । क० सम्पादककल्पितः पाठ एव समीचीनतयोपरिष्टादुपन्यस्तः ।
५. 'यथा' इति ख० पुस्तके नास्ति ।

अष्टविकल्प इत्यादि । देवानामयं दैवः । सोऽष्टविधः । तद्यथा ब्राह्मः, प्राजापत्यः, सौरः, आसुरः, गान्धर्वः, याक्षः, राक्षसः, पैशाचश्चेति । तैर्यग्योन्यश्च पञ्चधा भवतीति । तिर्यग्योनीनामयं तैर्यग्योन्यः[1] । पशुमृगपक्षिसरीसृपस्थावरभेदात् पञ्चविधः । तत्र गवाद्या रासभान्ताः पशवः । सिंहाद्या विडालान्ता मृगाः । हंसाद्या मशकान्ताः पक्षिणः । सर्पादयः कृम्यन्ताः सरीसृपाः । वृक्षादयः स्थूणान्ताः स्थावरा इति । मानुष्यश्चैकविध इति । मनुष्याणामयं मानुष्यः । एवंविधसंस्थानस्यैकविधत्वात् । ब्रह्मादिभेदोऽपि सत्त्वरजस्तमसां विकल्पात् काल[3]व्यवहारनिमित्तम् ॥

समासत इति । संक्षेपेण । विस्तर...तस्तस्यैव (?)—जरायुजाण्डजोष्मजोद्भिज्जाख्याश्चत्वारो भेदाः शास्त्रान्तरे द्रष्टव्याः । उद्भिज्जाः स्थावराः ॥

भौतिकः सर्ग इति । भूतेषु भवो भौतिकः; लोकोत्पाद इत्यर्थः । स च द्विविधः ॥ ५३ ॥

स्थूलशरीरे सत्यपि[4] कश्चिदेव कचिदाधिक्येन वर्तत इति दर्शयन्नाह—

ऊर्ध्वं सत्त्वविशालस्तमोविशालश्च मूलतः सर्गः ।
मध्ये रजोविशालो ब्रह्मादिस्तम्बपर्यन्तः ॥ ५४ ॥

ऊर्ध्वमित्यादि । ब्रह्मा आदिर्यस्य सर्गस्य स्तम्बश्च तृणविटपपर्यन्तः, स ब्रह्मादिस्तम्बपर्यन्तः सर्गः । स ऊर्ध्वः सत्त्वविशालः । ऊर्ध्वं देवलोकस्तस्योत्कृष्टत्वात् तत्र सात्त्विक इत्यर्थः । देवलोकस्य सत्त्वबहुलत्वात् । तमोविशालश्च मूलतः सर्ग इति । तैर्य(ग्योनो)[6] मूलम्; तस्याधमत्वात् । तस्मिन् मूले तमोधिकं तमोबहुलत्वात् । मध्ये रजोविशाल इति । मनुष्यलोके मध्ये । उत्तराधरभावात् तत्र दुःखबहुलत्वात् ॥ ५४ ॥

१. 'तैर्यग्योनयः' इति ख० ।
२. 'ब्राह्मा॰' इति क० ।
३. 'कोप॰' इति ख० ।
४. 'सत्त्वयि' इति क० पाठस्तु प्रामादिकः ।
५. 'विकट॰' इति ख० ।
६. अत्र ग्रन्थस्त्रुटितः ।

यदि त्रिषु लोकेषु लिङ्गं संसरति, तदेव तर्हि सांसारिकं सुखं दुःखं वाप्नोति, तस्यैव सांसारिकत्वादित्याह—

तत्र जरामरणकृतं दुःखं प्राप्नोति चेतनः पुरुषः ।

लिङ्गस्याविनिवृत्तेस्तस्माद् दुःखं स्वभावेन ॥ ५५ ॥

तत्रेत्यादि । तेषु[1] लोकेषु जरामरणकृतमिति चतुर्दुःखोपलक्षणार्थम् । गर्भदुःखम्, जन्मदुःखम्, जरादुःखम्, मरणदुःखमिति । तत्र मातुः कुक्षौ अन्धतमसमीव प्रविष्टस्य सङ्कुञ्चनप्रसारणदुःखं गर्भदुःखम् । जायमानस्य मातुरुदरान्निर्गच्छतो जन्मदुःखम् । ......पलित[2]स्खलनादिदुःखं जरादुःखम् । मरणावस्थायां स्थूलशरीरं त्यजतो मरणदुःखम् । एतत्त्वाध्यात्मिकं दुःखेऽन्तर्भूतमप्रीतदुःखं बुद्ध्याध्यवसितं पुरुषः प्राप्नोति तस्य चेतनत्वात्, न तु लिङ्गमचेतनत्वादिति भावः । कियन्तं कालमित्याह—लिङ्गस्याविनिवृत्तेरिति । यावल्लिङ्गस्याविनिवृत्तिस्तावदित्यर्थः । तस्य च निवृत्तिः प्रधानपुरुषान्तरज्ञानात् । यतश्चैवं तस्माद् दुःखं स्वभावेन । लिङ्गगर्भाद्यवस्थासु स्वभावतो दुःखमित्यर्थः । लोकत्रये सुखमपि प्राप्नोति, तन्नोक्त तस्यानियतत्वात् । जरादिदुःखं तु नियतमिति ॥५५॥

योऽयं भावलिङ्गभूततत्सर्गः स किमीश्वरात्, यथोच्यते—

'ईश्वरप्रेरितो गच्छेत् स्वर्गं वा श्वभ्रमेव वा ।'

(महा० भा० ३।३१।२७)

इति, किं वा पुरुषात्, यथोच्यते—

'पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्यम्[3] ।' (ऋ० स० १०।९०।२)

इति, किं वा स्वभावात्, यथोच्यते—

'स्वभाविकमेवेदं सर्वं जगन्नहि मरुदादयः केनचित क्रियन्ते ।'

इत्यत्राह—

इत्येष प्रकृतिकृतो महदादिविशेषभूतपर्यन्तः ।

प्रतिपुरुषविमोक्षार्थं स्वार्थ इव परार्थ आरम्भः ॥ ५६ ॥

१. 'त्रिषु' इति ख० । २. 'चलिता०' इति ख० ।

३. 'यच्च भव्यम्' इति ऋ० स० पाठः, अथर्ववेदे तु 'यद्वा भाव्यम्' इति पाठः ।

इत्येष प्रकृतिकृत इत्यादि । आरभ्यत इत्यारम्भः । प्रकृतिकृत इति प्रधानकृतः, नेश्वरादिकृत इत्यर्थः । लोकत्रयं त्रिगुणात्मकं भवति, तच्च त्रिगुणाया एव प्रकृतेरुत्पद्यते । नापि स्वाभाविकम्, विपरीतगुणदोषप्रसङ्गाद् देशानियमयोगाच्च । स किंस्वरूप इत्याह—महदादिविशेषभूत[1]पर्यन्त इति । बुद्धिरादिर्यस्यारम्भस्य[2] । भूतानि लोकत्रये यान्यभिन्नसंस्थानानि स्थूलशरीराख्यानि । विषयाश्च । बाह्याश्च विषयाः सूक्ष्माः स्थूलाः । ते पर्यन्तेऽवसाने यस्य स तथोक्तः । अनेन भावलिङ्गभूतसर्गाख्यास्त्रय आख्याताः । किमर्थमयं प्रधानस्यारम्भ इत्यत्राह—प्रतिपुरुषविमोक्षार्थमिति । एकैकस्य पुरुषस्य विमुक्त्यर्थमारम्भः, पुरुषाणां बहुत्वात् । भावसर्गं भूतसर्गं चानेक इति दर्शयति । तथाहि मोक्षार्थं विषयोपभोगार्थं चायमारम्भ इति द्रष्टव्यम् । प्रधानेन हि पुरुषार्थः कर्तव्यः । स च द्विविधः—विषयोपभोगः कैवल्यं च । तदुभयं कृत्वा निवर्तत इति ॥

स्वार्थ इति । यः कश्चित् देवदत्तस्वार्थ इव परार्थी रहितित प्रवर्तते न परस्तपस्करोति (?) तथा प्रधानमपीत्यर्थः ॥ ५६ ॥

ननु च सचेतनस्य बुद्धिपूर्विका प्रवृत्तिर्भवति, प्रधानस्याचेतनत्वात् कथं लोकत्रये पुरुषं विषयैः संयोज्य ध्यानेन विप्रमोच्य निवर्तेत । कथमेवंविधा प्रवृत्तिः । नायं नियमः, अचेतनानामपि लोके प्रवृत्तिदर्शनात् । यदाह—

वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य ।

पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्य ॥ ५७ ॥

वत्सविवृद्धिनिमित्तमित्यादि । वत्सस्य विवृद्धिः पुष्टिः । तस्या निमित्तम् । क्षीरस्य यथा प्रवृत्तिरज्ञस्येति । अचेतनस्य । यथा तृणादिकमचेतनं गवाशितं[4] पीतं च, वत्सस्य पुष्टिः कर्तव्येति, क्षीरात्मना परिणमति कृतार्थं च निवर्तत इति ॥ ५७ ॥

१. 'भूत' इति तु पुस्तकेषु नास्ति । तन्तु मूलानुरोधेन पूरितम् ।
२. 'बुद्धिराद्यस्यारम्भस्य' इति ख० ।
३. '०विवृद्धिर्निमित्त' इति ख० पुस्तकपाठो न मनोरमो मूलविरोधात् ।
४. 'गवादिकं' इति ख० ।

यदि पुरुषविमोक्षार्थं प्रधानस्य प्रवृत्तिः, प्रवृत्तः प्राक् पुरुषस्य कैवल्यं स्थितमेव, तत्, किं तेन प्रवृत्तेन ? तथा चाहुः—

'मध्वर्थं प्रस्थितः कश्चिद् ग्रामाभ्याशे[1] तु माक्षिकम् ।
अङ्के चेन्मधु विन्देत किमर्थं पर्वतं व्रजेत् ॥' इति ॥[2]

अत्राह—

औत्सुक्यनिवृत्त्यर्थं यथा क्रियासु प्रवर्तते लोकः ।
पुरुषस्य विमोक्षार्थं प्रवर्तते तद्वदव्यक्तम् ॥ ५८ ॥

औत्सुक्यमित्यादि[3] । यथौत्सुक्यनिवृत्त्यर्थमभिमतक्रियासु लोकः प्रवर्तते, तद्वत् प्रलयावस्थायां पुरुषोऽपि मोक्षनिमित्तं यदौत्सुक्यं तन्निवृत्तये प्रवर्तयेत् प्रधानमिति ॥ ५८ ॥

उदाहरणान्तरमाह—

रङ्गस्य दर्शयित्वा निवर्तते नर्तकी यथा नृत्तात् ।
पुरुषस्य तथाऽऽत्मानं प्रकाश्य विनिवर्तते प्रकृतिः ॥५९॥

रङ्गस्येत्यादि[4] । नृत्यतीति नर्तकी । सा यथा रङ्गस्य नृत्तं दर्शयित्वा तस्मान्नृत्तान्निवर्तते विरमति, दृष्टाहमनेनेति कृतप्रयोजना सती, तथा पुरुषस्यात्मानं संप्रकाश्य देवादिभावरूपं गता निवर्तते प्रकृतिः प्रधानमित्युक्तम्[5] ॥ ५९ ॥

ननु च नटी रङ्गात् स्वार्थं साधयति, प्रकृतेस्तु पुरुषार्थः स्वार्थः येनैवमाचरतीत्याह—

नानाविधैरुपायैरुपकारिण्यनुपकारिणः पुंसः ।
गुणवत्यगुणस्य सतस्तस्यार्थमपार्थकं चरति ॥ ६० ॥

१. 'ग्रामाभ्यासे' इति ख० ।
२. पाठान्तरं माठरवृत्तौ (पृ० ३) द्रष्टव्यम् ।
३. 'औत्सुक्यमित्यादि' इति सर्वपुस्तकपाठो मूलविरोधाच्चिन्त्यः ।
४. 'ईशास्ये०' इति ख० पुस्तकपाठो मूलेन न संगच्छेते ।
५. '०मित्यर्थः' इति क० ।

नानाविधैरित्यादि । पूर्वं सप्तभिर्धर्मादिभिरुपायैस्त्रिषु विषयेष्वात्मानं प्रकाशयत्युपकारिणी, तदनन्तरमेकेन ज्ञानाख्येन कैवल्यं कुर्वाणोपकारिणी भवति । अनुपकारिणः[1] पुंस इति । न पुमांस्तां प्रत्युपकरोति, अहमनयोपकृत इति । पुनः सा तमुपकरोति । नासौ तामित्याह—गुणवत्यगुणस्य सत इति । गुणसत्त्वात् प्रकृतिः सक्रिया[2], निर्गुणत्वात् पुरुषो निष्क्रिय इति । तस्यार्थमपार्थकं चरति । तस्य पुंसोऽर्थो द्विविधः—विषयोपभोगः, कैवल्यं च । तन्निरर्थकं करोति, यतस्तस्याः[3] प्रयोजनाभावः । व्यक्तात्मनाऽऽत्मानं दर्शयति, न त्वव्यक्तात्मना ॥ ६० ॥

तथाहि—गुणानां साम्यावस्था प्रकृतिः । कुतश्च सा न सर्वात्मनाऽऽत्मानं प्रकाशयति, पुमानपि न सर्वथा पश्यति ? तथा चाहुः—

'गुणानां परमं रूपं न दृष्टिपथमृच्छति ।
यत्तु दृष्टिपथं प्राप्तं तन्मायावस्तु तुच्छकम् ॥' इति ॥

अत्राह—

प्रकृतेः सुकुमारतरं न किञ्चिदस्तीति मे मतिर्भवति ।
या दृष्टाऽस्मीति पुनर्न दर्शनमुपैति पुरुषस्य ॥६१॥

प्रकृतेरित्यादि । सुकुमारतरमिति सूक्ष्मतरमितरत् । एतदुक्तं भवति—प्राग्व्यक्तात्मना प्रकाशयति न त्वव्यक्तात्मनाऽपि, येन ज्ञानावस्थायां प्रकृतेर्मतिर्भवति मम सूक्ष्मतरं न किञ्चिदपरमस्ति यत् द्रष्टव्यं पुरुषेण ॥

या दृष्टाऽस्मीति । सा प्रकृतिर्व्यक्तात्मना च दृष्टाहमनेनेति न पुनर्दर्शनमुपैति पुरुषस्य; द्रष्टव्याभावात् । ततश्चैवं सर्वथा प्रकृतिरात्मानं प्रकाशयति, पुरुषश्चैवां सर्वथा पश्यति ॥ ६१ ॥

तस्मान्न पुरुषस्य बन्धो नापि संसरणं मोक्षो वेत्याह—

तस्मान्न बध्यतेऽद्धा न मुच्यते नापि संसरति कश्चित् ।
संसरति बध्यते मुच्यते च नानाश्रया प्रकृतिः ॥ ६२ ॥

१. 'अनपकारिणः' इति सर्वपुस्तकपाठः प्रामादिको मूलविरोधात्, अग्रिमपङ्क्तिविरोधाच्च ।
२. 'सत्क्रिया' इति ख० ।
३. '०स्तस्या' इति ख० पुस्तकस्थपाठः प्रामादिकः ।

तस्मान्न बध्यत इत्यादि। बन्धाभावान्न बध्यते। पुरुषस्यापि कार्यत्वाद्बन्धो नास्ति। न विमुच्यते; तस्या बन्धनात्। नापि संसरति; निष्क्रियत्वात्। कश्चिदिति पुरुष इत्यर्थः। कस्य तर्हि बन्धादय इत्याह—संसरति बध्यते मुच्यते च प्रकृतिरिति। ननु च[1] तस्याः सुकुमारत्वाद् बन्धादयो न सम्भवन्त्येवेत्यत्राह—(नानाश्रयाप्रकृतिरिति)। नानाश्रयेषुरभिवज्यते(?)[2]। तत्राश्रया[3]ः भावलिङ्गभूताः सर्गाः। ते प्रकृतिपुरुषवन्नानाविधाः ॥ ६२ ॥

ततश्च नानाश्रयत्वादेव दर्शयन्नाह—

रूपैः सप्तभिरेव तु बध्नात्यात्मानमात्मना प्रकृतिः।
सैव च पुरुषार्थं प्रति विमोचयत्येकरूपेण ॥ ६३ ॥

रूपैरित्यादि। धर्मादयो बुद्धे रूपाण्युक्तानि। सप्तभिरिति[4]। ज्ञानं त्यक्त्वा ते च प्रकृतेरात्मभूताः। ततश्च[5] सैवात्मनैव पुरुषार्थं प्रत्यात्मानं महदादिसूक्ष्मपर्यन्तं लिङ्गं बध्नाति। बन्धश्च त्रिविधः। तच्च लिङ्गं भावादिभिरधिवासितमर्थमेव[6]। संसरतीति। प्रकृतिरेव संसरति। सैव चेति। प्रकृतिः पुरुषार्थं प्रति कैवल्यार्थं विमोचयत्यात्मानम्।

एकरूपेणेति। एकं च तद्रूपं चेति। ज्ञानाख्येन रूपेणेत्यर्थः। यं पुरुषमपेक्ष्य ज्ञानमुत्पादयति तं प्रत्यव्यक्तमात्मानं संहरतीत्यर्थः। नहि धर्मादयः पुरुषधर्मा यस्तैर्बध्यते। नापि संसरति; अलिङ्गभावत्वात्। नापि मुच्यते; तस्य बन्धनत्वात् ॥ ६३ ॥

तदेवं ज्ञानं कथमुत्पद्यते येन मोचयतीत्याह—

एवं तत्त्वाभ्यासान्नास्मि न मे नाहमित्यपरिशेषम्।
अविपर्ययाद्विशुद्धं केवलमुत्पद्यते ज्ञानम् ॥ ६४ ॥

---

१. ख० पुस्तके 'च' इति नास्ति।
२. 'नानाश्रयेषुरविभज्यते' इति ख०।
३. 'तत्र याः' इति ख०।
४. क० पुस्तके 'इति' इति नास्ति।
५. क० पुस्तके 'ततश्च' इति नास्ति।
६. सर्वेष्वेव पुस्तकेष्वत्रत्यपाठो दुरुद्धरः, उपरिष्टादुपन्यस्त पाठस्तु क० सम्पादकैः परिकल्पितः।

एवं तत्त्वाभ्यासादित्यादि। एवमिति वक्ष्यमाणे योज्यम्। तत्त्वानि पञ्चविंशतिः। तेषां पुनः पुनः स्वरूपेणाभ्यसनमभ्यासः। यदेतत् सूक्ष्मशरीरं भौतिकं च तस्मिन्न भवामि, अपि तु प्रकृतिः। न म इत्यादि[1]। न ममेदमपि तु प्रकृतेः। नाहमिति। नाप्यहं प्रकृतिरित्येवं तत्त्वाभ्यासात्। किंविशिष्टात्—अविपर्ययादहमित्यमानसंशयाद् ज्ञानमुत्पद्यते ॥ ईदृशमित्याह—अपरिशेषमिति। परिपूर्ण[2] विशुद्धम्, संसारमलापगमात् केवलमेकमित्यर्थः ॥ ६४ ॥

ननु ज्ञानेन पुरुषः किं पश्यतीत्याह—

तेन निवृत्तप्रसवामर्थवशात् सप्तरूपविनिवृत्ताम्।
प्रकृतिं पश्यति पुरुषः प्रेक्षकवदवस्थितः स्वस्थः ॥ ६५ ॥

तेनेत्यादि। यत् प्रकृतिज्ञानमुत्पद्यते तत्[3] प्रति निवृत्तः प्रसवो लिङ्गभूतसर्गाख्यो यस्याः प्रकृतेः सा तथोक्ता। प्रसवनिवृत्त्या वा यो विषयो विषयेभ्यो निवर्तते तद्वशात्, सप्तभ्यो रूपेभ्यो धर्मादिभ्यो निवृत्ता प्रकृतिर्भवति। भावसंसर्गोऽपि यस्या निवर्तत इत्यर्थः। तामेवंविधामव्यक्तरूपां पश्यति पुरुषः। प्रेक्षक[4]वदवस्थित इति। यथा[5] प्रेक्षकः[6] प्रवर्तितनृत्तामुपसंहृतनृत्तां च नर्तकीं पश्यति, तथा पुरुषोऽपि प्रवर्तितसर्गामुपसंहृतसर्गां चेति। स्वस्थ इति। आत्मनि स्थितो न प्रकृतिस्थः[7], ततः प्रकृतेर्निवृत्तत्वात् ॥ ६५ ॥

ननु च यदि प्रकृतिर्गर्भभूः पुरुषं प्रति निवृत्तप्रसवा, तस्याश्च प्रकृतेस्तदानीं सर्वगतत्वादस्त्येव संयोगस्तत्किमिति पुनः शरीरोत्पत्तिर्न भवतीत्याह—

दृष्टा मयेत्युपेक्षक एको दृष्टाऽहमित्युपरमत्यन्या।
सति संयोगेऽपि तयोः प्रयोजनं नास्ति सर्गस्य ॥ ६६ ॥

---

१. ख० पुस्तकेऽत्र ग्रन्थस्त्रुटितः।
२. 'अपरिपूर्णम्' इति सर्वपुस्तकपाठः।
३. 'तं' इति क०।
४. 'प्रक्षेपक०' इति ख०।
५. 'यथा' इति ख० पुस्तके नास्ति।
६. 'प्रक्षेपकः' इति ख०।
७. 'न प्रकृतिस्थः' इति ख० पुस्तके नास्ति।

दृष्टा मयेत्यादि। तयोर्द्वयोरेकः पुरुष उपेक्षकः, सर्वथा···त्वात्। यथा प्रेक्षको[1] नटीमुपेक्षते निवृत्ताभिलाषत्वात्। दृष्टाऽहमित्युपरताऽन्येति[2]। अपरा प्रकृतिरुपरता निवृत्तप्रसवा। सर्वथाऽहमनेन दृष्टेति। ततश्च संयोगेऽपि तयोः प्रयोजनं नास्ति सर्गस्य। विषयोपभोगार्थः[3] सर्गः। तस्मिन्नेव चरितार्थत्वात् न पुनः सर्गमारभते। नहि नटी रङ्गे प्रेक्षकैर्निराकाङ्क्षितं पुनर्नृत्तमारभते ॥ ६६ ॥

यद्यात्मज्ञानात् कैवल्यप्राप्तिः, तदनन्तरमेव शरीरं कस्मान्न निवर्तत इत्याह—

सम्यग्ज्ञानाधिगमाद् धर्मादीनामकारणप्राप्तौ ।
तिष्ठति संस्कारवशाच्चक्रभ्रमवद्धृतशरीरः ॥ ६७ ॥

सम्यग्ज्ञानाधिगमादित्यादि। सम्यक् ज्ञानमात्मज्ञानम्, तस्याधिगमादात्मज्ञानप्राप्तेरित्यर्थः। धर्मादीनामकारणप्राप्ताविति। न कारणमकारणम्, तस्यामकारणप्राप्तावेव[4] तदुक्तं भवति। सम्यग्ज्ञानाधिगमात्तेषां धर्मादीनामग्निदग्धबीजवदशक्तत्वात्। जन्मान्तरसंस्कारवशाद्धृतशरीरं[5] पुमांस्तिष्ठति। कथम्? चक्रभ्रमवत्। यथा कुलालव्यापारे वृत्तेऽपि[7] वेगवशात् कियन्तमपि कालं चक्रभ्रमस्तिष्ठति तथा शरीरमपीत्यर्थः ॥ ६७ ॥

यदा[8] स मोक्षो भवतीत्यत्र—

प्राप्ते शरीरभेदे चरितार्थत्वात् प्रधानविनिवृत्तौ ।
ऐकान्तिकमात्यन्तिकमुभयं कैवल्यमाप्नोति ॥ ६८ ॥

१. 'प्रक्षेपकौ' इति ख०।
२. पाठोऽयं सर्वपुस्तकसम्मतोऽपि मूलविरुद्धः।
३. '०भोगतार्थः' इति ख०।
४. 'तस्यां कारणप्राप्तावेव' इति ख०। ५. '०मन्थ०' इति ख०।
६. '०शरीरः' इति समीचीनः पाठः क० संपादकसम्मतश्च।
७. 'निवृत्ते' इति साधीयान् पाठः।
८. 'कदा' इति क० सम्पादकस्य संशोधनम्। 'तदा' इति तदीयहस्तलिखितपुस्तकयोः।

प्राप्ते शरीरभेद इत्यादि। लिङ्गभौतिकशरीरे पृथग्भूते यथा संभूते लयं गतिः[1] तेष्वित्यर्थः। चरितार्थत्वात् प्रधानविनिवृत्ताविति। प्रधानं लिङ्गात्मना परिणतं निवर्तते। निवृत्तावुभयं कैवल्यमाप्नोति ॥

ऐकान्तिकमात्यन्तिकं[2] चेति। तत्रात्मज्ञानोत्पादादवश्यंभावि कैवल्यमित्यैकान्तिकम्। सत्यपि तयोः संयोगे प्रयोजनाभावान्न पुनः सर्ग इत्यात्यन्तिकमिति ॥ ६८ ॥

समत्यां विशुद्धिं दर्शयन्नाह—

पुरुषार्थज्ञानमिदं गुह्यं परमर्षिणा समाख्यातम् ।
स्थित्युत्पत्तिप्रलयाश्चिन्त्यन्ते यत्र भूतानाम् ॥ ६९ ॥

पुरुषार्थज्ञानमित्यादि। पुरुषार्थं ज्ञानं चेति। पुरुषार्थं ज्ञानं[3] यदिदं पञ्चविंशतितत्त्वज्ञानं तत्प्रधानम्, पुरुषार्थमोक्षोऽनेन प्राप्यत इति कृत्वा गुह्यमिदमप्रकाश्यम्। साधुजनादन्यस्मै न देयमित्यर्थः[4]। परमर्षिणा समाख्यातमिति[5]। कपिलमुनिना प्रकाशितम्। स्थित्युत्पत्तिप्रलयाश्चिन्त्यन्ते यत्र भूतानामिति। यत्र ज्ञाने भूतानां ब्रह्मादिस्तम्बपर्यन्तानां स्थित्यादयो व्यवस्थाप्यन्ते। तत्रोत्पन्नानां प्रबन्धेनावस्थानं स्थितिः। स[6] च त्रिषु स्थानेषु दैवमानुषतैर्यग्योनिषु[7] उत्पत्तिः सृष्टप्रधानाद् यावत् तन्मात्रेभ्यः पञ्चमहाभूतानि। सृष्ट्युपसंहारे महाप्रलयः, सर्वोऽप्युत्क्रमेण[8]। तद्यथा पृथिव्यादयस्तन्मात्रादिषु लीयन्ते यावत्प्रधानमिति। तेन पञ्चविंशतितत्त्वव्यतिरिक्तं नास्तीत्येतदुक्तम् ॥ ६९ ॥

१. 'गति' इति क०। उभावेव पाठौ अगतार्थौ।
२. 'ऐकान्तिक०' इति सर्वपुस्तकपाठः। स तु मूलविरोधादग्रिमपङ्क्तिविरोधाद्दुपेक्ष्यः।
३. 'पुरुषार्थज्ञानम्' इति क०।
४. 'देयमित्येतदित्यर्थः' इति ख०।
५. 'समा०' इति ख० पुस्तके नास्ति।
६. 'सा' इति क० सम्पादकस्य संशोधनम्।
७. '०योनेषु' इति क०।
८. 'सर्वोऽन्युत्क्रमेण' इति ख०।

मुनिना समाख्यातमिति कुतो ज्ञायत इत्याह—

एतत् पवित्रमग्र्यं मुनिरासुरयेऽनुकम्पया प्रददौ ।
आसुरिरपि पञ्चशिखाय तेन च बहुधा कृतं तन्त्रम् ॥७०॥

एतदित्यादि । पवित्रमिति । दुःखत्रयमेतत् पुनातीति कृत्वा । सर्वभेदानामग्रेभवत्वादग्र्यम् ॥

मुनिरासुरयेऽनुकम्पया प्रददाविति कपिलस्य मुनेः[1] सहोत्पन्नाश्चत्वारो धर्मादयः । तत्र ज्ञानाख्येन भावेनान्धे तमसि वर्तमानं जगत् दृष्टवतो मुनेः करुणोत्पन्ना । तया च प्रेर्यमाण आसुरिं सगोत्रब्राह्मणं वर्षसहस्रयातिनमागत्योवाच—'आसुरे ! रमसे त्वं गृहस्थधर्मेण' इति । स तमाह—'भगवन् न रमेऽहम्' इति । पुनर्वर्षसहस्रे पूर्णे तं गत्वा तथोवाच । सोऽपि 'भगवन् न रमेऽहम्' इत्युवाच । ततो मुनिना 'यदि विरक्तस्त्वम्, एहि[2] ब्रह्मचर्यं चर' इत्यसावुक्तः । स तु प्रतिपद्य गृहस्थधर्मं त्यक्त्वा प्रव्रजितः । तस्मै शिष्यायानुकम्पया संक्षिप्य दत्तवान्—'तम एव खल्विदमासीत्' । तस्मिंस्तमसि क्षेत्रज्ञ एव प्रथमः । तमः प्रधानम्, क्षेत्रज्ञः पुरुष उच्यते । आसुरिरपि तदेव संक्षिप्तं पञ्चशिखाय स्वशिष्यायानुकम्पया प्रददौ । तेनेति । पञ्चशिखेन मुनिना बहुधा कृतं तन्त्रम् । षष्टितन्त्राख्यं षष्टिखण्डं कृतमिति । तत्रैव हि षष्टिरर्था व्याख्याताः ॥ ७० ॥

ननु च षष्टितन्त्रमेवास्तु किं सप्तत्येति स्वशास्त्रकरणप्रयोजनमाह—

शिष्यपरम्परयाऽऽगतमीश्वरकृष्णेन चैतदार्याभिः ।
संक्षिप्तमार्यमतिना सम्यग्विज्ञाय सिद्धान्तम् ॥ ७१ ॥

शिष्यपरम्परयेत्यादि । मुनेरासुरेः पञ्चशिखस्तथा गर्गगौतमप्रभृतिर्णरामतंप्रम्या (?) ईश्वरकृष्णनामानं परिव्राजकमित्यनया शिष्यपरम्परया । इति ज्ञानभयरूपेणागतं सिद्धान्तं षष्टितन्त्रम् । सम्यग्विज्ञाय संक्षिप्तं षष्टितन्त्रम्, पञ्चविंशतितत्त्वाख्यं ज्ञानमित्यर्थः । आर्यमतिः, अधिगततत्त्वज्ञानतयार्यमितिः ॥

आर्याभिरिति । सप्तत्येत्यर्थः । 'दुःखत्रयाभिघातात्' 'एतत् पवित्रम्' इति सप्तत्याभिहितम् ॥ ७१ ॥

१. 'महामुनेः' इति क० ।
२. 'एहि' इति ख० पुस्तके नास्ति ।

अत्र षष्टितन्त्रे बहवोऽर्थाः, तेऽत्र नोक्ता इत्याह—

सप्तत्यां किल येऽर्थास्तेऽर्थाः कृत्स्नस्य षष्टितन्त्रस्य ।
आख्यायिकाविरहिताः परवादविवर्जिताश्चापि ॥ ७२ ॥

सप्तत्यामित्यादि । 'एष प्रत्ययसर्गो विपर्ययाशक्तितुष्टिसिद्ध्याख्यः' इत्यादिना ग्रन्थेन य उक्तास्ते कृत्स्नस्य षष्टितन्त्रस्यापि । किन्तु 'आख्यायिकाविरहिताः परवादविवर्जिताः शुद्धाः' इति आख्यायिका आख्यानम्, तद्विरहिताः । परचोद्यं तेन विवर्जिताः । शुद्धाः केवलाः । परं बन्धमोक्षोपयोगिनोऽर्थाः दर्शिता इति तस्मात् सम्पूर्णेयं सप्ततिरिति ॥ ७२ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीगोविन्दभगवत्पूज्यपादशिष्येण
श्रीशङ्करभगवता कृता सांख्यसप्ततिटीका समाप्ता ।

UNIVERSITY OF SANSKRIT SREE SANKARACHARYA 036210 LIBRARY